
# वैदिकसाहित्यपरिचयः

**Course Code: B21SN05DE**

Discipline Specific Elective Course
Undergraduate Programme in
Sanskrit Language and Literature
Self Learning Material




SREENARAYANAGURU OPEN UNIVERSITY

The State University for Education, Training and Research in Blended Format, Kerala

# SREENARAYANAGURU OPEN UNIVERSITY

## Vision

*To increase access of potential learners of all categories to higher education, research and training, and ensure equity through delivery of high quality processes and outcomes fostering inclusive educational empowerment for social advancement.*

## Mission

To be benchmarked as a model for conservation and dissemination of knowledge and skill on blended and virtual mode in education, training and research for normal, continuing, and adult learners.

## Pathway

Access and Quality define Equity.

SGOU

# वैदिकसाहित्यपरिचयः

Course Code: B21SN05DE

Semester - V

## Discipline Specific Elective Course
## Undergraduate Programme
## Sanskrit Language and Literature
## Self Learning Material

**(With Model Question Paper Sets)**

SREENARAYANAGURU
OPEN UNIVERSITY

**SREENARAYANAGURU OPEN UNIVERSITY**

The State University for Education, Training and Research in Blended Format, Kerala

# वैदिकसाहित्यपरिचयः

Course Code: B21SN05DE
Semester- V
Discipline Specific Elective Course
BA Sanskrit Language and Literature

SREENARAYANAGURU OPEN UNIVERSITY


**Academic Committee**

Dr. C.T. Francis
Dr. Sreeja Priyadharshini
Dr. Smitha Sabu
Dr. K. Ratheesh
Dr. Jeena George
Dr. R. Maniyappan
Dr. Thara K.V.
Dr. K. Retheesh
Dr. M. Harinarayanan Mankulathillath
Dr. Susanth S.



**Development of the Content**

Dr. Vijayarajan K.U.
Dr. K.K. Sundareshan

**Review and Edit**

Dr. G. Sahadevan
Dr. P. V. Viswanathan Nampoothiri

**Linguistics**

Dr. G. Sahadevan

**Scrutiny**

Dr. Jothilekshmi M.
Dr. Sreeja J.
Dr. Vijayarajan K.U.

**Design Control**

Azeem Babu T.A.

**Cover Design**

Jobin J.

**Co-ordination**

**Director, MDDC :**
Dr. I.G. Shibi
**Asst. Director, MDDC :**
Dr. Sajeevkumar G.
**Coordinator, Development:**
Dr. Anfal M.
**Coordinator, Distribution:**
Dr. Sanitha K.K.


Scan this QR Code for reading the SLM on a digital device.


**Edition:**
January 2025



**Copyright:**
© Sreenarayanaguru Open University



ISBN 978-81-982562-4-9



All rights reserved. No part of this work may be reproduced in any form, by mimeograph or any other means, without permission in writing from Sreenarayanaguru Open University. Printed and published on behalf of Sreenarayanaguru Open University by Registrar, SGOU, Kollam.

www.sgou.ac.in

Visit and Subscribe our Social Media Platforms

# MESSAGE FROM VICE CHANCELLOR

Dear learner,

I extend my heartfelt greetings and profound enthusiasm as I warmly welcome you to Sreenarayanaguru Open University. Established in September 2020 as a state-led endeavour to promote higher education through open and distance learning modes, our institution was shaped by the guiding principle that access and quality are the cornerstones of equity. We have firmly resolved to uphold the highest standards of education, setting the benchmark and charting the course.

The courses offered by the Sreenarayanaguru Open University aim to strike a quality balance, ensuring students are equipped for both personal growth and professional excellence. The University embraces the widely acclaimed "blended format," a practical framework that harmoniously integrates Self-Learning Materials, Classroom Counseling, and Virtual modes, fostering a dynamic and enriching experience for both learners and instructors.

The university aims to offer you an engaging and thought-provoking educational journey. The undergraduate programme in Sanskrit Language and Literature is distinguished by its strong focus on grammar and comprehension components while still allocating sufficient attention to literary discussions within the curriculum. Sanskrit education, recognised for its high employability potential, necessitates a practical integration of both grammatical and literary aspects. This programme operates on this premise, and the Self Learning Material is designed to reflect this balanced approach.

Rest assured, the university's student support services will be at your disposal throughout your academic journey, readily available to address any concerns or grievances you may encounter. We encourage you to reach out to us freely regarding any matter about your academic programme. It is our sincere wish that you achieve the utmost success.



Warm regards.
Dr. Jagathy Raj V. P.

01-01-2025

# Contents


| | |
|---|---|
| Block-1 उपोद्घातः | 1 |
| Unit 1 वेदानां नामानि | 2 |
| Unit 2 संहिताः | 16 |
| Unit 3 ब्राह्मणं आरण्यकं च | 25 |
| Unit 4 उपनिषत् | 40 |
| Block-2 वेदाङ्गानि उपवेदाश्च | 52 |
| Unit 1 वेदाङ्गेषु शिक्षा व्याकरणं च | 53 |
| Unit 2 ज्योतिश्शास्त्रम्,निरुक्तं, कल्पश्च | 67 |
| Unit 3 उपवेदेषु आयुर्वेदः धनुर्वेदश्च | 77 |
| Unit 4 उपवेदे गान्धर्ववेदः अर्थवेदश्च | 84 |
| Block-3 ऋग्वेदः संवादसूक्तम् | 88 |
| Unit 1 ऋग्वेदेमण्डलं 7, सूक्तं- 55, मन्त्राः 1, 2, 3, 4. | 90 |
| Unit 2 ऋग्वेदे मण्डलं 7, सूक्तं- 55, मन्त्राः 5, 6, 7, 8. | 93 |
| Unit 3 ऋग्वेदे मण्डलं 10, सूक्तं 191, प्रथमद्वितीयमन्त्रौ | 95 |
| Unit 4 ऋग्वेदे मण्डलं 10, सूक्तं 191, तृतीय- चतुर्थमन्त्रौ।(“समानो मन्त्रः”, “समानी व”) | 97 |
| Block-4 यजुर्वेदः-प्रथमाध्यायात् षड्मन्त्राः | 101 |
| Unit 1 यजुर्वेदे प्रथमाध्यायाद् प्रथम- द्वितीय- तृतीयमन्त्राः | 103 |
| Unit 2 यजुर्वेदे प्रथमाध्यायाद् चतुर्थ- पञ्चम- षष्ठमन्त्राः | 105 |
| Block-5 सामवेदः-प्रथमाध्याये अग्निसूक्तात् अष्टमन्त्राः | 109 |
| Unit 1 प्रथमाध्याये अग्निसूक्तात् प्रथम- द्वितीय- तृतीयमन्त्राः | 110 |
| Unit 2 प्रथमाध्याये अग्निसूक्तात् चतुर्थपञ्चमषष्ठमन्त्राः | 112 |
| Unit 3 प्रथमाध्याये अग्निसूक्तात् सप्तमाष्टममन्त्रौ | 114 |
| Block-6 अथर्ववेदः-आपः सूक्तानि (प्रथमकाण्डे चतुर्थ-पञ्चम-षष्ठसूक्तानि) | 118 |
| Unit 1 अथर्ववेदे आपः सूक्तानि (प्रथमकाण्डे चतुर्थसूक्तम्- चत्वारो मन्त्राः) | 121 |
| Unit 2 अथर्ववेदे आपः सूक्तानि (प्रथमकाण्डे पञ्चमसूक्तात् त्रयो मन्त्राः) | 123 |
| Unit 3 अथर्ववेदे आपः सूक्तानि(प्रथमकाण्डे पञ्चमसूक्तात् चतुर्थो मन्त्रः, षष्ठसूक्तस्य प्रथमद्वितीयमन्त्रौ च | 125 |
| Model Question Paper (SET-A & SET-B) | 130 |

BLOCK - 1

# उपोद्घातः

SGOU

# Unit 1
# वेदानां नामानि

## उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- संहिता-ब्राह्मण-आरण्यकानां ज्ञानं प्राप्नोति।
- उपनिषदां ज्ञानम्।

## प्राग्व्यपेक्षाः (Pre requisites)

वेदाः विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः सन्ति। मानवसंस्कृतेः प्राचीनतमरूपविकासमवबोधनार्थं वेदानां ज्ञानम् आवश्यकमेव। मानवजातेः इतिहासज्ञानाय भारतीयसंस्कृतिं ज्ञातुं वेदानाम् अध्ययनं अत्यावश्यकम्। वेदमेव आधारं मत्वाभारतीयदार्शनिक - धार्मिक - सामाजिक - ज्ञानस्य भव्यप्रसादं प्रतिभासम्पन्नाः वाक्शिल्पिनः व्यरचयन्। भारतीयजनानां विचारः वैदिकयुगात् वर्तमानकालपर्यन्तम् अनेकदृष्ट्या सर्वथा सममेवास्ति।वैदिकयुगस्य प्रभावः अधुनापि भारतीयानां जीवने स्वभावे च निरन्तरमबाधगत्या प्रवहति। तस्य प्रभावः भारतीयजनानामत्यल्पेषु कार्येषु अपि परिलक्ष्यते। सर्वेषां शास्त्राणां मूलस्रोतः वेदेष्वेव विद्यते। सर्वे दर्शनग्रन्थाः वैदिकसिद्धान्तानां व्याख्यानभूताः सन्ति। वर्तमानकालस्य भारतीयजनानामाचार-विचारधर्मकर्मादीनां ज्ञानार्थं वेदाध्ययनं परमावश्यकम् अस्ति।

## प्रधानांशाः/प्रधानपदानि (Key words)

विद्धातुः, वेदाः, ऋग्वेदः, यजुर्वेदः, सामवेदः, अथर्ववेदः, वेदाङ्गानि,भारतीयसंस्कृतेः आधारः।

## विशदीकरणम् (Discussion)

सर्वेषां शास्त्राणां मूलबीजं वेदेषु दृश्यते। तेषु दर्शनशास्त्रस्य राजनीतेः समाजशास्त्रस्य मनोविज्ञानस्य आयुर्वेदस्य गणितस्य अर्थशास्त्रस्य काव्यशास्त्रस्य नाट्यशास्त्रस्य कामशास्त्रस्य च मूलस्रोतं विद्यते।तथ्यमेतद् नाट्यशास्त्रकर्तुः भरतमुनेर्विवेचनेन स्पष्टं भवति –

**जग्राह पाठ्यम् ऋग्वेदात्सामभ्यो गीतमेव च।**

**यजुर्वेदादभिनयान् रसानाथर्वणादपि।।**

वेदानां प्राचीनता तेषां वैशिष्ट्यं सूचयति। वेदाः भारतीयजीवनस्य सृष्टिप्रक्रियायां तथा पोषणप्रक्रियायां स्वाधीनता अद्यापि प्रकटीकृत्य सर्गशक्तिरूपेण भासते। भागवते वेदः निगमकल्पतरु इति रूपेण स्तूयते।

स्वकीयवैशिष्ट्यैः वैदिकवाङ्मयस्य महत्त्वं प्रतिष्ठितं विद्यते । वेदानां ज्ञानमन्तरा नान्त्यं जीवनस्य लक्ष्यमधिगम्यं भवति, अतोऽपि वैदिकवाङ्मयस्य पदं महत्त्वपूर्णमस्ति । ज्ञानस्य विमला धारा समस्तेऽपि क्षितिमण्डले सर्वास्वपि दिशासु वेदेभ्य एव निःसृत्य प्रसरति । वेदाः न केवलं भारतीयानामपि तु भुवः सर्वासामपि मानवजातीनां हितसाधनाय योग्याः प्राचीनाः ग्रन्थाः सन्ति ।

अस्मदीयाः पूर्वजाः केन प्रकारेण जीवनं यापयामासुः ? काभिः क्रीडाभिस्ते स्वकीयं मनो मोदयामासुः ? का देवतास्ते पूजयामासुः ? विवाहसम्बन्धस्योद्देश्यं किन्ते निर्धारयामासुः ? केन च विधिना ते प्रभाते अग्नावाहुतिं समर्पयामासुः ? इत्यादिविषये चेज्जिज्ञासा हृदि विजृम्भते तदा तद्विषयकं ज्ञानं यथार्थं वेदेभ्य एव लब्धुं शक्यमस्ति ।

अध्यात्मदर्शनस्य भारतीयदर्शनानाञ्च रहस्यं तेषां विकासस्य वैशिष्ट्यं च मूलतः वेदसाहाय्येनैव ज्ञेयं भवति । वेदोत्तरकालिकसाहित्ये ब्राह्मणग्रन्थोऽयमेवं वदति, दर्शन-शास्त्रमिदं ब्रवीति, वेदाङ्गभूतमिदं शंसति, अमुकः स्मृतिरिदं कथयति इत्येवं विधायां स्थित्यां किं कार्यं, किं न कार्यम् इत्येतत्कथयितॄणां कर्त्तव्यमिदं यत्ते वेदं शरणं यान्तु । तत्तच्छास्त्रादीनां तत्तत्कथनस्य रहस्यं वेद एवोन्मीलयिष्यति । तदेव तद्विधां शङ्कामपनोदयति ।

प्रधानरूपेण वेदो द्विविधः - मन्त्ररूपो ब्राह्मणरूपश्चेति । मन्त्रसमुदाय एव संहिताशब्देन व्यवहृतः । ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य व्याख्यारूप एव । स चायं ब्राह्मणभागो यागस्वरूप बोधकतया प्रथितः । ब्राह्मणग्रन्थोऽपि त्रिधा विभक्तो भवति-- ब्राह्मणम्, आरण्यकम् उपनिषदश्च । यज्ञस्वरूपं प्रति पावको ब्राह्मणभागश्च । अरण्ये पठिताः यज्ञस्याध्यात्मिकं रूपं विवेचयन्तो वेदभागा आरण्यकानि । उपनिषदो ब्रह्मबोधिकाः मोक्षसाधनानि, तान्येव आरण्यकानि । उपनिषदो ब्रह्मबोधिकाः मोक्षसाधनानि वेदस्यान्तरूपतया वेदान्त इत्युच्यते । ब्राह्मणभागो गृहस्थानामुपयोगी, आरण्यके वानप्रस्थमाश्रितानाम् उपनिषद्भागश्च संन्यस्तानामुपयोगीत्यपि कथयितुं शक्यते ।

वेदेषु संहिता ब्राह्मणम् आरण्यकं उपनिषत् च चत्वारः भागाः ।

### 1.1.1.वैदिकवाङ्मयम्

भारतीयज्ञानगङ्गायाः स्रोतांसि वेदा एव सन्ति । एवंविधोऽन्यो न कोऽपि दीप्तपुञ्जः ग्रन्थोऽस्ति यः स्वप्रभया न केवलं स्वयं भासितः प्रत्युत तया प्रभया समस्त भारतीय वाङ्मय एव प्रभासितो वर्त्तते । वेदशब्देन यथा चतस्रो मन्त्रसहिताः परिग्राह्याः भवन्ति तथैव वैदिकशब्देन वेदोत्तरकालिकसमस्त- वैदिकवाङ्मयस्यावबोधो भवति । वैदिकशब्दस्तु वेदविषयकबहुविधज्ञानसामग्रीणां सूचकः द्योतको वा भवति । वेदविषयकसामग्रीपदेन षड्वेदाङ्ग-ब्राह्मण- आरण्यक उपनिषदादीनां बोधो भवति । वेदाद्भिन्ना अप्येते वैदिकग्रन्थाः वेदोद्धृता एवेति । वैदिकवाङ्मयस्यान्तर्गता एवैते षड्वेदाङ्गादिकाः ग्रन्थाः सन्ति ।

न केवलं विषयसामग्रीदृष्ट्यापि ति ऐतिहासिकदृष्ट्याऽपि चत्वारो वेदाः वैदिकयुगे तथा तदुत्तरकालिकवैदिकप्रन्थान्तरवैदिककाले विभाजिताः भवन्ति । आधुनिकाश्चेतिहासकारास्त्वनेनैव प्रकारेण वैदिकवाङ्मयस्य विभाजनं कृतवन्तः। वैदिकसाहित्यस्य चत्वारो भागाः वेदानामेवाङ्गभूताः सन्ति ।यद्यपि साहित्यशब्दः सम्प्रति वाङ्मयमित्यर्थे प्रयुज्यते यत्राऽर्थे 'लिटरेचर'- शब्दो वैदेशिकै प्रयुज्यते । तथाऽप्यत्र वेदशब्दस्य प्रयोगो मन्त्रब्राह्मणयोर्निमित्तेन विधीयते। आपस्तम्बे प्रोक्तं च – 'मन्त्रब्राह्मणयोर्वेदनामधेयम्। येन हि यज्ञ- यागानामनुष्ठानं निष्पन्नतामुपैति देवतानाञ्च स्तुतिविधानं यत्रोल्लिखितमस्ति। मननात् मन्त्र इत्युच्यते । ब्राह्मणपदं तु ग्रन्थविशेषवाचकमस्ति । यज्ञानां विविधाः क्रियाकलापप्रतिपादकग्रन्थाः 'ब्राह्मणम्' इत्येतां संज्ञा भजते । 'ब्राह्मणम्' इत्येतस्य पदस्यार्थोऽस्ति 'वर्धनं विस्तारो वा वितानो वा यज्ञ' इति। ब्राह्मणमपि भागत्रये विभक्तमस्ति। प्रथम भाग ब्राह्मणमिति, द्वितीयो भागः आरण्यकम् इति, तृतीयो भागस्तु 'उपनिषदि ति कथ्यते।

### 1.1.2.वेदानां अपौरुषेयत्वम्

वेदस्य कर्तृविषये पण्डितानां मतानि भिन्नानि सन्ति। केचित् तं अपौरुषेयं मन्यन्ते। अपरे तु ईश्वरकर्तृकं मन्यन्ते, इतरे तु यस्य मन्त्रस्य य ऋषिरुक्तः स एव तस्य प्रणेतेति न पुरुषकर्तृकं मन्यन्ते। केचिद्वेदं जीवानानुभवानां सङ्ग्रहमिति चिन्तयन्ति।प्रतीच्या विपश्चितो वेदान् ऋषिप्रणीतान् मन्यन्ते। तेषां हि आधिभौतिकी दृष्टिस्तां शब्दराशिमेव सामान्यतयावगच्छति। परन्तु वेदमर्मज्ञाः भारतीयाः मेधाविनस्तान् न ऋषिकृतान् मन्यन्ते । तन्मते ऋषयो वैदिकमन्त्राणां द्रष्टारः सन्ति न तु कर्तारः। अलौकिकसामर्थ्यशालिन ऋषयो दिव्यया प्रतिभया मन्त्राणां दर्शनं लब्धवन्तस्तेषां प्रकाशः वेद इति । 'ऋषि' इत्येतस्य पदस्य व्युपत्तिः ऋषति पश्यति इति ऋषिः' इत्यर्थ एव 'मन्त्रद्रष्टा' इत्यस्ति एव ऋषिः शब्दः इगुपधात् किदित्यनेनौणादिकेन सूत्रेण इनि कृते निष्पद्यते। निरुक्ते च विद्यमानाः 'तयेनास्तपस्यमानन्

ब्रह्मस्वयम्भ्वभ्यानर्षत्’।इत्यादिकाः पङ्क्तयः ऋषेः मन्त्रद्रष्टुत्वमुपपादयन्ति। स्वयं वेदः एवात्मानं परमपुरुषाज्जातमिति कथयति।सांख्य-वेदान्त-मीमांसकानां मतेन वेदाः अपौरुषेयाः नित्याश्च किन्तु न्यायवैशेषिकयोर्मतेन ते पौरुषेया ईस्वरकर्तृकत्वात् नित्याश्च । सर्वाण्यपि धर्मशास्त्राणि पुराणानि च वेदानां अपौरुषेयत्वमेव स्वीकुर्वन्ति। ये ऋषयः मन्त्रविशेषैः सह सम्बद्धा उक्तास्तेऽपि तेषां मन्त्राणां द्रष्टारः एव न तु कर्तारः। ऋषयः खलु लोकोत्तरसामर्थ्यशालित्वात् दिव्यया प्रतिभया स्वीयया मन्त्रान् ददर्शुरिति।किञ्च -

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**

**एतं विदन्ति वेदेन तस्मादेतस्य वेदता।।**

अतो वेदानां स्वतः प्रामाण्यं भवति न केवलं शब्दप्रमाणमात्रम्। वेदाः यदेव कथयन्ति तत्तु प्रमाणमेव यदपि प्रत्याययन्ति तदपि प्रमाणमेव।तथा सति तेषामृषिकर्तृकत्वमपि नैव सिद्ध्यति, अशब्दविहितस्यापि तत्र प्रामाण्यात्।

### 1.1.3.वेदप्रतिपाद्यविषयः

वेदानां प्रतिपाद्यविषयः सामान्येन कर्ममीमांसा एव। विशेषतस्तु समस्तस्य मानवज्ञानस्य सूत्ररूपेण तत्र वर्णनात् न शक्यते एतावदेवेति व्यवच्छेतुम्। तथापि देवतास्तुतिः, कर्मसाधना ज्ञानमीमांसा चेति वेदवर्णितेषु प्रमुखेषु विषयेषु समुल्लेखनीयाः विषयाः।

वेदानां पाठप्रकारश्च पद-क्रम-घन-जटा-शिखा- रेखा - ध्वज- रूपैः बहुधा निर्दिष्टः। तत्र पदच्छेदपूर्वकपाठः पदपाठः। प्रतिपदं पूर्वोत्तराभ्यां सङ्गमय्यं द्विरुच्चारणं क्रमपाठः। प्रतिपदयुगलं त्रिरुच्चारणं द्वितीयावृत्तौ प्रातिलोम्येनोच्चारणं जटापाठः।जटापाठे एव यद्यन्यच्चैकं पदमग्रे संश्लिष्टतां याति तदा शिखापाठो भवति। पदानामनुलोमक्रमेणासकृदुच्चारणं घनपाठः। वेदानां पाठसंरक्षणाय अर्थनिर्द्धारणाय च स्वराणामुपयोगः क्रियते। स्वरास्त्रिविधा उदात्तानुदात्तस्वरितभेदात्। उच्चैरुदात्तो नीचैरनुदात्तः समाहारश्च स्वरितः । स्वरावबोधनाय चिह्नान्यपि प्रयुज्यन्ते। स्वरविशेषेण पदार्थनिर्णयो वाक्यनिर्णयश्च क्रियते। तत्रानुदात्तत्वे पूर्वान्वयिपदं आद्युदात्तत्वे तूत्तरान्वयि भवतीति।

वेदश्च स्वरूपभेदात् त्रिविध:- ऋग्वेद, यजुर्वेद सामवेदश्चेति । यत्रार्थवशेन पादव्यवस्थाऽस्ति तेषां छन्दोबद्धानां मन्त्राणां नाम 'ऋक्' इति वेद्यम् । ऋचा समूह एवं 'ऋग्वेद' इति पदेन व्यवह्रियते । यजुः इत्येतत्पदं यत् धातोः उसि प्रत्यये कृते निष्पद्यते । यस्मिन् वेदे यज्ञयागादिक्रियाकलापानुरोधेन मन्त्राणां सन्निवेशोऽस्ति स 'यजु वेद' इति निगद्यते । यत्र गीतिरूपा मन्त्राः विद्यन्ते स उपासनाकाण्डपरो वेद 'सामवेद' इति गीयते । मन्त्राणां विविधत्वात् वेदाः 'त्रयी' इति नाम्ना प्रसिद्धाः सन्ति ।मन्त्राणां समूहः 'संहिता' इत्येतेन व्यपदेशेन व्यपदिश्यते । मन्त्रसहितानां सङ्कलनं चतुर्विधतया कृतम्। तस्मात् संहिताः सन्ति तन्त्रः ऋक्संहिता, यजुसंहिता, सामसंहिता, अथर्वसंहिताश्चेति । अत एव वेदाः चत्वारः स्मृताः।

### 1.1.4. ऋग्वेदस्य परिचय:

आदौ वेद: एक एव आसीत्। द्वापरान्ते कृष्णद्वैपायनेन आगामिनि कलियुगे मानवबुद्धेः शैथिल्यं स्वप्रज्ञया ज्ञात्वा वेदविभजनं कृतम्। 'व्यस्यति वेदात् इति व्यासः' इति व्यासशब्दस्य निर्वाचनं महाभारते दृश्यते।

**यो व्यस्य वेदश्चतुरस्तपसा भगवानृषिः ।**

**लोके व्यासत्वमापेदे कार्ष्ण्यात् कृष्णत्वमेव च।।(म.मा. 1.105.14)**

भगवान् वेदव्यास: ऋग्यजुः सामार्थवणां मंत्राणां राशीन् तत्तत्प्रकरणभेदैः उद्धृत्य मन्त्रैःचतस्रः सहिताः चक्रे। ततो भगवान् वेदव्यास: चतुरः प्रगल्भान् शिष्यान् आहूय तेभ्यः एकैकां संहितामदात्। तस्मिन् क्रमे पैलाय ऋग्वेदं ददौ। पैल: स्वशिष्यान् तम् अध्यापयामास। ऋग्वेदस्य एकविंशतिः शाखा: सन्ति, यथा महाभाष्ये पश्पपशाह्निके प्रतिपादितम् “एकविंशतिधा बाहूवृच्यम्”। इदानींतने समये शाकल - बाष्कल - शांखायनाश्वलायनमिति

एता:सहस्त्रःशाखा: एव ऋग्वेदस्य उपलभ्यन्ते। अध्ययनाध्यापनक्रमे शाकलशाखा आधिक्येन प्रचलिता वर्तते।

**ऋग्वेदस्य विभजनम्**

ऋग्वेदे द्विधा विभाजनं वर्तते – मण्डलक्रमः अष्टकक्रमश्च। ऋग्वेदे दश मण्डलानि, अष्टौ अष्टकाः 10,580 1/4 मन्त्राः सन्ति इति चरणव्यूहपरिशिष्टे प्रथम ऋग्वेदखण्डे वर्णितम्।

**ऋचां दश सहस्राणि ऋचां पञ्चशतानि च।**

**ऋचामशीतिपादश्चैतत्पारायणमुच्यते ॥**

इदं शौनकीयचरणव्यूहोक्तपाठानुसारं परिगणनं बाष्कलादिशाखान्तरस्य पाठमाश्रित्य कृतमिति संभाव्यते।

महामहोपाध्यायेन श्रीविद्याधरशर्मणा कात्यायनश्रौतसूत्रस्य भूमिकायाम् इदं लिखितं दृश्यते "ऋग्वेदे चतुःषष्ट्यध्यायाः, अष्टावष्टकानि दश मण्डलानि षडुत्तरं सहस्रद्वयं वर्गः, सहस्रं सूक्तानि पञ्चाशीतिरनुवाकाः दशसहस्राणि चत्वारिंशदधिकानि चतुःशतं च मन्त्राः इति । इदमपि परिगणनं शाखान्तरीयं भवितुमर्हति।

**अष्टकक्रमः**

सम्पूर्णस्य ऋग्वेदस्य विभाजनं अष्टाष्टकेषु विद्यते। प्रत्येकाष्टके अष्टाध्यायाः सन्ति। एवं ऋग्वेदे चतुःषष्टिःअध्यायाः विद्यन्ते। अनेनैव कारणेन ऋग्वेदस्य चतुःषष्टि: संज्ञा प्रयुक्ता।प्रत्यध्यायं वर्गाःविद्यन्ते।वर्गेषु ऋचानां समूहः अस्ति। परञ्च वर्गेषु ऋचानां संख्या निश्चिता नास्ति। सामान्यतः पञ्चानाम् ऋचानां समूहः प्रतिवर्गं भवति। कतिपयेषु वर्गेषु एकेन एव ऋचा कतिपयेषु नवसंख्याका अपि ऋचा विद्यन्ते।सम्पूर्णे ग्रन्थे षडाधिकद्विसहस्रवर्गाः सन्ति।

**मण्डलक्रमः**

मण्डलक्रमानुसारं सम्पूर्ण-ऋग्वेदे मण्डलानां संख्या दश विद्यन्ते।एतेनैव कारणेन ऋग्वेदस्य दशतयी संख्या प्रयुक्ता। प्रत्येकमण्डलं अनुवाकाः अनुवाकेषु सूक्तानि सूक्तेषु ऋचा विद्यन्ते। एवं

सम्पूर्णऋग्वेदे पञ्चाशीति अनुवाकाः सप्तदशाधिकसहस्रमेकंसूक्तञ्च। एतदतिरिक्तं एकादश बालखिल्यसंज्ञकं सूक्तमस्ति।

ऋग्वेदान्तर्गतशाकलसंहितायाः अष्टमे मण्डले अष्टचत्वारिंशत्तमसूक्तोत्तरम् एकादशसूक्तानि बालखिल्याख्यानि विद्यन्ते । पठनपाठनपरंपराया सर्वत्र तानि भारतवर्षे अध्यापकैः शाकलसहितान्तर्गतसूक्तान्तराणीव संस्वराण्यध्याप्यन्ते, अध्येतृभिः च तथैव अभ्यस्यन्ते इति सर्वविदितम्। एषां वालखिल्यसूक्तानां तत्संहितान्तर्गतेतरांशवदेव महत्ता न तु ततः अल्पमपि न्यूना इत्यत्र न स्यात् कस्यचिद् अवसरः संदेहलेशस्यापि । शाकलसंहितापदपाठे तेषामपि सूक्तानां पदपाठो वर्तते एव।

## 1.1.5.यजुर्वेदः

यजुर्वेदः कर्मकाण्डप्रधानः मन्यते। यज्ञः कर्मणैव सम्पद्यते। तस्मात् यास्कः "यजुर्यजतेः" इत्यनेन सूत्रेण यत्र यजनादिकं व्याख्यातं तद्यानुरिति उक्तवान्। यज्ञेन परमपुरुषस्य सत्कारो भवति। तस्मात्सर्वेषु वेदेषु यज्ञस्य प्राधान्यं प्रमुखरूपेण वर्तते।

सोऽयं यजुर्वेदः शुक्ल-कृष्णभेदेन द्विविधः। तत्र शुक्ल यजुर्वेदः आदित्यसम्प्रदायस्य प्रतिनिधिः, कृष्णयजुर्वेदश्च ब्रह्मसम्प्रदायस्य प्रतिनिधिरस्ति। तस्मात् यजुर्वेदस्य द्वौ सम्प्रदायौ स्तः।

महाभाष्यकारेण पतञ्जलिना 'सर्वे देशान्तरे' एतद्वार्तिकव्याख्यानावसरे प्रतिवेदं शाखाभेदाः दर्शिताः। तेनोक्तम्- "एकशतमध्वर्युशाखाः" इति। यद्यपि शाखाभेदेऽपि शास्त्रेषु वैविध्यमस्ति, तथापि पतञ्जलिना प्रदर्शिताः शाखाभेदाः सर्वैरङ्गीक्रियन्ते। तदनु कृष्णयजुषः शाखाः षडशीतिरुदाहृताः शुक्लस्य यजुषः पञ्चदशशाखाश्चोक्ताः। एवम् एकोत्तरं शतं शाखाः प्रोक्ता हि याजुषे। उक्तासु एकोत्तरशतशाखासु सम्प्रति कृष्णयजुर्वेदस्य चतस्रः शाखाः समुपलभ्यन्ते। शुक्लयजुर्वेदस्य व माध्यन्दिन शाखा कण्वशाखा चेति द्वे शाखे उपलब्धे स्तः।

यजुर्वेदसंहितायाः परिचयः-1, शुक्लयजु०-40 अध्यायाः, 303 अनुवाकाः, 1975 मन्त्राः/ कण्डिका। कृष्णयजु०-40 अध्यायाः, 328 अनुवाकाः, 2086 मन्त्राः सन्ति। 2. शाखा-

शुक्लयजुः भाष्ये 100 शाखा, माध्यन्दिनशाखा काण्वशाखा च । कृष्णयजु० चतस्रः शाखाः तैत्तिरीयमैत्रायणीकठकपिष्ठलाः। 3. ब्राह्मणानि शतपथ- ब्राहाणम् (द्वयोः) (माध्यन्दिनकाण्वयोः) अन्ये च तैत्तिरीयमैत्रायणीकठकपिष्ठलब्राह्मणाणि । 4. आरण्यकाणि- शुक्लयजुः- बृहदारण्यकम्, कृष्णयजु०-द्वे, तैत्तिरीयमैत्रायणी च। 5. उपनिषद्-शुक्लयजु०- ईशावास्योपनिषत्, बृहदारण्यकोपनिषत् इत्यादयः । कृष्णयजु०- कठतैत्तिरीयादयः उपनिषदः। 6. होता-अध्वर्युः, 7. आचार्यः- शुक्लयजु० याज्ञवल्क्यः, यजु० वैशम्पायनः। 8. उपवेदः-धनुर्वेदः।

## 1.1.6.सामवेदः

सा च अमश्चेति तत्साम्नः सामत्वम्। सा नाम अमो नाम स्वरः। अतः स्वरबद्धरीत्या गेयात्मकर्चाणां समूहः साम-संहिता। यज्ञे उद्गाता यो हि देवाहूतये स्वरबद्धान् मन्त्रान् उच्चैर्गायति तदपेक्षितमन्त्रसंग्रहः सामवेदसंहितायां विद्यते । संहितायाः द्वौ भागौ पूर्वार्चिक उत्तरार्चिकश्च ।

सामसंहितायाः परिचयः - 1. परिमाणम्-पूर्वार्चिके 650 मन्त्राः, उत्तरार्चिके-1225 मन्त्राः, आहत्य- 1875 मन्त्राः, 1504 मन्त्राः ऋग्वेदीयाः 12. शाखाः- पतंजलिना सहस्त्रवर्त्मा सामवेदः इति प्रोक्तम् । त्रयोः प्रमुखाः कौथुमीयराणायनीयजैमिनीयशाखाः । 3. ब्राह्मणानि- पञ्च ब्राह्मणग्रन्था :4. आरण्यकाणि द्वौ ग्रन्थौ- 1. तवलकारारण्यकम्, 2. छान्दोग्यारण्यकम्। 5. उपनिषदः-केनछान्दोग्यमैत्रायण्यादयः 16 संख्यकाः । 6. होता-उद्गाता, 7. आचार्यः- जैमिनिः, 8. उपवेदः-गन्धर्ववेदः 19. विषयः-गानम्, विकारश्च, स्तुतिः । गानम्-प्रस्तावः, उद्गीथः, प्रतिहारः, उपद्रवः, निधश्च । विकारश्च-वकारः, विश्लेषणः, विकर्षणः, अभ्यासः, विरामः, स्तोमश्च ।

## 1.1.7.अथर्ववेदसंहितायाः परिचयः

कस्यापि यज्ञस्य परिपूर्णतायै चत्वारः ऋत्विजो भवन्ति । तेषु ब्रह्मा नाम ऋत्विक् अध्यक्षो भवति। यतो हि अयं सर्ववेदज्ञाता भवति। अस्य प्रधानकार्यं यज्ञस्य विधानानां निरीक्षणं सम्भावितत्रुट्याः मार्जनञ्च भवति। ऋग्वंदादयः त्रयो बेदाः आमुष्मिकं फलं प्रयच्छन्ति, परन्तु अथर्ववेदः आमुष्मिकेन सह ऐडिकमपि फलं प्रयच्छति। अथर्ववेदे शान्त्याः पौष्टिककार्यस्य च सम्पादनाय विधानानि उक्तानि सन्ति । अधर्ववेदस्य परिशिष्टे लिखितमस्ति "यस्य राज्ञः जनपदेऽधर्ववेदस्य ज्ञाता निवसति तस्य राष्ट्र निरुपद्रवो भूत्वा वृद्धिं गच्छति।" अनेन प्रकारेण ऐहिक-आमुष्मिक-लौकिक-पारलौकिकविषयाणां प्रतिपादकत्वेन अथर्ववेदः वैदिकसंहितासु स्ववैशिष्ट्यं भजते ।

अथर्ववेदस्य अध्ययनम् इह अपरिहार्यत्वेन अनिवार्यत्वेन चोक्तमस्ति। अथर्वसंहिताया अध्ययनं यः करोति स 'ब्रह्मा' इति नाम्ना उच्यते। 'ब्रह्मा' इति पदस्य अर्थ कुर्वता निरुक्तकारेण उक्तं- "ब्रह्मा सर्वविधः सर्व वेदितुमर्हति।" (नि-१/३/९) सर्वविधः इत्यनेन पदेन त्रयोविधासंयुक्तः इत्यर्थो बुध्यते । त्रयीविधा नाम ऋग्यजुस्सामेति वेदत्रयी। तस्मात् सर्ववदस्याध्ययनं असौ करोति, अत एव "ब्रह्मा परिवृद्धः श्रुततः" (नि १/३/९) इत्युक्तः। अर्थात् ब्रह्मा नाम ऋत्विक् , ऋत्विजां मध्ये परिवृद्ध नायकः, प्रभुः भवति। ब्रह्मणा सह अस्य वेदस्य सम्बन्धोऽस्ति । तस्मात् अथर्ववेदस्य महत्त्वं सर्वेषु वेदेषु महत्त्वपूर्णमस्ति ।

### अथर्ववेदस्य महत्त्वम्

कृष्णद्वैपायनो वेदव्यासः स्वशिष्येषु सुमन्तुनामकं शिष्यं अथर्ववेदं अध्यापितवान्। अथर्ववेदे जनसामान्यानां उपयोगिनां विशिष्टमन्त्राणां सङ्कलनमस्ति। सामान्यजनाः शान्तिपौष्टिककर्मणः, तुलापुरुषादियानस्य च महती आवश्यकताम् अनुभवन्ति। तेषां समस्ताभिचारिकक्रियाणां विधानानि अत्र उक्तानि सन्ति। भौतिकविज्ञानस्य, भैषज्यविज्ञानस्य च सिद्धान्तानां विशिष्टसङ्कलनमथर्ववेदेऽस्ति। अनेकविधरोगस्य,

शारीरिकप्रतीकारस्य, औषधादौनाज्य विषये वैज्ञानिकतथ्यानां ज्ञानम् अस्मिन् वेदे प्राप्यते। अत्र अनेकानि सूक्तानि-भैषज्यसूक्तम्, आयुष्यसूक्तम्, प्रायश्चित्तम्, स्त्रीकर्माणि, राजकर्माणि, पृथिवीसूक्तम्, ब्रहाण्यानि इत्यादीनि लौकिकविषयप्रतिपादकानि सन्ति। अनेन नेदं सिध्यति यदयं वेदः यज्ञविधानस्य उपेक्षां करोति। अपितु यज्ञस्य सम्बन्धेऽभिचारेण सह विशेषरूपेण प्रतिष्ठतोऽस्ति । अस्य परमोद्देश्यं यद् स्वर्गप्राच्या सह सांसारिकाभ्युदयः शत्रूणां पराजयः च स्यात्। अनेन प्रकारेण अथर्ववेदे याज्ञिकभावनायां विकासक्रमस्यैकः परिचयोऽपि प्राप्यते। एवंविधप्रत्ययानां परिचयार्थं अथर्ववेदः मनुष्याणामितिहासे सर्वाधिकप्राचीन ग्रन्थरत्नमस्ति । अर्थात् याज्ञिकविधान- व्याख्यानेन सह यज्ञकर्तॄणां मनुष्याणाम् इतरसमस्यानां समाधानम् अस्य मुख्यं लक्ष्यम्। तस्मात् वैदिकसाहित्ये अथर्ववेदस्य स्थानम् अतीव अनुपममस्ति ।

अथर्ववेदः परिचयः- 1. परिमाणम्-विंशतिकाण्डाः, 731 सूक्ताः, 6000 मन्त्राः । 2. शाखाः "नवधाथर्वणो वेदाः" । 1. पिप्पलादः, 2. शौनकः प्रमुखौ द्वावेवोपलभ्यते । 3. ब्राह्मणम्-एकमेव गोपथब्राह्मणम् । 4. आरण्यकम् नास्ति। 5. उपनिषदः- प्रश्नमुण्डक-माण्डूक्यादयः 31 उपनिषदः। 6. होता-ब्रह्मा, 7. आचार्यः-अङ्गिरसः (सुमन्त्रः), 8. उपवेदः अर्थवेदः। 9. विषयः-शान्तिपौष्टिकाभिचारमन्त्राः, 10. उपाधिः- ब्रहावेदः, अङ्गिरोवेदः, भैषज्यवेदः।

## पुनरावृत्तिः (Recap)

- वेदाः विश्वसाहित्यस्य प्राचीनतमाः ग्रन्थाः भवन्ति।
- वेदः द्विविधः – मन्त्ररूपो ब्राह्मणरूपश्चेति।
- मननात् मन्त्रः इत्युच्यते।
- वेदानां प्रतिपाद्यविषयः सामान्येन कर्ममींमासा एव।
- वेदः ऋग्वेदः यजुर्वेदः, सामवेदः अथर्ववेदः च चत्वारः।

- ऋग्वेदे दशमण्डलानि, अष्टौ अष्टकाः, 10580 ½ मन्त्राः सन्ति।
- यजुर्वेदः कर्मकाण्डप्रधानं मन्यते।
- स्वरबद्धरीत्या गेयात्मकर्चाणां समूहः साम संहिता।
- अथर्ववेदः आमुष्मिकेन सह ऐहिकमपि फलं प्रयच्छति

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.कति वेदाः सन्ति ?

**2.**यज्ञस्याध्यात्मिकं रूपं विवेचयन्तः वेदभागानां नाम किम्?

3. भागवते वेदाः किं रूपेण स्तूयते?

4.ब्राह्मणभागः केषां उपयोगी भवति ?

5.उपनिषद्भागाः केषां उपयोगी भवति ?

6.भारतीयपण्डितानां मते ऋषयः वैदिकमन्त्राणां के सन्ति ?

7.छन्दोबद्धानां मन्त्राणां नाम किम् ?

8.ऋग्वेदे कति मन्त्राः सन्ति ?

9.कर्मकाण्डप्रधानः वेदः कः ?

10.यजुर्वेदस्य कति भेदः अस्ति ?

11.बृहदारण्यतकोपनिद् कस्मिन् वेदे अन्तर्भवति ?

12.सामवेदस्य ऋत्विक् केन नाम्ना ज्ञायते ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

**(Answer the following questions in one or two sentences)**

1.वेदेषु भागानां नामानि लिखत ।

2.वेदाः कति सन्ति ?

3.वेदानां प्रतिपाद्यविषयाः के ?

4.वेदानां पाठप्रकाराः के ?

5.ऋग्वेदस्य विभजनं लिखत।

6.यजुर्वेदस्य भेदान् लिखत।

7.सामवेदस्य द्वौ भागौ कौ ?

8.ब्रह्मा नाम ऋत्विजः प्रधानकार्यं किम् ?

## एकैकया खण्डिकया उत्तराणि लिखत।

## (Answer the following questions in a paragraph)

1.वेदानां अपौरुषेयत्वम् विशदयत।

2.ऋग्वेदस्य मण्डलक्रमं विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1.चतुर्वेदान् संक्षिप्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1.चत्वारः

2.आरण्यकानि

3.निगमकल्पतरू

4.गृहस्थानाम्

5.संन्यस्तानाम्

6.द्रष्टारः

7.ऋक्

8.10580 ½

9.यजुर्वेदः

10.द्वौ

11.सामवेदे

12.उद्गाता

## सूचनाग्रन्थाः


1.ऋग्वेदसंहिता सायणभाष्येण सहितः, वेदसंशोधकमण्डल, तिलकस्मारकभवन्, पूने-2,1933

2.कृष्णयजुर्वेदसंहिता सायणभाष्येण सहितः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, पूने, 1940

3. सामवेदसंहिता, सायणभाष्येण सहितः, मुन्शी राममनोहरलाल प्रकाशन्,प्र.लि.नवदेल्ली, 1983

4. अथर्ववेदसंहिता, सायणभाष्येण सहितः, शङ्कर पाण्डुरङ्गपण्डितेन संशोधनं, मुम्बई

5. संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

6. ऋक्सूत्रसन्दर्शिका–बालगोविन्द झा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2012)

7. वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2016)


SGOU

# Unit 2

# संहिताः

## उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- संहिता-ब्राह्मण-आरण्यकानां ज्ञानं प्राप्नोति।
- उपनिषदां ज्ञानम्।

## प्राग्व्यपेक्षाः (Pre requisites)

मन्त्राणां समूहः संहिता । वैदिकवाङ्मयस्येतिहासे मन्त्रसमुदाय एवाऽत्र संहितापदेन व्यवहृतः । परः सन्निकर्षः संहिता इत्यनेन व्याकरणशास्त्रमतेन वर्णानाम् अत्यन्तसन्निधिः संहिता संज्ञः स्यात्। पदपाठे मन्त्रस्यैकैकं पदं पृथक् क्रियते। व्याकरणदृष्ट्या योग्यपदसमूहानां संज्ञा संहिता अस्ति। मन्त्राणां समूहो वेदे प्राप्यते। वेदशब्दस्यार्थे मन्त्रब्राह्मणयोः वेदनामधेयमिति प्रसिद्धम्, इत्यनेन संहिता इत्यस्य भागद्वयं कर्तुं शक्यते मन्त्ररूपो ब्राह्मणरूपश्च। मन्त्ररूपो संहिता ऋग्वेदसंहिता, यजुर्वेदसंहिता, सामवेदसंहिता, अथर्ववेदसंहिता इत्यादयस्सन्ति । ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य भाष्यरूपा एव। अयं ब्राह्मणभागः यागादीनां स्वरूपाणां व्याख्यां करोति । विधिविनियोगादीनां विधानानि ब्राह्मणेषु प्रतिपादितानि सन्ति। मन्त्राणामुपलब्धिः वेदेषु भवति। तेषां मन्त्राणां प्रयोगः कुत्र भविष्यतीति निर्देशाः ब्राह्मणग्रन्थेषु प्राप्यन्ते। ब्राह्मणशब्दस्य नैके अर्थाः प्रतिपादितास्सन्ति। तेष्वर्थेषु एकोऽर्थः यज्ञ अस्ति। वृत् वर्धने धातोः निष्पन्नस्य ब्राह्मणमिति पदस्यार्थो विद्यते

वर्धनं, विस्तारो वितानो वा। ब्राह्मणग्रन्थाः भागत्रये विभक्तास्सन्ति। प्रथमो भागः ब्राह्मणमिति, द्वितीयो भाग आरण्यकमिति तृतीयो भागः उपनिषदिति च।

## प्रधानांशाः/प्रधानपदानि (Key words)

सूक्तानि, संहिता, मन्त्रसमुदायः, पदपाठः, मन्त्ररूपः, ब्राह्मणरूपः, व्याख्या, ऋग्संहिता, यजुःसंहिता. सामसंहिता, अथर्वसंहिता।

## विशदीकरणम् (Discussion)

मन्त्राणां समूहः संहिता । वैदिकवाङ्मयस्येतिहासे मन्त्रसमुदाय एवात्र संहितापदेन व्यवहृतः। परः सन्निकर्षः संहिता इत्यनेन व्याकरणशास्त्रमतेन वर्णानाम् अत्यन्तसन्निधिः संहिता संज्ञः स्यात्। पदपाठे मन्त्रस्यैकैकं पदं पृथक् क्रियते। व्याकरणदृष्ट्या योग्यपदसमूहानां संज्ञा संहिता अस्ति। मन्त्राणां समूहो वेदे प्राप्यते। वेदशब्दस्यार्थे मन्त्रब्राह्मणयोः वेदनामधेयमिति प्रसिद्धम्, इत्यनेन संहिता इत्यस्य भागद्वयं कर्तुं शक्यते मन्त्ररूपो ब्राह्मणरूपश्च। मन्त्ररूपिठीसंहिता ऋग्वेदसंहिता, यजुर्वेदसंहिता, सामवेदसंहिता, अथर्ववेदसंहिता इत्यादयस्सन्ति ।महाभारते प्रतिपादितमस्ति वेदान् विव्यास यस्मात् स वेदव्यास इति स्मृतः। वेदेषु मन्त्राणां संकलनमस्ति। मन्त्रसंहितानां सङ्कलनं चतुर्विधतया सम्पादितम्। इत्यस्मात् कारणात् चतस्रः संहितास्सन्ति। ऋक्संहिता, यजुःसंहिता, सामसंहिता, अथर्वसंहिता च। एतदतिरिक्ताः अन्याः संहितास्सन्ति परंच वेदाः चत्वार एव स्मृतास्सन्ति । बहवृक्प्रातिशाख्ये प्राप्यते विद्यते धर्मादयः पुरुषार्था वैस्ते वेदाः। सायणेन उक्तम् अपौरुषेयं वाक्यं वेद इति। इष्टप्राप्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयति स वेद इति भाष्यभूमिकायामुक्तमस्ति । तस्य प्रमाणं प्राप्यते-

**प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।**

**एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ।**

सिद्धान्तकौमुद्यां प्राप्यते-

**सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारिणे ।**

**विन्दते विन्दति प्राप्ती श्यन्तुक्रश्नम्शेष्विदं क्रमात् ।।**

अत्र सत्तात्मकोऽयों विद्यते सत्तां गृह्णाति वस्तु अनेन इति वेदोः वेतेः। ज्ञानात्मकोऽर्थः विदन्त्येभिः धर्मब्रह्मणि क्रिया ज्ञानमयं ब्रह्म वा इति वेदो विद्यते । विचारात्मको ऽर्थ विन्ते विचारयति धर्मब्रह्मणि कियाज्ञानमयं ब्रह्म वा इति वेदो विद्यते। लाभात्मको ऽर्थ विद्यन्ते स्वरूपं लभन्ते वस्तु अनेन इति वेदो विद्यते । स्वामीदयानन्देन प्रतिपादितम् विदन्ति जानन्ति विद्यन्ते भवन्ति, विन्ते विचारयति, विन्दन्ते लभन्ते सर्वे मनुष्याः सत्विद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति, ते वेदाः।

वेदः इत्यनेन पदेन ऋग्यजुषादिपद्यगद्यगीतिनिवद्धस्य ग्रन्थात्मकस्य पदार्थस्यावबोधो भवति। शतपथब्राह्मणे प्राप्यते यदेतन्मण्डलं तपति तन्महदुक्तम्, ता ऋचः स ऋचर्चा लोकः। यदेतदर्चिर्दीप्यते, तन्महाव्रतम्, तानि सामानि स साम्नां लोकः। अथ य एष एतस्मिन् मण्डले पुरुषः सोऽग्नि तानि यजूंषि, स यजुषां लोकः। सैषा त्रय्येव विद्या तपति। अत्र विद्यात्रयस्य वर्णने सति प्राप्यते अग्ने ऋग्वेदः, वायोः यजुर्वेदः, सूर्यात्सामवेदः। वेदानां प्रयोगाः यज्ञेषु कियन्ते। चतुर्णां वेदानामनुसारेण यज्ञेषु चत्वारो प्रधानऋत्विजः भवन्ति। येषां नामानि होता, अध्वर्युः, उद्गाता, ब्रह्मा च सन्ति। ऋग्वेदस्य ऋत्विक् होता भवति। यजुर्वेदस्य ऋत्विक् अध्वर्युः विद्यते। सामवेदस्य ऋत्विक् उद्गाता भवति। अथर्ववेदस्य ऋत्विक् ब्रह्मा अस्ति। एते सर्वे स्वीयेन वेदानुसारेण मन्त्राणां यज्ञावसरे प्रयोगं कुर्वन्ति । अत्र प्रमुखसंहितानां नामानीत्थं वर्तन्ते ।

### 1.2.1.ऋग्संहिता-

ऋग्वेदे दशमण्डलानि सन्ति। येषु मण्डलेषु अष्टाविंशत्योत्तरसहस्राणि सूक्तानि सन्ति। अत्र एकाशीत्युत्तरपंचशताधिकानिसहस्राणि ऋचस्सन्ति । अस्यां संहितायां समस्तमन्त्राणां रचना चतुर्दशषु छन्देषु अस्ति। शौनकस्य चरणव्यूहसूत्रानुसारेण ऋग्वेदस्य पंचशाखास्सन्ति। आसु शाखासु इदानीं शाकलशाखैव उपलब्धा ऽस्ति । ऋग्वेदस्य दशसु मण्डलेषु द्वितीयतः षट्मण्डलेषु एक एव ऋषि एवं तेषां वंशजानां वर्णनं प्राप्यते। अष्टममण्डले महर्षिकण्वसहित

तेषां परिवाराणां वर्णनमस्ति । प्रथमनवमदशममण्डलेषु प्रत्येकेषु सूक्तेषु भिन्नभिन्नऋषीणां तेषां वंशजानां च वर्णनं प्राप्यते। येषु ऋषिका अपि सन्ति ।

**1.2.2.यजुस्संहिता-**

अस्यां संहितायां यागविधिविषयाणां संबंधितानां कर्मकाण्डीयप्रक्रियाणां वर्णनमस्ति । अस्याः संहितायाः भेदद्वयं दृश्यते। शुक्लयजुर्वेदसंहिताकृष्णयजुर्वेदसंहिता च। शुक्लयजुस्संहितायाः शाखाद्वयं विद्यते। माध्यन्दिनीया काण्वीया च। माध्यन्दिनसंहितायाः प्रयोगः भारतवर्षस्योत्तरे प्रान्ते प्राप्यते, काण्वसंहितायाः प्रयोगः दक्षिणे भारते प्राप्यते। कृष्णयजुस्संहितायाः चतस्रः शाखास्सन्ति । तैत्तिरीयसंहिता, मैत्रायणीसंहिता, काण्वसंहिता कठसंहिता च। शुक्लयजुस्संहिता पद्यात्मिका । कृष्णयजुस्संहिता गद्यपद्यमिश्रिता ।

**1.2.3.सामसंहिता-**

सामवेदीयमन्त्राणां प्रयोगः च यज्ञादीनामवसरे उद्गाता करोति। महाभाष्ये लिखितमस्ति सहस्रवर्त्मा सामवेदः अर्थात् सामसंहितायाः सहस्रः शाखा आसन्। परं चेदानीं तिस्रः शाखाः प्राप्यन्ते। कौथुमराणायनीयाजैमिनीया चेति। कौथुमशाखायाः भागद्वयं प्राप्यते। पूर्वार्चिकमुत्तरार्चिकं च । उभयोः मन्त्रा ऋग्वेदात् संगृहीतास्सन्ति । सामवेदे पंचसप्ततिः पृथक्मन्त्रास्सन्ति। वस्तुतः सामवेदे मन्त्राणां गायनं भवति। ऋग्वेदस्य गीत्यात्मकानां ऋचा संग्रहः सामवेदेऽस्ति । अत्रोभयोरार्चिकयोः सम्मिलितानां मन्त्राणां संख्या पंचसप्तत्यधिकाष्टादशशतम् अस्ति ।

**1.2.4.अथर्वसंहिता-**

अथर्ववेदे अभिचारादीनामुपचारादीनां च मन्त्राणां संकलनमस्ति । मारणमोहनादिमन्त्रैस्सह औषधीनां प्रतिपादनमन्त्रा अप्यत्र सन्ति। अयं वेदः ऐहिकामुष्मिकयोः फलानां प्रदाता अस्ति। अस्य वेदस्य रचना यज्ञविधानार्थं नास्ति । यज्ञेषूत्पन्नानां विघ्नानां निवारणार्थमस्य वेदस्य प्रयोगो भवति। रचनादृष्ट्या ऋग्वेद इवास्ति अथर्ववेदः परं च प्रतिपाद्यदृष्ट्या उभयोर्मध्ये भेद अस्ति। अथर्ववेदः उपचारादीनां मन्त्रतन्त्रादीनां च वेदः कथ्यते। वेदस्यास्य

शाखाद्वयमुपलब्धमस्ति- शौनकशाखा पैप्पलादशाखा च। अनयोः शौनकशाखा एवं प्रसिद्धा अस्ति। अस्मिन् वेदे बहुसंख्यकाः मन्त्रा ऋग्वेदात् संगृहीतास्सन्ति ।

एतदतिरिक्तं तैत्तिरीयसंहिता, मैत्रायणीसंहिता, कठसंहिता, कपिष्ठलसंहिता च सन्ति ।

**सांस्कृतिकं महत्त्वम्-**

वैदिकसंहिताः भारतीयसंस्कृतेः मूलोद्गमस्थानानि प्रतिपादितानि सन्ति। भारतीयसंस्कृतेः यथार्थज्ञानं संहिताभ्यः प्राप्यते। मनुमतमस्ति प्राचीने काले वस्तूनां नामानि मानवीयकर्त्तव्यानां च निर्धारणं वेदैः सम्पादितमासीत् । लोकमान्यतिलकमहोदयानां मतेन वेदप्रामाण्यस्यानुगमनं सनातनसंस्कृतेः मुख्यलक्षणमस्ति। यज्ञानां सम्पादनविधानम्, नैकेषां देवानां पूजनम्, निष्कामभावेन कर्मणां सम्पादनम्, ईश्वरस्य सर्वव्यापकता, ज्ञानकर्ममार्गयोः समन्वयः, भौतिकविचारेष्वनास्था, जन्मजन्मान्तरेषु विश्वासः, जीवनस्योद्देश्यं, मोक्षस्य प्राप्तिः इत्यादीनां ज्ञानं वैदिकसंहिताभिः प्राप्यते ।

**शास्त्रीयं महत्त्वम्-**

वेदात् सर्वं प्रसिद्ध्यतीति वाक्येनेवमुक्तं सर्वासां विद्यानां स्रोतांसि वैदिकसंहितासु सन्ति । संहितासु दार्शनिकसिद्धान्तानि, राजनीतिशास्त्रम्, समाजशास्त्रम्, मनोविज्ञानम्, आयुर्वेदशास्त्रम्, गणित-भौतिकी-रसायनशास्त्रम्, वनस्पतिशास्त्रम्, जन्तुविज्ञानम्, प्रौद्यौगिकीज्ञानम्, वृष्टिविज्ञानम्, भूगर्भविज्ञानम्, अर्थशास्त्रम्, नाट्यशास्त्रम्, काव्यशास्त्रम्, कामशास्त्रम् तथा विविधानां कलानां शतशः मन्त्राः वर्णिताः सन्ति ।

**आचारादीनां ज्ञानम्-**

समस्तानां मानवानां कर्तव्यबोधाय प्रामाणिकाः ग्रन्थाः सन्ति वेदाः। अत्र कर्त्तव्याकर्त्तव्यानां यथास्थानं विस्तृतं वर्णनं प्राप्यते। अत्र गुरुशिष्ययोः कर्त्तव्याकर्त्तव्यम्, मातापित्रोः कर्त्तव्याकर्त्तव्यम्, पतिपत्न्योः कर्तव्याकर्त्तव्यम्, पितापुत्रयोः कर्त्तव्याकर्तव्यम् विशदं

विचारितमस्ति। एतदतिरिक्तं परोपकारिदिविषये, सत्कर्मादिविषये, अतिथिसत्कारादिविषये संहितासु विस्तृतं विवरणं प्राप्यते।

**राजनीतिकमहत्त्वम्-**

संहितासु राजनीतिशास्त्रसंबंधिनां सामग्रीणामुपलब्धिः विशदतया प्राप्यते। अत्र राज्याणां स्वरूपाणि, उद्देश्यानि, कार्याणि, विविधान्यंगानि, राज्ञः निर्वाचनम्, सैन्यव्यवस्था, दण्डविधानानि, करनिर्धारणानि इत्यादीनि प्रदत्तानि सन्ति।

**ऐतिहासिकं महत्त्वम्-**

संहितासु ऐतिहासिकमहत्त्वानां सामग्रीणामुपलब्धिः प्रचुरमात्रायामस्ति। यथा नदीनां नामानि, दाशराज्ञयुद्धः, पंचजनाः,इत्यादीनां जातीनां विवरणं प्राप्यते । एतदतिरिक्तं भाषावैज्ञानिकं महत्त्वम्, काव्यशास्त्रीयं महत्त्वम्, साहित्यिकं महत्त्वम्, वैज्ञानिकतत्वानां महत्त्वं च प्रतिपादितमस्ति।

**संहिताभाष्यकाराः**

अस्मिन् संहिताभाष्यकाराणां विषये विवेचनं भविष्यति । संहितानां चिविधाः भाष्यकारास्सन्ति। यथा- ऋक्संहितायाः भाष्यकाराः विद्यन्ते स्कन्दस्वामिनः, नारायणमहोदयाः, माधवभट्टमहोदयाः, वेंकटमाधवमहोदयाः, आचार्याः धानुष्कयज्वा महोदयाः, आनन्दतीर्थमहोदयाः, आत्मानन्दाचार्याः, सायणाचार्याश्च। सामसंहितायाः आचार्याः सन्ति माधवमहोदयाः, गुणविष्णुमहोदयाः भरतस्वामिमहोदयाश्च ।

शुक्लयजुस्संहितायाः माध्यंदिनसंहितायाः भाष्यकारास्सन्ति उन्चटमहोदयाः महीधरमहोदयाश्च । काण्वसंहितायाः भाष्यकारास्सन्ति हलायुधमहोदयाः, सायणाचार्याः, अनन्ताचार्याः, आनन्दबोधभट्टोपाध्यायमहोदयाश्च। कृष्णयजुर्भाष्यकारास्सन्ति-

कुण्डिनाचार्याः, आचार्यधुराः, भट्टभास्कराचार्याश्च। अथर्वसंहितायाः भाष्यकाराः भवस्वामिमहोदयाः, गुहदेवाचार्याश्च सन्ति। भाष्यकारेष्वेषु कतिपयानां भाष्याकाराणामत्र विशदं विवेचनं भविष्यति। अन्येषां भाष्यकाराणां विवरणं तासु-तासु संहितासु भविष्यन्ति ।

## पुनरावृत्तिः (Recap)

- मन्त्राणां समूहः संहिता ।
- ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदसंहिताः ।
- वेदेषु मन्त्राणां संकलनं अस्ति।
- ऋग्वेदे दशमण्डलानि सन्ति।
- यजुर्संहितायां यागविधिविषयकाणां संबन्धीनां कर्मकाण्डीयप्रक्रियाणां वर्णनमस्ति।
- सामवेदीयमन्त्राणां प्रयोगः यज्ञादीनामवसरे उद्गाता करोति।
- अथर्ववेदे अभिचारादीनामुपचारादीनां च मन्त्राणां संकलनमस्ति।
- भारतीयसंस्कृतेः ज्ञानं संहितासु लभते।
- संहितासु आचारादीनां, सर्वासां विद्यानां, राजनीतिकानां ज्ञानं च लभते।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.संहिता नाम का ?

2.ऋग्वेदस्य ऋत्विक् कः?

3.ब्रह्मा कस्य वेदस्य ऋत्विक् भवति?

4.कस्मिन् वेदे दशमण्डलानि सन्ति ?

5.माध्यन्दिनसंहितायाः प्रयोगः कुत्र प्राप्यते?

6.कृष्णयजुर्वेदसंहितायाः कति शाखाः सन्ति ?

7.शुक्लयजुर्वेदसंहिता कीदृशी अस्ति?

8.कस्मिन् वेदे मन्त्राणां गायनं भवति?

| |
|---|
| 9.कः वेदः ऐहिकामुष्मिकयोः फलानां प्रदाता भवति? |
| 10.भारतीयसंस्कृतेः यथार्थज्ञानं काभ्यः प्राप्यते ? |

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

**(Answer the following questions in one or two sentences)**

| |
|---|
| 1.संहितापदेन किं व्यवहृतम् ? |
| 2.यजुस्संहितायाः भेदद्वयं किम् ? |
| 3.शुक्लयजुर्वेदसंहितायाः शाखाद्वयस्य नामानि लिखत। |
| 4.सामसंहितायाः शाखाः काः ? |

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

| |
|---|
| 1.संहितायाः महत्त्वं प्रतिपादयत। |
| 2.यजुस्संहितां विशदयत। |
| 3.सामसंहितां विशदयत। |

## निर्दिष्टाभ्यासः (Assignments)

| |
|---|
| 1.वैदिकसाहित्ये संहितायां स्थानं विशदयत । |

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

| |
|---|
| 1.मन्त्राणां समूहः |
| 2.होता |
| 3.अथर्ववेदस्य |
| 4.ऋग्वेदे |
| 5.भारतवर्षस्योत्तरे |

| |
|---|
| 6.चतस्रः |
| 7.पद्यात्मिका |
| 8.सामवेदे |
| 9.अथर्ववेदः |
| 10.संहिताभ्यः |

## सूचनाग्रन्थाः


1.ऋग्वेदसंहिता सायणभाष्येण सहितः, वेदसंशोधकमण्डल, तिलकस्मारकभवन्, पूने-2,1933

2.कृष्णयजुर्वेदसंहिता सायणभाष्येण सहितः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, पूने, 1940

3. सामवेदसंहिता, सायणभाष्येण सहितः, मुन्शी राममनोहरलाल प्रकाशन्,प्र.लि.नवदेल्ली, 1983

4. अथर्ववेदसंहिता, सायणभाष्येण सहितः, शङ्कर पाण्डुरङ्गपण्डितेन संशोधनं, मुम्बई

5. संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

6.ऋक्सूत्रसन्दर्शिका–बालगोविन्दझा (चौखम्पासुरभारतीप्रकाशन्, वाराणसी, 2012)

7.वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा (चौखम्पासुरभारतीप्रकाशन्, वाराणसी, 2016)

# Unit 3

## ब्राह्मणं आरण्यकं च

### उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- संहिता-ब्राह्मण-आरण्यकानां ज्ञानं प्राप्नोति।
- उपनिषदां ज्ञानम्।

### प्राग्व्यपेक्षाः (Pre requisites)

ब्राह्मणरूपो वेदभागस्तु संहिताभागस्य भाष्यरूपमेव। अयं ब्राह्मणभागः यागादीनां स्वरूपाणां व्याख्यां करोति । विधिविनियोगादीनां विधानानि ब्राह्मणेषु प्रतिपादितानि सन्ति। मन्त्राणामुपलब्धिः वेदेषु भवति। तेषां मन्त्राणां प्रयोगः कुत्र भविष्यतीति निर्देशाः ब्राह्मणग्रन्थेषु प्राप्यन्ते। ब्राह्मणशब्दस्य नैके अर्थाः प्रतिपादितास्सन्ति । तेष्वर्थेषु एकोऽर्थः यज्ञ अस्ति। वृत् वर्धने धातोः निष्पन्नस्य ब्राह्मणमिति पदस्यार्थो विद्यते वर्धनं, विस्तारो वितानो वा। ब्राह्मणग्रन्थाः भागत्रये विभक्तास्सन्ति। प्रथमो भागः ब्राह्मणमिति, द्वितीयोभाग आरण्यकमिति तृतीयोभाग उपनिषदिति च।

### प्रधानांशाः/प्रधानपदानि (Key words)

ब्राह्मणं, ब्राह्मणानां त्रेधा विभागः, कर्मसंपादननियमः, गद्यमयी, ऐतरेय-शाङ्खायन- शतपथ-तैत्तिरीय- ताण्डल- षड्विंश- सामविधान- आर्षेयब्राह्मणम्।

## विशदीकरणम् (Discussion)

शास्त्रेषु ब्राह्मणं ब्राह्मणः इत्युभयविधमपि पदं प्राप्यते। तत्र अर्थोऽपि भिन्नः। पुल्लिंगः ब्राह्मणः शब्दः, जातिवाचकः, नपुंसकलिंगश्च ब्राह्मणमिति शब्दः ग्रन्थवाची।

अस्य इदं तात्पर्य यत् ग्रन्थवाचकः ब्राह्मणशब्दः नपुंसकलिंगे भवति। अत एव मेदिनीकोषकारेण वेदभागस्य ब्राह्मणपदस्य प्रयोगः नपुंसकलिंगे कृतः। यथा "ब्राह्मणं ब्रह्म संघाते वेदभागे नपुंसकम्" ग्रन्थार्थे ब्राह्मणशब्दस्य प्रयोगः बहुषु शास्त्रेषु समवलोक्यते। परञ्च अत्र उदाहरणार्थ तैत्तिरीयश्रुतिवचनं सादरं प्रस्तौति । यथा- एतद् ब्राह्मणान्येव पञ्च हवींषि" अत्रत्य ब्राह्मणपदं ग्रन्थवाचकः । तच्च ग्रन्थवाचकं ब्राह्मणमितिपदमत्र परिचयार्थ व्याख्यायते। पुनरत्र जिज्ञासा भवति यत् किं नाम ब्राह्मणम् ? तत्र प्राथम्येन इदमेव आचार्येण उच्यते यत् "मन्त्रब्राहाणयोर्वेदनामधेयम्" इत्याचार्यवचनेन इदं स्पष्टं भवति, यद् ब्राह्मणमिति पदेन वेद एव गृह्यते। पुनः अन्न सन्दिहयते यद् ब्राह्मणम्" इति पदेन वेदो गृह्यते चेत् वेद पदेन किं गृह्यते? यतो हि इतः प्राक् उक्तमस्ति यत् चत्वारो वेदा भवन्ति । अस्य समाधानं एवं क्रियते। वेद इति संज्ञा मन्त्रब्राह्मणयोरुभयोरेव भवति। न केवलं यत्र मन्त्रभागाः सन्ति तस्य ग्रन्थस्य वेद इति नाम, अपितु ब्राह्मणग्रन्थानामपि वेदत्वं स्वीक्रियते । ब्राह्मणभागस्य वेदत्वे किञ्चिदुच्यते ।

ब्राह्मणं हि वेदनिर्दिष्टकर्मप्रतिपादकग्रन्थः । वेदव्याख्यातृत्वादेव ब्राह्मणस्यापि वेदत्वम् । अधिकांशब्राह्मणसाहित्यं गद्यात्मकं विद्यते । ब्राह्मणप्रतिपाद्यानां विषयाणां त्रेधा विभागः कृतोऽस्ति-विधिभागः अर्थवादः उपनिषद् च । विधिभागे यज्ञविषयकप्रयोगात्मकनियमानां वर्णनमस्ति । अर्थवादे उपाख्यानकथादिमाध्यमेन प्रायोगिकरहस्यस्य सूक्ष्मतापरिज्ञानं सम्पाद्यते । उपनिषद्भागे आध्यात्मिकदार्शनिकतत्त्वानि मीमांस्यन्ते । विशेषतो ब्रह्माणग्रन्था गृहस्थाश्रमोपयोगिनः । अपरतश्च ब्रह्मप्रतिपादनाद ब्राह्मणानां ब्राह्मणत्वम् । यज्ञप्रतिपादनमेव ब्रह्मप्रतिपादनम् । 'एष वै प्रत्यक्षं यज्ञो यत्प्रजापतिः' (शतपथ० ४/३/४/३) प्राणिषु मन्त्राणां कर्मणां विनियोगानाञ्च व्याख्योपस्थापिताऽस्ति । यथोक्तं -

"नैरुक्त्यं यस्य मन्त्रस्य विनियोगः प्रयोजनम् ।
प्रतिष्ठानं विधिश्चैव ब्राह्मणं तदिहोच्यते ।।"

एवमेष-

"हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः ।
परिक्रिया पुराकल्पो व्यवहारणकल्पना ।
उपमानं दशैते तु विधयो ब्राह्मणस्य तु ॥"

तत्र विधिर्नाम कर्मसम्पादननियमः, विनियोगो मन्त्राणां प्रयोगनिर्देशः, हेतुः कर्मप्रवर्तनप्रयोजनम्, अर्थवादः प्ररोचनात्मकविषय उपाख्यानादिः । निरुक्तिर्नाम वैदिकशब्दानां निर्वचनोद्देशः । आख्यानं नाम प्ररोचककथानकम् ।

ब्राह्मणेषु भाषा गद्यमय्येव किन्तु तत्र प्रौढता परिनिष्ठितता च स्पष्टं दृश्यते । तत्र नवीनानां शब्दानां धातूनाञ्च प्रयोगोऽपि दृश्यते ।

वेदानां प्रत्येकं पृथक् पृथक् ब्राह्मणम् । तत्र ऋग्वेदस्य ऐतरेयशाङ्ङ्ख्यानाख्ये, शुक्लयजुर्वेदस्य शतपथाख्यं, कृष्णयजुर्वेदस्य तैत्तिरीयाख्यं, सामवेदस्य ताण्ड्यषड्विंश-साम-आर्षेय-दैवत-उपनिषद् संहितोपनिषद्वंश-जैमिनीयाख्यानि, अथर्ववेदस्य गोपथाख्यञ्च ब्राह्मणानि समवाप्तानि । एषां सङ्क्षेपेण परिचयोऽत्र दीयते।

**ऐतरेयब्राह्मणम् -** ऋग्वेदसम्बद्धमिदं ब्राह्मणं प्राधान्येन सोमयागप्रतिपादनपरम्। अष्टासु पञ्चिकासु विभक्तं यत्र प्रतिपञ्चिकं पञ्चाध्याया इति चत्वारिंशदध्यायाः । अस्मिन् प्रथमाद्वितीययोरग्निष्टोमविधानं, तृतीयचतुर्थौ प्रातःसायंसवनविधिरग्निहोत्रविधानञ्च, पञ्चम्यां द्वादश यागविधिः, षष्ठ्यां सोमयागविधानं, सप्तम्यां राजसूयविधिः अष्टम्यामिन्द्राभिषेकपूर्वकं राज्याभिषेकविधिः । एषु हि प्राधान्येन विष्णुः स्तूयते तन्महत्वं प्रतिपाद्यते च । ग्रन्थमिदमधिकृत्य सायणेन कृतं भाष्यं प्रसिद्धं यदानन्दाश्रमतः प्रकाशितम् । तथैव षड्गुरुशिष्यस्य लघुव्याख्याऽपि । गोविन्दस्वामिनाऽपि अस्य भाष्यं प्रणीतमस्ति ।

**शाङ्ङ्खायनब्राह्मणम् -**कौषीतक्यपरपर्यायमिदं ब्राह्मणमृग्वेदीयमेव । इयं त्रिंशदध्यायात्मकं यत्र प्रत्यध्यायं सप्तदशपर्यन्तखण्डाः अस्यापि प्रतिपाद्यविषयस्तु ऐतरेयवत् सोमयाग एव । तस्यापि विस्तृतरूपेण प्रतिपादनमस्य वैशिष्ट्यम् । अत्र हि अग्न्याधानविधिः, प्रातःसायंसवनविधानम्, अग्निहोत्र-दर्शंपूर्णमास-चातुर्मास्येष्टयः, रुद्रस्य माहात्म्यं, शिवव्रतविधानं, विष्णोः श्रेष्ठत्वप्रतिपादनं च मुख्यविषयाः । अत्र चोदीच्यानां परिनिष्ठितत्वं, गोत्रमहत्त्वप्रतिपादनञ्च प्रकीर्णविषयाः ।

**शतपथब्राह्मणम् -** ब्रह्माणमिदं शुक्लयजुर्वेदसम्बद्धं शताध्यायेषु विभक्तत्वात्तथाख्यम् । अस्य च प्राधान्येन प्रतिपाद्यविषयो यज्ञानुष्ठानमेव । इदं सम्प्रति समुलब्धब्राह्मणेषु प्राचीनतमं शुक्लयजुर्वेदस्योभयशाखासम्बद्धम् । माध्यन्दिनशाखासम्बद्धेऽस्मिन् चतुर्दशकाण्डानि शतमध्यायाः अष्टषष्टि प्रपाठकाः ४३८ मितब्राह्मणानि ७३२४ मितकण्डिकाश्च । काण्वे तु सप्तदश काण्डानि चतुरुत्तरशतमध्यायाः ४३५ मितब्राह्मणानि, ६८०६ मितकाण्डिकाश्च । अत्र सामान्ययज्ञविधानप्रतिपादनादतिरिक्तः पुरुषाश्वसर्वपितृमेधादीनामपि सप्रपञ्चवर्णनं लभ्यते । सरसशैल्योपाख्यानमुखेनाध्यात्मिकरहस्यविवेचनमस्य वैशिष्ट्यम् । अत्र हि प्रथमकाण्डे हविर्यज्ञः पूर्णमासदर्शयागी, द्वितीयकाण्डे अग्न्याधेय-पुनराधेय-अग्निहोत्र-अग्न्युपस्थान-पिण्डपितृयज्ञ-आग्रयणेष्टि-दाक्षायणयज्ञ-चातुर्मास्यानि,तृतीयेऽग्निष्टोमश्चतुर्थेऽपि, पञ्चमे राजसूयः, षष्ठे चयनं सप्तमेऽपि, अष्टमे चितिरेव, नवमे सञ्चितिः, दशमेऽग्निरहस्यम्, एकादशेऽग्न्याधानादिकालाः, द्वादशे दीक्षादिक्रमः, त्रयोदशेऽश्वमेधादिनिरूपणं, चतुर्दशे धर्माद्युपनिषन्निरूपणमिति प्रतिकाण्डविषयनिरूपणम् ।

**तैत्तिरीयब्राह्मणम्-** कृष्णयजुर्वेदसम्बद्धे ब्राह्मणेऽस्मिस्त्रीणी काण्डानि, प्रथम-द्वितीयकाण्डयोर्द्वादशाध्यायास्तृतीये तु त्रयोदशेति सप्तत्रिंशदध्यायाः । अत्र हि संहितायां

वर्णितानां यज्ञादीनां सविस्तरवर्णनेन सहैव तत्रावर्णितानामपि केषाञ्चिद्यज्ञानामपि प्रतिपादनं दृश्यते । प्रथमे काण्डेऽग्न्याधान-गवानयन-वाजपेय- सोमनक्षत्रेष्टिराजसूयादीनां वर्णनं, द्वितीयेऽग्निहोत्रसौत्रामणिबृहस्पतिसववैश्यादीनां प्रतिपादनं. तृतीये तु नक्षत्रेष्ट्यादीनां प्रतिपादनं, वैश्यक्षत्रियब्राह्मणानां ऋग्यजुःसामादिभ्य उत्पत्तिकथनं शूद्रस्य यज्ञानधिकारकयनञ्चेति प्राधान्येन विषयकमोऽत्र । अत्र हि वेदोपवर्णितज्यौतिषविषयस्य रहस्यमपि सप्रपवं वर्णितमस्ति ।

**ताण्ड्यब्राह्मणम्-** सामवेदसम्बद्धमिदं ब्राह्मणं पञ्चविंशाभिधया महाब्राह्मणाभिधया च संज्ञितमपि। सामवेदस्य ताण्डीसंहितासम्बद्धत्वेनेदं ताण्ड्यमुच्यते। पञ्चविंशत्यध्यायात्मकत्वात्पञ्चविंशब्राह्मणमपि । तथैवात्यन्तविस्तृतत्वान्महाब्राह्मणमपि। अत्र नानाविध-यज्ञानां विधिनिर्दिष्टोऽस्ति यत्र हि एकदिनसाध्यादारभ्य साहस्रवार्षिकयज्ञानामपि विधानयुक्तमस्ति । अत्र हि प्रथमाऽध्यायादारभ्य तृतीयाध्यायपर्यन्तं त्रिवृत्पञ्चदश-सप्तदशप्रभृतिस्तोमविष्टुतीनां विस्तृतं वर्णनमस्ति । चतुर्थपञ्चमयोर्गवानयनविधिर्निरूपितः । एवमेव षष्ठे ज्योतिष्टोमोक्थ्याहिरात्राणां सप्तमे प्रातः सवनस्याष्टमे माध्यन्दिनसवनस्य नवमे सायंसवनस्य रात्रिपूजायाश्च विधिः कथितः। दशमाध्यायादारभ्य पञ्चदशाध्यायपर्यन्तद्वादशाहयागानां विधानं वर्णितमस्ति। तथैवैकदिनादारभ्य दशदिनपर्यन्तसाम्नामपि तत्र वर्णनम्। षोडशादारभ्यैकोनविंशाध्याय पर्यन्तमेकाहयज्ञविधानविंशादारभ्यद्वाविंशतितमाध्यायपर्यन्तमहीनयज्ञविधानं शेषेषु साम्नः सोमयागस्य च विधानं निर्दिष्टमस्ति । तत्र तत्र साम्नो महत्त्वप्रतिपादकोपाख्यानामपि प्रस्तुतिर्दृश्यते ।

**षड्विंशब्राह्मणम्** - ब्राह्मणमिदमपि सामवेदसम्बद्धमेव पञ्चविंशब्राह्मणपरिशिष्टरूपत्वात् षड्विंशसंज्ञया ज्ञातम् । अत्र हि पञ्च प्रपाठकाः प्रतिप्रपाठकमवान्तरभेदाश्च । अत्र हि प्राधान्येन भूकम्प-अकालपुष्पफलागमादिविविधोत्पातशान्तिविधिर्णितः। तथैव सन्ध्यादि कालश्चात्रोपवर्णितः ।

**सामविधानब्राह्मणम् -** इदमपि सामसम्बद्धमपि इतरब्राह्मणापेक्षया भिन्नविषयत्वम् । अत्र हि प्राधान्येन विविधोपद्रवशान्त्यर्थं सामगायनेन सहैव तत्तदनुष्ठानादीनामपि विधानमस्ति। इदं त्रिषु प्रकरणेषु विभक्तम् । तत्र प्रथमे विविधानां व्रतानां समुल्लेखः, द्वितीये पुत्रप्राप्तिनिमित्तकविविधानुष्ठानानां निर्णयः, तृतीये वैभवप्राप्तिनवगृह-प्रवेशादीनामनुष्ठानविधिनिर्दिष्टः । अत्र हि पापवत्प्रायश्चित्तादीनामपि विधानं निर्दिष्टमस्ति । इदं धर्मसूत्राणां पूर्वपीठका ।

**आर्षेयब्राह्मणम् -** ब्राह्मणमिदं सामसम्बद्धमितरापेक्षया लघु च । इदं त्रिषु खण्डेषु विभक्तं प्रतिखण्डमनेका कण्डिकाश्च । तत्र प्रथमे खण्डे षड्विंशकण्डिकाः सन्ति यत्र अग्नीन्द्रप्रजापतिसोमवरुणत्वष्ट्रङ्गिरसपूषसरस्वतीप्रभृतीनां सामवेदीयदेवतानां वर्णनमस्ति । द्वितीये एकादश कण्डिका यत्र हि छन्दसां देवतानां वर्णानाञ्च निरूपणं कृतमस्ति । भाषादृष्ट्यास्य खण्डस्येतरापक्षया महत्त्वम् ।

**उपनिषद्ब्राह्मणम् -** सामसम्बद्धे ब्राह्मणेऽस्मिन् दशप्रपाठकाः । अस्य हि द्वौ भेदौ मन्त्रब्राह्मणं छान्दोग्योपनिषद् च । मन्त्रब्राह्मणं तु द्वयोः प्रपाठकयोर्विभक्तमस्ति । छान्दोग्योपनिषत्तु सम्बद्धप्रकरणे वर्ण्यते ।

**संहितोपनिषद्ब्राह्मणम् -** सामवेदीयं ब्राह्मणमिदं पञ्चसु खण्डेषु विभक्तं प्रतिखण्डं सूत्रेषु च। प्रथमे खण्डे देवहू-वाक्-शवहू-अमित्तहूसंहितासंज्ञितानां गानसंहितानां स्वरूपं फलञ्चोपवाणितमस्ति । यत्र प्रथमा कल्याणप्रदाऽवशिष्टे द्वे मङ्गलप्रदे च कथिते । द्वितीयतृतीययोर्गानसंहिताविधेः स्तोमस्य, अनुलोम- प्रतिलोमादिविविधस्वराणां प्रतिपादनं दृश्यते । सामगानसंहितासम्बद्धत्वादिदं संहितोपनिषदभिधम् ।

**वंशब्राह्मणम् -** त्रिषु खण्डेषु विभक्तेऽस्मिन् सामवेदीये ब्राह्मणे सामवेदाचार्याणां परम्परा वर्णिताऽस्ति, येन तदभिधमपि ।

**जैमिनीयब्राह्मणम् -** इदं हि सामवेदीयं ब्राह्मणं बृहत्कलेवरं यागाद्यनुष्ठानविधिनिर्देशकञ्च ।**गोपथब्राह्मणम् -** ब्राह्मणमिदमथर्ववेदसम्बद्धम् । इदं हि पूर्वोत्तरभागयोर्विभक्तम् । तत्राद्य

पञ्चापरस्मिन् षट् प्रपाठकाः। प्रतिप्रपाठकं कण्डिकाश्च यासां सङ्ख्या २५८ मिताऽस्ति। प्रथमे हि प्रपाठके ओङ्कारस्य गायत्र्याश्च महिमा वर्णिताऽस्ति । द्वितीये हि ब्रह्मचारिणो धर्मा निरूपिताः। तृतीयचतुर्थयोरित्विजां कार्यविधिर्दीक्षा च वर्णिता। पञ्चमे संवत्सराणां विवेचनम् । अन्तिमे च अश्वमेघपुरुषमेधाग्निष्टोमादीनां विवेचनमस्ति । उत्तर- भागे विविधयज्ञानां तत्सम्बद्धोपाख्यानाञ्च समुल्लेखो दृश्यते।

इत्थं सुसमृद्धं ब्राह्मणसाहित्यं स्वप्रकृष्टगुणैर्वेदाभिधेयत्वं लभते । ब्रह्म यज्ञ एव । तेन यज्ञरूपब्रह्मप्रतिपादकत्वादिदं ब्राह्मणमिति।

**आरण्यकग्रन्थानां स्वरूपम्**

आरण्यकं ब्राह्मणग्रन्थानां पूरकमेव अस्ति। रचनाक्रमदृष्ट्या वैदिकसाहित्ये संहितानां तथा ब्राह्मणग्रन्थानां च अनन्तरम् आरण्यकानां स्थानं वर्तते। आरण्यकस्य मुख्यः प्रतिपाद्यविषयः यज्ञ-यागादिषु विद्यमानस्य आध्यात्मिकतथ्यस्य मीमांसा अस्ति। यज्ञीयानुष्ठाने दार्शनिकविचारोऽपि अस्ति। संहितामन्त्रेषु यस्याः गूढायाः विद्यायाः सङ्केतमात्रम् उपलब्धं भवति, तस्याः गूढविद्यायाः विस्तृतविश्लेषणं अत्र आरण्यकेषु विद्यते। एतेषां रहस्यभूतानामारण्यकाणामध्ययनार्थं एकान्तशान्तवातावरणम् एव उपयुक्तम् आसीत्। ग्रामाभ्यन्तरे अस्य अध्ययनं लाभप्रदं नासीत्। सायणाचार्यसम्मतौ अरण्ये पाठ्यत्वेन 'आरण्यकम्' इति अस्य नामकरणं सार्थकमस्ति। यथा-

**अरण्याध्ययनादेतद् आरण्यकमितीर्यते।**
**अरण्ये तदधीयीतेत्येवं वाक्यं प्रवक्ष्यते।।**

यज्ञस्य शरीरस्थानीयं स्थूलांशं विहाय सूक्ष्मां प्राणादिविद्यां अरण्यवासिभ्यः मुनिभ्यः वानप्रस्थिभ्यश्च बोधयितुं यद् वैदिकसाहित्ये प्रवर्तते तदेव आरण्यकसाहित्यमित्युच्यते। आप्टे महोदयानुसारेण आरण्यके ब्राह्मणैः सम्बद्धधार्मिकदार्शनिकलेखानां सङ्ग्रहाः सन्ति।

वस्तुतः कर्मकाण्डज्ञानकाण्डयोः समन्वयः आरण्यकेषु जातम्। ब्राह्मणसाहित्यस्य कर्मकाण्डं पूर्ववर्ति कृत्वा उपनिषदां च ज्ञानकाण्डं पश्चवर्ति विधाय तन्मध्यवर्तित्वेनारण्यक-

साहित्यं विलसन्ति। तया दृष्ट्या आरण्यकानि कर्मज्ञानयोः सन्धिकालीनाः रचनाः सन्ति। आरण्यकानां चिन्तनसरोवरे एव उपनिषदां कमलवनस्य विकासः जातः इति वक्तुं शक्यते। आरण्यकानां मुख्यविषयः यज्ञानां मूले स्थितानां आध्यात्मिकतत्त्वानां मीमांसा अस्ति।

**आरण्यकग्रन्थानां महत्त्वम्**

अस्मान् निवृत्तिमार्गं प्रति नेतुं आरण्यकग्रन्थानां महन्महत्त्वं वर्तते। आरण्यकाणां प्राचीनं नाम रहस्यमिति यदुच्यते, तत्र तेषामारण्यकाणां निवृत्तिमार्गानुसारिणी रहस्यात्मकता एव बोधिता भवति। महाभारतस्य कथनम् अस्ति यत् औषधिभ्यः यथा अमृतम् उद्धृतं तथैव वेदेभ्यः सारं समुद्धृत्य आरण्यकं प्रणीतम्। यथा-

**'नवनीतं यथा दध्नो मलयाच्चन्दनं यथा।**

**आरण्यकञ्च वेदेभ्य ओषधिभ्योऽमृतं यथा।।"**

वेदस्य यस्मिन् अंशे प्राणविद्यायाः प्रतीकोपासनायाश्च वर्णनमस्ति, तदेव अंशः आरण्यकं कथ्यते। सर्वेषु इन्द्रियेषु प्राणानां श्रेष्ठता आख्यायिकाद्वारा प्रतिपादिता अस्ति। यथा-

**'सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धः,**

**तद्यथायमाकाशः प्राणेन बृहत्या विष्टब्धः,**

**एवं सर्वाणि भूतानि आपिपीलिकाभ्यः**

**प्राणेन बृहत्या विष्टब्धानीत्येवं विद्यात्। "**

प्राणाः सर्वत्र व्याप्ताः सन्ति। 'सर्व हीदं प्राणेनावृतम्।' प्राणः विश्वस्य धारकः। अतः तदेव तस्य रक्षकः। प्राणेन एवं अन्तरिक्षस्य वायोः च सृष्टिः अभवत्। प्राणः पिताऽस्ति। अन्तरिक्षवायुः तस्य सन्ततिः। प्राण एवं ऋषिरूपः। ऐतरेयारण्यके प्राणविषये कथितमस्ति-

**'सर्वा ऋचः सर्वे वेदाः सर्वे घोषाः एकेव**

**व्याहृतिः प्राण एवः प्राण ऋच इत्येव विद्यात्।**

ब्राह्मणानां क्रियाकलापान् औपनिषदिकचिन्तनधाराभिः सह योजयति आरण्यकम्। कर्ममार्गात् ज्ञानमार्ग प्रापयितुं एते सुदृढाः सोपानभूताः वेदांशाः सन्ति। ब्राह्मणेषु मानवजीवनं प्रवृत्तिबहुलं क्रियते। किन्तु आरण्यकेषु निवृत्तिमार्गाश्रयणेन मानवजीवनस्य रहस्यम् प्रकटीक्रियते ।

**आरण्यकशब्दस्य व्युत्पत्तिः**

'आरण्यक' शब्दः 'अरण्य' शब्दे 'भव' अर्थे 'वुञ्प्रत्ययं प्रयुज्य व्युत्पन्नो भवति। सदाशिववामनआप्टेमहोदयः संस्कृतग्रेजीकोशे आरण्यकशब्दस्य व्याकरणसम्मतां व्याख्यां कृत्वा स्पष्टं कृतवान् यत्- "It (Aranyak) is one of a class of religious and philosophical writings (connected in the Brahmans) which are either composed in forests or must be studied there, E.G, ऐतरेयारण्यकं, बृहदारण्यकं and तैत्तिरीयारण्यकम्।'

अरण्येऽनूच्यमानत्वात् आरण्यकम्, अरण्ये अध्ययनादेव आरण्यकमुदाहृतम्। अरण्ये भवमिति आरण्यकम् (अरण्य+वुञ्)'। गृहस्थाश्रमिणां जीवने बहुविधयज्ञयागादीनां महत्त्वमधिकृत्य यथा ब्राह्मणानि प्रवृत्तानि, तथैव अरण्यवासिनां वानप्रस्थाश्रमिणां जीवने प्राणतत्त्वानामध्यात्मविद्यानां च महत्त्वमधिकृत्य आरण्यकाणि संप्रवृत्तानि। वस्तुतः आरण्यकं प्राणविज्ञानस्य, अध्यात्मज्ञानस्य वा बोधको ग्रन्यः अस्ति।

## आरण्यकग्रन्थानां प्रतिपाद्यविषयः

आरण्यकाणां प्रतिपाद्यः यज्ञेषु निहितानाम् आध्यात्मिकविषयाणां विवेचनमस्ति। अस्य मुख्यं लक्ष्यं चित्तनमस्ति, न तु कर्मानुष्ठानप्रवर्तनम्। अधिसङ्ख्यकेषु आरण्यकेषु बाह्वाम् औपचारिकं यज्ञं. मानसयज्ञस्य अभिव्यक्तिरूपेण अवधीतम्। आरण्यकेषु सम्पूर्णं जगदेव सूक्ष्मरूपेण यज्ञमयं सदपि स्थौल्यविहीनं प्राणमयं दृश्यते। यज्ञः विश्वस्य प्राण इव नियामकः। प्राणविद्या

आरण्यकानां विशिष्टः विषयः। प्राणान् विश्वधारकान् निरूपयन् ऋषिः कथयति यत् सर्वस्थूलसूक्ष्मपदार्थाः प्राणेन एव स्थिरतां प्राप्नुवन्ति।

**'एवं सर्वाणि भूतानि अपिपीलिकाभ्यः**

**प्राणेन बृहत्या विष्टब्धानीत्येवं विद्यात्।**

सामान्यतः आरण्यकाणि गद्यात्मकानि, किन्तु ब्राह्मणेषु इव यदा-तदा अत्रापि पद्यानि प्राप्यन्ते यथा तैत्तिरीयारण्यके कालस्य विशालतायाः निरूपणं कृतम्-

**नदीव प्रभवात्काचिदक्षव्यात् स्यन्दते यथा।**

**तां नद्योऽभिसमावान्ति सोरूः सती न निवर्तते।।**

अन्त्र कालस्य पारमार्थिक - व्यावहारिक रूपयोः निदर्शनम् अतीव सुष्ठुरूपेण प्राप्यते। कालस्तु निरन्तरं प्रवहति एव। अखण्डसंवत्सरस्वरूपेणास्य कालस्य परिदर्शनं भवति। व्यावहारिकः कालः तु खण्डीकृतः तथा अनित्योऽस्ति । व्यवहाराय तस्य नाना खण्डाः मुहूर्त-दिन-रात्रि-पक्ष-मासादिस्वरूपेण सन्ति चेदपि वस्तुतः कालस्तु एकरूपः एकाकार एव तिष्ठति। तस्य तुलना तया महानद्या सह कृताऽस्ति या अक्षयस्त्रोतसा सदा प्रवाहिता भवति, नाना नद्यः यथा महानद्या मिलित्वा सागरमुपयान्ति, तथैव शरीरेन्द्रियाणि प्राणेन मिलित्वा पारमार्थिक महत्त्वमुपयान्ति । प्राणविद्यायाः विस्तरेण वर्णनम् आरण्यकेषु प्राप्यते। 'हिरण्यवादन् वेद' नामकः एकः ऋषिः प्राणानां स्वरूपं एवंविधम् अजानात् तथा देवतारूपेण एव प्राणस्य उपासनाम् अकरोत्। अस्याः उपासनायाः विपुलं फलं तेन उपलब्धम्। प्राणाः सर्वस्य धारकं, सर्वस्य कारकं च। इमे प्राणाः एव इदं जगद् पापात् त्रातुं समर्थाः सन्ति।

गतिसम्पन्नत्वेन मनुष्यदेहः 'वाज' इति नाम्ना ख्यातः। प्राणाः तु अस्मिन् शरीरे प्रविश्य तस्य सततं रक्षां कुर्वन्ति। अतः इमे प्राणाः 'विभ्रद्धाज' इति कथ्यन्ते। देवताः प्राणान् दृष्ट्वा कथितवन्तः 'त्वं वशिष्ठोऽसि। यतः अस्मिन् शरीरे इन्द्रियाणां निवासस्य कारणत्वेन प्राणाः एव

सन्ति। अनेन निर्वचनेन सिद्धो भवति यत् प्राणाः एव शरीरे ऋषिरूपेण वर्तन्ते। अतः प्राणेषु ऋषित्वस्य भावना कर्तव्या तथा तद्रूपा उपासना अपि कर्तव्या।

आरण्यकं यज्ञीयगूढरहस्यस्य प्रतिपादनं करोति तथा च कर्मकाण्डस्य दार्शनिकव्याख्यामपि प्रस्तुतीकरोति । विषयविवेचनदृष्ट्या आरण्यकोपनिषदोः साम्यमस्ति। आरण्यकस्य मुख्यः विषयः प्राणविद्या तथा प्रतीकोपासना अस्ति।

आरण्यकमपि ब्राह्मणस्य एव अंशमस्ति। तस्य विशिष्टताप्रदर्शनाय 'रहस्यब्राह्मणम्' इति शब्दः ख्यातः अस्ति। शाङ्खायनारण्यके जीवस्य सर्वोत्तमा उपलब्धिः ब्रह्मणा सह एकत्वप्राप्तिः कथ्यते। 'आत्मावगम्योऽहं ब्रह्मास्मीति' इयमेव उक्तिः अस्य आरण्यकस्य सर्वोच्च उपदेशोऽस्ति-

'ऋचां मूर्धानं यजुषामुत्तमाङ्गम्,

साम्नां शिरोऽथर्वणां मुण्डमुण्डम्।

नाधीतेऽनधीतवेदमाहुस्तमज्ञं

शिरस् छित्वासौ कुरुते कबन्यम्।।'

तैत्तिरीयारण्यके अभिचारमन्त्राणाम् अपि सत्ता वर्तते। आभिचारिकमन्त्राणां प्रयोगः शत्रुमारणाय स्वार्थसाधनाय च भवति। ४१२७ मन्त्रेषु तथा ४१३७ मन्त्रेषु 'छिन्थी मिन्धी इन्धीकट' इति एवंविधानां मन्त्राणां स्पष्टरूपेण सङ्केतः प्राप्यते।

वानप्रस्थाश्रमस्य यज्ञमहाव्रतहोत्रादिकर्मणां विधयः व्याख्याः च आरण्यकग्रन्थेषु प्रतिपादिताः। आरण्यकानि वानप्रस्थानां ज्ञानप्रधानाः कर्मकाण्डग्रन्थाः सन्ति। आरण्यकेषु कर्ममार्गज्ञानमार्गयोः समन्वयः। उपनिषद्ग्रन्थेषु यस्य ब्रह्मज्ञानस्य विस्तृतं प्रतिपादनं वर्तते तस्य मूलाधारः आरण्यकग्रन्थाः एवं सन्ति।

वैदिकसाहित्यस्य प्रपूरकाङ्गानि संहिताः ब्राह्मणानि, आरण्यकानि उपनिषदश्च सन्ति। अतः ब्राह्मणग्रन्थानन्तरम् आरण्यकानां स्थानं महत्त्वपूर्णम्। वैदिकसंहितानाम् अन्तिमभागः ब्राह्मणं, ब्राह्मणानाम् अन्तिमभागः आरण्यकानि तथा आरण्यकानाम् अन्तिमभागः उपनिषदः सन्ति।

ब्राह्मणेषु आरण्यकानि अपि ब्राह्मणानि उच्यन्ते। आरण्यकोपनिषदोर्मध्ये परस्परं घनिष्ठः सम्बन्धः वर्तते। आरण्यकेषु वर्णाश्रमधर्मस्य वैदिकविधिविधानस्य च गूढविवेचनम् अस्ति। तेषु याज्ञिकक्रिया तथा तस्याः अनुष्ठानानां विधिः अत्यन्तरहस्यपूर्णन पथा सम्यक् विवेच्यते।

सम्प्रति षड् सप्त वा आरण्यकानि उपलब्धानि सन्ति। ऐतरेयारण्यकं, शाङ्खायनारण्यकम् इति एतत् द्वयम् ऋग्वेदेन सम्बद्धम्। तैत्तिरीयारण्यकं मैत्रायणीयारण्यकं चेति द्वयं कृष्णयजुर्वेदेन सह सम्बद्धम्, बृहदारण्यकं शुक्लयजुर्वेदस्य आरण्यकमस्ति । बृहदारण्यकं काण्वमाध्यन्दिनयोः शुक्लयजुर्वेदस्य द्वयोरपि शाखयोः उपलब्धम्। सामवेदीयारण्यकेषु तवलकारारण्यकम् उपलब्धम्। अथर्ववेदस्य किमपि आरण्यकम् उपलब्धं नास्ति। एतेषु आरण्यकेषु भाष्याणि कृतानि। भाष्यकारेषु सुप्रसिद्धौ स्तः सायणः शङ्करश्च। प्रत्येकस्य आरण्यकस्य भाष्यकाराः भिन्नाः सन्ति, किन्तु सायणशङ्करौ अनेकेषु भाष्यं कृतवन्तौ। आरण्यकस्य मुख्यः प्रतिपाद्यविषयः अस्ति प्राणविद्या तथा प्रतीकोपासना। यज्ञस्य मुख्यरूपेण आध्यात्मिकरहस्यात्मकवर्णनं प्राप्यते। आरण्यकस्य अपरनाम रहस्यविद्या अपि अस्ति। आरण्यकाणां भाषा ब्राह्मणानामिव वर्तते।

**ऐतरेयारण्यकम् -** ऋग्वेदसम्बद्धमिदमारण्यकं पञ्चधा विभक्तम् । तत्र प्रथमे महाव्रतवर्णनं, द्वितीये प्राणविद्यापुरुषवर्णनं, तृतीये संहितापदक्रमपाठस्वरव्यञ्जनादिनिरूपणं, चतुर्थे महाव्रतान्तरकृत्यवर्णनं, पञ्चमे निष्कैवल्यशास्त्रनिरूपणम् । एषु प्रथमत्रयाणां प्रणेता महिदासश्चतुर्थस्याश्वलायनः पञ्चमस्य शौनक इति कथितः । इदं निरूक्तपूर्ववर्तित्वान्न तथार्वाचीनम् ।

**शाङ्खायनारण्यकम् -** ऋग्वेदसम्बद्धमिदमारण्यकं पञ्चदशस्वध्यायेषु विभक्तम् । अस्य प्रथमाः षडध्यायाः कौषीतक्युपनिषत्त्वेन प्रसिद्धः ।

**तैत्तिरीयारण्यकम् -** कृष्णयजुर्वेदसम्बद्धमिदमारण्यकं दशप्रपाठकेषु विभक्तम् । अस्य सप्तमाष्टमनवमप्रपाठकाः तैत्तिरीयोपनिषदिति ज्ञायन्ते । दशमस्तु महानारायणीयोपनिषदेव ।

अत्र हि समुपासनाविधिरिष्टिसञ्चयनं स्वाध्यायः पञ्च महायज्ञाः तृतीये चातुर्होत्रचितिमन्त्राः, चतुर्थे प्रवार्योपयुक्तमन्त्राः अभिचार- मन्त्राश्च, पञ्चमे यज्ञविधिः, षष्ठे पितृमेधविषयकमन्त्राः इति।

**तलवकारारण्यकम्** - सामवेदसम्बद्धमिदमारण्यकं चतुर्व्वध्यायेषु विभक्तम् । अध्यायास्तु अनुवाकेषु विभक्ताश्च। अत्र केनोपनिषदन्तर्भूतास्ति चतुर्थाध्यायस्य दशमेऽनुवाके।

बृहदारण्यकम् - शुक्लयजुर्वेदसम्बद्धमिदमारण्यकं शतपथब्राह्मणपरिशिष्टत्वेन चतुर्दशकाण्डे चतुर्थाध्यायादारभ्य नवमाध्यायपर्यन्तं निबद्धमस्ति । अत्र हि एकत्रिंशदध्यायाः । अत्रापि यज्ञादीनामध्यात्मस्वरूपं निदिष्टमस्ति।

इत्थमारण्यकसाहित्यमुपनिषत्साहित्यस्यैकतः पूर्वपीठिकाऽपरतश्च ब्राह्मण- साहित्यस्य परिशिष्टमपि।

## पुनरावृत्तिः (Recap)

- ब्राह्मणं हि वेदनिर्दिष्टकर्मप्रतिपादकग्रन्थः।
- त्रेधा विभागः – विधिभागः, अर्थवादः, उपनिषत् च।
- वेदानां पृथक् पृथक् ब्राह्मणम्।
- ऋग्वेदसम्बद्धं ऐतरेयब्राह्मणम्।
- शुक्लयजुर्वेदसम्बद्धं शतपथब्राह्मणम्। कृष्णयजुर्वेदसम्बद्धं तैत्तिरीयब्राह्मणम्।
- सामवेदसम्बद्धं ताड्यब्राह्मणम्।
- अथर्वेवदसम्बद्धं गोपथब्राह्मणम्।
- आरण्यकं ब्राह्मणग्रन्थानां पूरकमेव ।
- आरण्यकानां मुख्यविषयः यागादिषु विद्यमानासु आध्यात्मिकतथ्यस्य मीमांसा अस्ति।
- सायणाचार्यमते अरण्ये पाठ्यत्वेन आरण्यकम् इति वदति।

- आरण्यकेषु कर्मकाण्डज्ञानकाण्डयोः समन्वयः द्रष्टुं शक्यते।
- आरण्यकानां मुख्यविषयः चिन्तनमस्ति, न तु कर्मानुष्ठानप्रवर्तनम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.वेदनिर्दिष्टकर्मप्रतिपादकग्रन्थः कः ?

2.ऋग्वेदसम्बद्धं ब्राह्मणं किम् ?

3. यागादीनां स्वरूपाणां व्याख्या किं भवति ?

4.मन्त्राणां प्रयोगनिर्देशः कः ?

5.गोपथब्राह्मणं कस्मिन् वेदे अन्तर्भवति ?

6.आरण्यकं केषां पूरकं भवति ?

7.आरण्यकानां प्राचीननाम किम् ?

8.के सर्वत्र व्याप्ताः सन्ति ?

9.का आरण्यकानां विशिष्टः विषयः ?

10.तैत्तिरियारण्यके कीदृशमन्त्राणां सत्ता वर्तते ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

## (Answer the following questions in one or two sentences)

1.आरण्यकानि केषां कृते संवृत्तानि ?

2.ब्राह्मणानि केषां कृते प्रवृत्तानि ?

3.आरण्यशब्दस्य व्युत्पत्तिं लिखत।

## निर्दिष्टाभ्यासः (Assignments)

1.यागानुष्ठाने ब्राह्मणग्रन्थानां आवश्यकता।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1.ब्राह्मणम्

2.ऐतरेयम्

3.ब्राह्मणम्

4.विनियोगः

5.अथर्ववेदे

6.ब्राह्मणानाम्

7.रहस्यम्

8.प्राणाः

9.उपासना

10.आभिचारमन्त्राणाम्

## सूचनाग्रन्थाः


1.ऋग्वेदसंहिता सायणभाष्येण सहितः, वेदसंशोधकमण्डल, तिलकस्मारकभवन्, पूने-2,1933

2.कृष्णयजुर्वेदसंहिता सायणभाष्येण सहितः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, पूने, 1940

3. सामवेदसंहिता, सायणभाष्येण सहितः, मुन्शी राममनोहरलाल प्रकाशन्,प्र.लि.नवदेल्ली, 1983

4. अथर्ववेदसंहिता, सायणभाष्येण सहितः, शङ्कर पाण्डुरङ्गपण्डितेन संशोधनं, मुम्बई

5. संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

6.ऋक्सूत्रसन्दर्शिका–बालगोविन्दझा (चौखम्पासुरभारतीप्रकाशन्, वाराणसी, 2012)

7.वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा (चौखम्पासुरभारतीप्रकाशन्, वाराणसी, 2016)

# Unit 4
# उपनिषत्

## उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- संहिता-ब्राह्मण-आरण्यकानां ज्ञानं प्राप्नोति।
- उपनिषदां ज्ञानम्।

## प्राग्व्यपेक्षाः (Pre requisites)

वेदे प्रतिपादितविषयक्रमानुसारं चत्वारः भागाः सन्ति। वेदानां प्रथम विभागः संहिता इति कथ्यते। इन्द्रः, अग्निः, वायुः, विष्णुः, इत्यादि देवतानां प्रीत्यर्थं गायमानाः स्तुतयः एव संहितायाम् अन्तर्भवन्ति। मन्त्राणां समूहः एव सूक्तयः। वेदस्य द्वितीयविभागे ब्राह्मणे यज्ञविधयः एव प्रतिपादिताः। तृतीयःविभागः आरण्यकम् इति रूपेण ज्ञायते। अरण्ये अनूच्यमानत्वात् आरण्यरकम् इति शङ्करः बृहदारण्यकभाष्ये वदति। वेदानां अन्तिमः भागः भवति उपनिषत्। उपनिषत् एव वेदान्तरूपेण लोके प्रसिद्धा।

## प्रधानांशाः/प्रधानपदानि (Key words)

उपनिषत्, वेदान्तः, शङ्करभाष्यम्, दशोपनिषदः,ऐतरेयोपनिषत्, ईशावास्योपनिषत्, केनोपनिषत्, कठोपनिषत्, प्रश्नोपनिषत्, मुण्डकोपनिषत्, माण्डूक्योपनिषत्, बृहदारण्यकोपनिषत्, तैत्तिरियोपनिषत्।

## विशदीकरणम् (Discussion)

वेदे प्रतिपादितविषयक्रमानुसारं चत्वारः भागाः सन्ति। वेदानां प्रथम विभागः संहिता इति कथ्यते। इन्द्रः, अग्निः, वायुः, विष्णुः, इत्यादि देवतानां प्रीत्यर्थं गायमानाः स्तुतयः एव संहितायाम् अन्तर्भवन्ति। मन्त्राणां समूहः एव सूक्तयः । वेदस्य द्वितीयविभागे ब्राह्मणे यज्ञविधयः एव प्रतिपादिताः। तृतीयःविभागः आरण्यकम् इति रूपेण ज्ञायते। अरण्ये अनूच्यमानत्वात् आरण्यरकम् इति शङ्करः बृहदारण्यकभाष्ये वदति। वेदानां अन्तिमः भागः भवति उपनिषत्। उपनिषत् एव वेदान्तरूपेण लोके प्रसिद्धा। उपनिषत्सु मुख्यत्वेन वर्णिताः विषयाः समासतः सन्ति- किम् ब्रह्म,कः ईश्वरः, जीवात्मनः स्वरूपम्, जीवात्मनः लक्ष्यम्, जीवो ब्रह्मणो भिन्नोऽभिन्नो वा ,कथं च भिन्नत्वम् अभिन्नत्वम् वा, सृष्टेः मूलरूपं किम्, कथं जगतः प्रादुर्भावः, कथं जगतः प्रलयः,कथं मोक्षावाप्तिः, कानि च मोक्षस्य साधनानि, ब्रह्मसाक्षात्कारस्य के लाभाः इत्यादयः।तत्र कठोपनिषदि उक्तम्-

**येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके।**

**एतद्विद्यामनुशिष्टस्त्वयाहं वराणामेष वरस्तृतीयः।।**

उपनिषदः एव वेदान्तरूपेण ज्ञायन्ते। वेदान्त-दर्शनस्य अनेके अवान्तरवादाः सन्ति। तेषु अद्वैतम्,विशिष्टाद्वैतम्,द्वैतम्,द्वैताद्वैतम् इत्यादीनि प्रमुखानि सन्ति।

वेदस्य अन्तिमः भागः उपनिषद् रूपेण ज्ञायते।उपनिषदः अध्यात्मज्ञानस्य मूलम् इति कथ्यते। उपनिपूर्वयोः सदेस्तदर्थत्वात्(सदिरप्रतेः इति पाणिनीयसूत्रेण सकारस्य षकारः) तादर्थ्याद्ग्रन्थोऽप्युपनिषदुच्यते।वेदान्तो नाम उपनिषत्प्रमाणम् तदुपकारिणी शारीरकसूत्रादीनि इति वेदान्तसाराख्ये ग्रन्थे उक्तम्।उपनिषद् शब्दस्तु उप-नि इति द्वयोपसर्गपूर्वकात् सद् धातोः क्विप् प्रत्यये कृते निष्पद्यते।सदिरप्रतेः इति अष्टाध्यायी। अत्र सद् धातोः त्रयः अर्थाः सन्ति- विशरणम्-नाशः,गतिः- ज्ञानम्, अवसादनम्- शैथिल्यम्। उपनिषदाम् अध्ययनेन संसारस्य बीजस्वरूपायाः अविद्यायाः नाशं भवति,एवञ्च संसारमूलं बन्धनम् अविद्यारूपं शिथिलयति दुःखानि च विनश्यन्ति।परमात्मविषया उपनिषदः इति केनभाष्ये

कथयति।अत एव शङ्कराचार्यः अविद्यानाशं दुःखनिरोधं ब्रह्मप्राप्तिश्च अर्थत्रयं गृहीत्वा उपनिषदः ब्रह्मविद्यायाः द्योतकरूपाः ग्रन्थाः मन्यते। वेदे बह्व्यः उपनिषदः सन्ति । तासु ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तैत्तिरीय-ऐतरेय-बृहदारण्य-छान्दोग्यानां च दशोपनिषदां प्राधान्यमस्ति।

**1.ईशावास्योपनिषत्**

ईशावास्योपनिषत् शुक्लयजुर्वेदसम्बद्धा भवति। शुक्लयजुर्वेदसंहितापाठस्य अन्तिमाध्यायः एव एषा ईशोपनिषद्।अस्यां उपनिषदि अष्टादशश्रुतयः सन्ति। अस्याः आरम्भः "ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्। तेन त्यक्तेन भुञ्जीथाः मागृधः कस्यस्विद्धनम्"॥ (ई.उ.१) इति मन्त्रेण भवति। अत एव अस्याः उपनिषदः नामधेयम् 'ईशावास्योपनिषद्' इति। सर्वासु उपनिषात्सु प्रमुखा अग्रगण्या चास्ति। वस्तुतः इयमेथोपनिषद् मन्त्रोपनिषदित्यस्ति। यत इयं सहिताऽन्तर्गते मन्त्रभागे प्राप्यते। "ईशावास्यमिदं सर्वम्" इत्यादिपदस्याधारे अस्या नामकरणमस्ति। अत्र ज्ञानदृष्ट्या कर्मोपासनाया रहस्यं वर्णितमस्ति। इयं कर्मसंन्यासस्य पक्षपातिनी न भूत्वा यावज्जीवनं निष्कामकर्मभावेन कर्मसम्पादनस्यानुरागिणी वाति। अत्राद्वैत-भावनायाः स्पष्टं प्रतिपादनमस्ति। अत्र ब्रह्मणः स्वरूपवर्णनानन्तरं विद्या-अविद्या-सम्भूति-असम्भूत्यादीनां विवेचनमस्ति।

**2.केनोपनिषत्**

इयमुपनिषत् सामवेदे समाहिता। सामवेदान्तर्गते तलवकारब्राह्मणे चतुर्थाध्याये यो दशमोऽनुवाकः तत्र केनोपनिषत् पठिता। अस्यामुपनिषदि चत्वारः खण्डाः सन्ति। परमात्मा एवं सर्वकर्ता, तस्यैव इच्छाशक्त्या, ज्ञानशक्त्या, क्रियाशक्त्या सर्वं प्रवर्तते इति अस्याः प्रधानोविषयः। "केनेषितं पतति प्रेषितं मनः" (के.उ.१/१) इत्येवं केनेति शब्देन अस्याः आरम्भः अतएवाऽस्या उपनिषदः नामधेयं केनेति। केनेषितं पतति प्रेषितं मनः। केन प्राणः प्रथमः प्रैतियुक्तः। केनेषितां वाचमिमां वदन्ति चक्षुः श्रोत्रं क उ देवो युनक्ति" (के.उ.१/१) इति

जिज्ञासयाऽस्या आरम्भः। श्रोत्रस्य श्रोत्रं मनसो मनो यद्वाचो हि वाचं स उ प्राणस्य प्राणश्चक्षुषश्चक्षुरतिमुच्य धीराः प्रेत्याऽस्माल्लोकादमृता भवन्ति (के.उ. १/२) इति मन्त्रेण तस्याः उत्तरं पठितम्। परमात्मैव सर्वज्ञः सर्वकर्ता, सर्वनियामकश्चेत्यादि अत्र प्रतिपादितम्। तथा चोक्तं "यस्यामतं तस्य मतं मतं यस्य न वेद सः। अविज्ञातं विजानतां विज्ञातमविजानताम्॥ (केउ. २/३) इत्यादि। परमात्मज्ञानस्योपायोऽप्यत्र प्रदर्शितः। यथा " प्रतिबोधविदितं मतममृतत्वं हि विन्दते। आत्मना विन्दते वीर्यंविद्ययाविन्दतेऽमृतम्॥ (के. उ. २/४) इति।

### 3.कठोपनिषत्

कठोपनिषद् कृष्णयजुर्वेदसम्बद्धा। यस्मादियं कठशाखाऽन्तर्गता तस्मादस्याः 'कठ' इति संज्ञा। अस्यामुपनिषदि अध्यायद्वयं वर्तते। प्रत्येके अध्याये त्रीण्युपप्रकरणानि सन्ति। एतान्युपप्रकरणानीह 'वल्ली' इत्युच्यन्ते। आहत्य अस्यामुपिनषदि षड् वल्ल्यो वर्तन्ते।यम-नचिकेतसोः संवादरूपेण इह ब्रह्मविद्योपदिष्टा।

### 4.प्रश्नोपनिषत्

अथर्ववेदे इयमुपनिषत् समाहिता। आथर्वणिकब्राह्मणग्रन्थेषु पिप्पलादाख्यशाखायामस्याः पाठो भवति। अस्यामुपनिषदि षड्भिः शिष्यैः षट् प्रश्नाः पृष्टाः। गुरुणा च तेषाम् उत्तराणि प्रदत्तानि। प्रश्नरूपत्वात् अस्याः उपनिषदो नामधेयं प्रश्नोपनिषद् इति। षण्णामपि शिष्याणां नामानि प्रथममन्त्रे प्रदर्शितानि। यथा "सुकेशा च भारद्वाजः शैब्यश्च सत्यकामः सौर्यायणी च गार्ग्यः कौसल्यश्चाश्वलायनो भार्गवो वैदर्भिः कबन्धी कात्यायनः" (प्र.उ१/१) इति। कीदृशा एते शिष्या इत्यपि वर्णितम्। यथा 'ते है ते ब्रह्मपरा ब्रह्मनिष्ठाः परं ब्रह्मान्वेषमाणा एष ह वै तत्सर्वं वक्ष्यतीति ते ह समित्पाणयो भगवन्तं पिप्पलादमुपसन्नाः' (प्र. उ१ / १) इति।

एते सर्वेऽपि शिष्या ब्रह्मविद्योत्सुकाः, ब्रह्मणि निष्ठावन्तः परमात्मानं चाऽन्वेषमाणा आसन्। ब्राह्मीं स्थितिमाप्तानामेव परमात्मोपासनाऽधिकार इति सूचयितुमिदम्। एते च शिष्या गुरोः पिप्पलादस्य समीपं गताः। तत्र कबन्धी प्रथमं प्रश्नं पृच्छति – 'भगवन् कुतो ह वा इमाः प्रजाः प्रजायन्ते' ( प्र.उ.1 / 3) इति। तदा –'प्रजाकामो वै प्रजापतिः'( प्र.उ.1 / 4) इत्युक्त्वा प्रजानामधिपतेः परमात्मन इच्छया एव एताः प्रजाः प्रजायन्ते इति पिप्पलादः उदतरत्। एवं एकैकः परमात्मसंबन्धिनं प्रश्नं पृच्छति। पिप्पलादः एकैकस्य उत्तराणि वदति।

### 5.मुण्डकोपनिषत्

मुण्डको नाम शिरः। शरीरे शिरसः यथा महत्त्वं वर्तते तथैव वेदान्ते मुण्डकोपनिषदः महत्त्वं वर्तते। यतो हि वेदान्ते मूर्धन्यभूतायाः ब्रह्मविद्यायाः अत्र निरूपणाद् इयमुपनिषद् अपि मुण्डकोपनिषद् इति उच्यते। एषा उपनिषद् अथर्ववेदे समाहिता। अस्यामुपनिषदि त्रीणि प्रकरणानि सन्ति। एतानि प्रकरणानीह मुण्डकमित्युच्यन्ते। त्रीणि मुण्डकानि अस्याः उपनिषदः। प्रत्येकं मुण्डकेषु खण्डद्वयं वर्तते। अस्यामुपनिषदि षट् खण्डाः सन्ति। ब्रह्मविद्या अस्याः उपनिषदः प्रधानप्रतिपाद्यविषयः। ब्रह्मविद्येयमिह पराविद्या इति व्यपदिष्टा।

### 6. माण्डूक्योपनिषत्

अथर्ववेदस्येयमुपनिषत्। अथर्ववेदगतायां माण्डूक्यशाखायामस्याः पाठः। अत एवेयं माण्डूक्योपनिषदिति प्रथिता। अस्यामुपनिषदि द्वादशमन्त्राः सन्ति। अस्याश्च चत्वारः खण्डाः सन्ति।माण्डूक्योपनिषद्- इयमुपनिषद् आकारे यथा स्वल्पकायिकाऽस्ति, सिद्धान्ते तथैव विशालाऽस्ति । अस्यां केवलं द्वादशखण्डानि किं वा वाक्यानि सन्ति, यस्मिन् चतुष्पादात्मनो अतीव मार्मिकं रहस्यमयं च विवेचनमस्ति। ऑकारस्य मार्मिकव्याख्याकरणस्य श्रेयः प्राप्तुम् इयमेवोपनिषदर्हति। ओंकारे तिस्रो मात्राः भवन्ति, तथा चतुर्थोऽशः 'अमात्र' एव भवति। चैतन्यस्य तदनुरूपेणैव चतस्रोऽवस्था भवन्ति-जागरणम्, स्वप्नः, सुषुप्तिस्तथा चैतन्यस्याव्यवहार्यतुरीया दशा। आसामाधिपत्यधारणकर्त्ता आत्माऽपि क्रमशः चतुर्धा भवति-

वैश्वानरः, तैजसः, प्राज्ञः तथा प्रपञ्चोपशमरूपी शिवः, येष्वन्तिम एव चैतन्यात्मनो विशुद्धरूपमस्ति ।

### 7.तैत्तिरीयोपनिषत्

तैत्तिरीयोपनिषद् तैत्तिरीयारण्यकस्य सप्तम-अष्टम-नवमखण्डानां सम्मिलितांशोऽस्ति । आरण्यकस्य संहिती उपनिषत्-शिक्षावल्ली नाम्ना, वारुणी उपनिषद् भृगुवल्ली नाम्ना, तृतीयोपनिषद् ब्रह्मानन्दवल्ली नाम्ना च ख्याताऽस्ति। शिक्षावल्ल्यां उपासनायाः गुरुशिष्यसम्बन्धिनः शिष्टाचारस्य च एकत्र निरूपणम् अस्ति। भृगुवल्ल्यां ब्रह्मप्राप्तेर्मुख्यसाधनस्य वर्णनम्, भृगुवरुणयोः संवादरूपेण "पनुक्रोश" नाम्ना विख्यातमस्ति । ब्रह्मानन्दवल्ल्यां ब्रह्मविद्यायाः निरूपणमस्ति ।

### 8.ऐतरेयोपनिषत्

ऋग्वेदसंबद्धा इयम् ऐतरेयोपनिषत् त्रिष्वध्यायेषु विभक्ता भवति। तेषु प्रथमेऽध्याये त्रयः खण्डाः सन्ति।द्वितीये तृतीये च अध्याये एकैकः खण्डः वर्तते। आहत्य अस्य पञ्चखण्डाःसन्ति। ब्रह्मविद्या प्रधानायामस्यां उपनिषदि अद्वैतवेदान्तप्रसिद्धेषु महावाक्येषु 'प्रज्ञानं ब्रह्म' इति वाक्यंअन्तर्भवति ।तथा चाऽत्रत्यामन्त्र एवम्

**"आत्मा वा इदमेक एवाऽग्र लआसीत्। नान्यत् किञ्चन मिषत्। स ईक्षत लोकानु सृजा इति। स इमान् लोकान् असृजत। अम्भोमरीचीर्परमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठाऽन्तरिक्षं मरीचयः पृथिवी मरो या अधस्तातत्ता आपः॥"** (ऐ. उ. १/१/1&2) इति।

तथाच

**"स ईक्षत इमे नु लोकालोकपालान्नु सृजा इति। सोऽद्भ्य एवं पुरुषं समुद्धृत्यामूर्च्छयत्॥"** (ऐ. उ. 1/1/3) इति।

उपर्युक्तमन्त्रैःसृष्टिविषयःनिरूपितः।

परमात्मोपासनाविषये च कोऽयमात्मेति वयमुपास्महे, कतर स आत्मा इत्यादि जिज्ञासामुपस्थाप्य तत्रोत्तरं पठ्यते-

**"येन वा पश्यति येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति येन वा स्वादु चास्वादु च विजानाति॥"** (ऐउ. ३/१)इत्यादि।

सर्वकर्ता परमात्मैव सर्वोपास्य इत्युपदेशः। ततश्च **"प्रज्ञानं ब्रह्म"** (ऐउ३/३), "सर्वाण्येतानि प्रज्ञानस्य नामधेयानि भवन्ति (ऐउ३/२) इत्यादिरूपेण ज्ञानरूपस्य ब्रह्मणः सर्वाऽऽत्मतया वर्णनम्।

**9.छान्दोग्योपनिषत्**

छान्दोग्योपनिषत् सामवेदे समाहिता।सामवेदान्तर्गते तवलकाराख्यब्राह्मणेऽस्याः पाठः भवति।अस्यामुपनिषदि अष्टाध्यायाः सन्ति। ते चाऽध्याया विभिन्नेषु खण्डेषु विभक्ताः। विविधैरुपाख्यानैरत्र ब्रह्मविद्योपदिष्टा। तत्र यथा चतुर्थाध्याये सत्यकामजाबालस्योपाख्यानं श्रूयते।गुर्वाज्ञया गवां सेवया तस्य ब्रह्मज्ञानं कथं जातमित्यादि सर्वं तत्रोपवर्णितम्।

षष्ठाध्याये उद्दालकस्य श्वेतकेतोः च संवादरूपेण सद्विद्योपदिष्टा। तथा च 'वस ब्रह्मचर्यम्' इति उद्दालकः स्वपुत्रमादिशति। श्वेतकेतुः गुरुकुलवासमध्ययनं च समाप्य गृहं प्रत्यागच्छति। तदा अविनीतस्वभावं तं पश्यन् पिता पृच्छति - "श्वेतकेतो यन्नु सोम्येदं महामना अनूचानमानी स्तब्धोऽसि (छा. उ. ६/१/१) इति। पुनश्च पिता वदति - 'कुत तम् आदेशम् अप्राक्ष्यः ? येन अश्रुतं श्रुतं भवति अमतं मतं अविज्ञातं विज्ञातम् इति। 'तदापुत्रंपृच्छति, 'कथं नु भगव स आदेशो भवति इति?" तदा पिता उत्तरं वदति। -

**"यथा सोम्यैकेन मृत्पिण्डेन सर्वंमृण्मयं विज्ञातं स्याद्वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यम्॥"** (छा.उ. ६/१/४)इति। अत्र विविधैः दृष्टान्तैः एकविज्ञानेन सर्वविज्ञानम् इत्युपदिष्टम्। तदनन्तरं तद्विषये एव विशेषमाह -

**"सदेव सोम्य इदमअग्र आसीत् एकमेवाद्वितीयम्"** ( छा. उ. ६/२/१) इत्यादि।

अत्र सच्छब्देनाऽस्य जगतः कारणमुच्यते। यत्सदैव वर्तते,यद्धि प्रलयावस्थायामपि वर्तते ता दृशं जगतः कारणं सदित्युच्यते।अत एव एषा विद्या सद्विद्येति प्रथिता। एवं षष्ठाध्याये सद्विद्याया उपदेशःवर्तते।

एवं सप्तमाध्याये भूमविद्या अष्टमामाध्याये दहरविद्या च छान्दोग्योपनिषदि विस्तरेण प्रतिपादिते।

एवम् अस्माभिः छान्दोग्योपनिषदः परिचयः प्राप्तः। अथ बृहदारण्यकोपनिषदः परिचयम् अवगच्छामः।

## 10.बृहदारण्यकोपनिषत्

एषा उपनिषद् शुक्लयजुर्वेदस्य वाजसनेयब्राह्मणे समाहिता।अस्यां षडध्यायाः सन्ति। एते सर्वेऽपि अध्यायाः विभिन्नेषूपप्रकरणेषु विभक्ताः।एतान्युपप्रकरणानीहब्राह्मणसंज्ञया व्यपदिश्यन्ते। अत्राऽपि विविधैरुपाख्यानैर्ब्रह्मविद्यायाः उपदेशःक्रियते।

यथाऽस्यां द्वितीयाध्याये याज्ञवल्क्यस्य मैत्रेय्याश्च संवादं वर्तते।अस्मिन संवादे -

**न वा अरेपत्युकामायपतिःप्रियोभवत्यात्मनस्तुकामायपतिःप्रियोभवति" (बृ. उ. २/४/५),**

**"आत्मावाअरेद्रष्टव्यःश्रोतव्योमन्तव्योनिदिध्यासितव्य"(बृ.उ.२/४/५)**

इत्यादिरूपेणब्रह्मविद्यायाउपदेशःप्रदत्तः।

ततश्च तृतीयाध्याये राज्ञो जनकस्य सभायां महर्षेर्याज्ञवल्क्यस्येतरैर्विद्वद्भिः साकं प्रश्नोत्तररूपेण या गोष्ठी संजाता तस्याः वर्णनमुपलभ्यते। तत्र याज्ञवल्क्यं प्रत्यश्वलस्य प्रश्नाः

सन्ति।याज्ञवक्यः तेषाम् उत्तरं प्रयच्छति। तदनन्तरमार्तभागस्य प्रश्नाः सन्ति। याज्ञवल्क्यस्तस्याऽपि सम्यगुत्तराणि प्रयच्छति। तदनन्तरं लाह्यायनेः प्रश्नाः सन्ति। याज्ञवल्क्यः तस्याः अपि उत्तराणि यच्छति।तदनन्तरं गार्गीति काचिद् विदुषी तत्रोपस्थिता भवति। तया सह याज्ञवल्क्यस्य संवादः जायते। तत्र याज्ञवल्क्यो ब्रह्मविद्यां निरूपयन्नाह - **"एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवव्यौ विधृते तिष्ठतः॥"** (बृ. उ.3/8/9).**"यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मिल्लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तवदेवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्माल्लोकात्प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वाऽस्माल्लोकात्प्रैति स ब्राह्मणः॥"** 11 (बृ. उ. ३/८/१० ) इत्यादि।

तदनन्तरं पञ्चमाध्यायेऽपि प्रजापतिना देवान् प्रति तथा मनुष्यान् प्रत्यसुराश्च यदुपदिष्टं तन्निरूपितम्। एकेनैव 'द' शब्देन प्रजापतिना तत्र दमस्य दानस्य दयायाश्च उपदेशः कृतः। एवम् अस्यामुपनिषदि विविधैरुपाख्यानैर्ब्रह्मविद्यायाः उपदेशः समुपलभ्यते।

## पुनरावृत्तिः (Recap)

- वेदस्य अन्तिमः भागः उपनिषद् रूपेण ज्ञायते।
- उप-नि इति द्वयोपसर्गपूर्वकात् सद् धातोः क्विप् प्रत्ययान्तं रूपं भवति उपनिषत्।
- परमात्मा विषया उपनिषदः इति केनोपनिषत् कथयति।
- शङ्कराचार्यःईशादि दशोपनिषदां भाष्यं लिखितवान्।
- ईशावास्योपनिषत् शुक्लयजुर्वेदसम्बद्धा अस्ति।
- केनोपनिषत् सामवेदे समाहिता।
- कठोपनिषत् कृष्णयजुर्वेदसम्बद्धा भवति।
- प्रश्नोपनिषत् अथर्ववेदे समाहिता।
- मुण्डकोपनिषत् अथर्ववेदे समाहिता।

- माण्डूक्योपनिषत् अथर्ववेदे समाहिता।
- तैत्तिरियोपनिषत् कृष्णयजुर्वेदसम्बद्धा भवति।
- ऐतरेयोपनिषत् ऋग्वेदसम्बद्धा भवति।
- तत्त्वमसि इति महावाक्यं छान्दोग्योपनिषदि अन्तर्भवति।
- अहं ब्रह्मास्मि इति महावाक्यं बृहदारण्यकोपनिषदि अन्तर्भवति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.वेदस्य अन्तिमः भागः केन रूपेण ज्ञायते ?

2.केनोपनिषत् कस्मिन् वेदे समाहिता ?

3.अहं ब्रह्मास्मि इति महावाक्यं कस्मिन् उपनिषदि उक्तम् ?

4.ईशावास्यमिदं सर्वं इति मन्त्रः कस्यां उपनिषदि भवति ?

5.प्रश्नोपनिषदि शिष्यैः कति प्रश्नाः पृष्टाः ?

6.प्रश्नोपनिषदि प्रतिपाद्यमानः ऋषिः कः ?

7.मुण्डकं इति पदस्य अर्थः कः?

8.माण्डूक्योपनिषदि कति मन्त्राः सन्ति?

9.तैत्तिरियोपनिषदि प्रकरणानि केन रूपेण ज्ञायते ?

10.शङ्कराचार्यः कति उपनिषदां भाष्यं लिखितवान् ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

## (Answer the following questions in one or two sentences)

1.उपनिषत् पदस्य निष्पत्तिः लिखत।?

2.उपनिषत्सु मुख्यतः वर्णिताः विषयाः के ?

3.वेदान्तदर्शनस्य प्रधान विभागाः के ?

4.कठोपनिषदि कयोः संवादरूपेण ब्रह्मविद्या उपदिष्टा?

| |
|---|
| 5.माण्डूक्योपनिषदि प्रतिपाद्यमानस्य चैतन्यस्य चतस्रः अवस्थाः काः? |

## एकैकया खण्डिकया उत्तराणि लिखत।

## (Answer the following questions in a paragraph)

| |
|---|
| 1.केनोपनिषत् |
| 2.बृहदारण्यकोपनिषत् |
| 3.छान्दोग्योपनिषत् |
| 4.ईशावास्योपनिषत् |
| 5.ऐतरेयोपनिषत् |

## निर्दिष्टाभ्यासः (Assignments)

| |
|---|
| 1.वेदान्तदर्शन्स्य प्रसक्तिं अधिकृत्य विशदयत। |
| 2.चत्वारि महावाक्यानि अधिकृत्य प्रतिपादयत। |

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

| |
|---|
| 1.उपनिषत् |
| 2.सामवेदे |
| 3.बृहदारण्यकोपनिषत् |
| 4.ईशावास्योपनिषदि |
| 5.षट् |
| 6.पिप्पलादः |
| 7.शिरः |
| 8.द्वादश |
| 9.वल्ली |
| 10.दश |

SGOU

# सूचनाग्रन्थाः


1.ऋग्वेदसंहिता सायणभाष्येण सहितः, वेदसंशोधकमण्डल, तिलकस्मारकभवन्, पूने-2,1933

2.कृष्णयजुर्वेदसंहिता सायणभाष्येण सहितः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, पूने, 1940

3. सामवेदसंहिता, सायणभाष्येण सहितः, मुन्शी राममनोहरलाल प्रकाशन्,प्र.लि.नवदेल्ली, 1983

4. अथर्ववेदसंहिता, सायणभाष्येण सहितः, शङ्कर पाण्डुरङ्गपण्डितेन संशोधनं, मुम्बई

5. संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

6.ऋक्सूत्रसन्दर्शिका–बालगोविन्दझा  (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2012)

7.वैदिकवाङ्मयस्येतिहासः –जगदीशचन्द्रमिश्रा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2016)

BLOCK - 2

# वेदाङ्गानि उपवेदाश्च

# Unit 1

## वेदाङ्गेषु शिक्षा व्याकरणं च

### उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- वेदाङ्गानि जानाति।
- शिक्षाव्याकरणयोः प्राधान्यमवगच्छति।

### प्राग्व्यपेक्षाः (Prerequisites)

साम्प्रतिके वैज्ञानिकेऽपि युगे समग्रस्य भूभागस्य प्राचिनतमो ग्रन्थः वेद एव। अस्य जगतः धारणं पोषणं चापि शाश्वतेन वैदिकशब्दराशिना एव भवति। "बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्" इति मनुवचनमिह प्रमाणभूतमस्ति। मानवस्य मानवतायाश्च प्राचीनतमस्वरूपस्य परिज्ञानाय तद्विकासक्रमानुसन्धानाय च वेदानुशीलनमावश्यकमेव भवति। पाश्चात्या बहवो मनीषिणोऽपि वेदवाङ्मयानुशीलने कृतजीवनोत्सर्गाः "निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति प्राचीनमुद्घोषं साम्प्रतिकंऽपि काले नूनं परिपोषयन्ति ।

वेदा हि दुरुहाः। एतेषामर्थावगमः सामान्यतया कर्तुं न शक्यः । अतस्तेषामर्थप्रत्यायनायैव आचार्यैः षडङ्गग्रन्थाः रचिताः। तेनेदं निश्चीयते यत् वेदार्थप्रतिपत्तये एषामध्ययनमावश्यकम्। प्रसंगादिह षडङ्गानां परिचयः संक्षेपेण प्रस्तूयते।

### प्रधानांशाः/प्रधानपदानि (Key words)

षडङ्गानि, शिक्षा, घ्राणं, व्याकरणं,मुखम्, उदात्तं, अनुदात्तं, स्वरितं, उच्चारणं, वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तानम् ।

## विशदीकरणम् (Discussion)

अङ्ग्यन्ते ज्ञायन्ते एभिरिति गत्यर्थकाद् अगि धातोर्घात्र बहुत्वे अङ्गानि वेदानामङ्गानि वेदाङ्गानि इति यैरधीतैर्वेदानां तत्तद्विषयाः सम्यग्ज्ञायन्त इति तेषां वेदाङ्गत्वम् । कालक्रमेण क्षीयमाणबुद्धीनां जनानां कृते वेदा दुरूहः सञ्जाताः । अत एव तत्र तत्र मन्त्राणामुच्चारणविषये, वेदनिर्दिष्टकर्मप्रतिपादनविषये, वैदिकशब्दज्ञानविषये, तन्निर्वचनविषये, तद्गतवृत्तविषये, तत्प्रतिपाद्यकर्मविधानकालविषये च पृथग्विवेचनमपि आवश्यकं सञ्जातम् । उक्तमेव -

**"साक्षात्कृतधर्माण ऋषयो बभूवुः । तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुरुपदेशाय ग्लायन्तोऽवरेभ्यो बिल्मग्रहणायेमं ग्रन्थं नमाम्नासिपुर्वेदञ्च वेदाङ्गानि च।"**

इति । अत एव वेदार्थबोधाय सहायकत्वात्तेषामुपकारकत्वं सिध्यत्येव । प्रथमं तु वेदाङ्गानां वेदमन्त्रः सहैवाध्ययनमभिमतमासीत् किन्तु कालक्रमेण ते पृथग्ग्रन्यत्वेनोपस्थापिता दृश्यन्ते । वेदाङ्गानामुल्लेखो गोपथब्राह्मणादावपि दृश्यते । तथैव मुण्डकोपनिषदि पराऽपराविद्यायाः पृथक्पृथगुल्लेखः कृतः । तत्र पराशब्देन ब्रह्मविद्याऽपराशब्देन वेदानां तदङ्गानाञ्च ग्रहणम् । यथोक्तम् –

**तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति ।** (१।१।५)

वेदार्थावगमनाय विशिष्टाध्ययनप्रणाली वेदाङ्गत्वेन समाख्याता । कालान्तरे तानि एव षण्णां वेदाङ्गानां स्थितिः पृथक्तया स्वातन्त्र्यमाधत्त । तानि च षट्- शिक्षा, कल्पः, व्याकरणं, निरुक्तं, छन्दः, ज्यौतिषमिति । तत्र छन्दो वेदस्य पादौ, कल्पो वेदस्य हस्तौ, ज्यौतिषं चक्षुः, निरुक्तं श्रोत्रे, शिक्षा घ्राणं, मुखं व्याकरणमिति । तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयत इति

पाणिन्यनुशासनम् ।वाङ्मयरूपस्य वेदस्य एतानि षडङ्गानि चरणव्यूहे पाणिनिशिक्षायां च इत्थं कल्पितानि सन्ति ।

**छन्दः पादौ तु वेदस्य हस्तः कल्पोऽथ पठ्यते।**

**ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ।।**

**शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।**

**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।। (पा.शि.४१-४२)**

एवम्भूतेषु वेदाङ्गेषु शिक्षा व्याकरणयोः परिचयः समासेनात्र प्रस्तूयते ।

शिक्ष्यते प्रतिबोध्यते वर्णाद्युच्चारणमनयेति विद्योपादानार्थकात् शिक्षधातोः स्त्रीत्वविवक्षायाम् 'अ प्रत्ययात्' इत्यनुवृत्य 'गुरोश्च हलः' इत्यप्रत्यये टापि शिक्षेति । तैत्तिरीयोपनिषदि उक्तं-

**"वर्णः स्वरः । मात्रा बलम् । साम सन्तानः ।"**

तेन वर्णस्वरमात्राबलसामसन्तानात्मका शिक्षा यत्र वर्णा अकारादयः, स्वरा उदात्तादयः, मात्रा ह्रस्वादिः, बलं स्थानप्रयत्नौ, साम निपातादिः सन्तानो विकर्षणादिः येषामवबोधनमेव शिक्षायाः प्रयोजनम् । शिक्षायाम् अक्षरविज्ञानं स्वरविज्ञानं सन्धिविज्ञानं निवृत्तिविज्ञानं संहितापाठः पदपाठश्चेत्यादिविषयाः समाविष्टाः। तत्र वर्णानामुच्चारणविधिरक्षरविज्ञानं, स्वराणामुदात्तानुदात्तस्वरितभेदेनोच्चारणज्ञानं स्वरविज्ञानम् । द्वयोरेव वेदपाठे महानुपयोगः। यथोक्तं -

**मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।**

**स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ।।**इति ।

वर्णेषु शषसानां वबयो रलयोरपि समुच्चारणे विशिष्टध्यानमपेक्षते । स्वराणामाद्युदात्तत्वेन वा अन्त्योदात्तत्वेन अर्थपार्थक्यं वा वाक्यार्थभिन्नत्वं भवति ।

प्रतिसंहितं शिक्षाग्रन्थोऽक्ष्यते किन्तु सम्प्रति ते त्रिंशत्सङ्ख्याका एव लभ्यन्ते । ते च याज्ञवल्क्य-वसिष्ठ-कात्यायन-पराशर-माण्डव्य-अमोघानन्दन-नारद-शौनक-गौतम-माण्डूक पाणिनि-प्रभृतिप्रणीता येषा पाणिनीयशिक्षा सर्वोत्कृष्टत्वेन गृहीता । शिक्षाग्रन्थाश्च सूत्रशैल्या

सङ्गृहीताः सन्ति । शिक्षाग्रन्थानां संरचनाकालः श्रीमन्नृपविक्रमार्कात् १५०० मितवत्सरपूर्वतः ५०० मितवत्सरपूर्वपर्यन्तं निर्धारितोऽस्ति । अधस्तनकालस्तु पाणिनिकालमपेक्ष्य निर्धारितः किन्तु पूर्वकालस्त्वनुमित एव ।

कानिचिच्छिक्षाशास्त्राण्यत्र सङ्क्षेपेण विविच्यन्ते -

**पाणिनीयशिक्षा -** शिक्षेयं दासीपुत्रस्य पाणिनेः कृतित्वेन सम्मता । अत्र हि मन्त्राणामुच्चारणविधिनिर्दिष्टोऽस्ति । अस्या अनेके टीकाग्रन्थाः लभ्यन्ते ।

**याज्ञवल्क्यशिक्षा -** शिक्षेयं याज्ञवल्क्यकृतित्वेन सम्मता शुक्लयजुर्वेदस्य वाजसननीय संहितासम्बद्धा । अत्र हि वैदिकस्वराणां सोदाहरणविवेचनपूर्वकं वर्णाना लोपागमविकारप्रकृतिभावादिसन्धीनाञ्च विवेचना कृताऽस्ति । तथैव वर्णानां भेदस्य स्वरूपस्य पारस्परिकसाम्यवैषम्ययोश्च विवेचनं दृश्यते तस्या इयं प्रतिज्ञावचनम् -

अथातस्त्रैस्वर्यलक्षणं व्याख्यास्यामः -

**उदात्तश्चानुदात्तश्च स्वरितश्च तथैव च ।**

**लक्षणं वर्णयिष्यामि दैवतं स्थानमेव च ॥'**

इति ।

**वासिष्ठी शिक्षा-**एषाऽपि शुक्लयजुर्वेदसम्बद्धैव । अत्र निर्दिष्टं यद्यजुर्वेदे ऋचां १४६७ मितसङ्ख्याऽस्ति यदा यजुषां २८२३ मिता ।

**कात्यायनी शिक्षा -** इयमपि तथा । अत्र हि जयन्तस्वामिनो विवृतिर्लभ्यते ।

**पाराशरी शिक्षा -** अस्यां हि १३० मिताः श्लोकाः सन्ति येषु स्वराणां वर्णानां सन्धेश्च विवेचनं लभ्यते ।

**माण्डव्यशिक्षा-** इयमपि यजुर्वेदसम्बद्धा । अत्र हि केवलमोष्ठ्यवर्णानां सङ्ग्रहो दृश्यते ।

**माध्यन्दिनी शिक्षा -** एषाऽपि तथैव । अत्र हि द्वित्वनियमविवेचनं दृश्यते ।

**वर्णरत्नप्रदीपिका -** अत्र हि वर्णानां स्वराणाञ्च विवेचनं लभ्यते ।

**केशवी शिक्षा-**अत्र हि प्राधान्येन स्वरविचारः ।

**नारदीयशिक्षा-**एषा सामवेदसम्बद्धा। अत्र हि शोभाकरस्य टीका समुपलभ्यते। एवमेव गौतमी शिक्षा लोमशौ शिक्षा च।

**माण्डूकी शिक्षा -** एषाऽथर्ववेदसम्बद्धा।

एतदतिरिक्तं मल्लशर्मशिक्षा, स्वराङ्कुरशिक्षा, षोडशश्लोकी शिक्षा, अवसाननिर्णयशिक्षा, स्वरभक्तिलक्षणशिक्षा, प्रातिशाख्यप्रदीपशिक्षा, क्रमसन्धानशिक्षा, गलदृक्शिक्षा, मनःस्वारशिक्षा च प्राकाशयमागताः सन्ति। श्रूयते च पञ्चाशन्मिता शिक्षाग्रन्थाः सन्तीति।

**प्रातिशाख्यम्**

प्रातिशाख्यमपि शिक्षाया एवं अङ्गम्। प्रातिशाख्यं प्रतिसंहितं विद्यत इति विश्वस्यते। अत्र हि उच्चारणं, स्वरविधानं, वर्णानां लोपागमादिविचारश्च वर्ण्यविषयाः। यथोक्तम् ऋग्प्रातिशाख्ये -

**"गुरुत्व लघुता साम्यं ह्रस्वदीर्घप्लुतानि च।**

**लोपागमविकाराश्च प्रकृतिर्विक्रमः क्रमः ॥**

**स्वरितोदात्तनीचत्वं श्वासो नादस्तथोभयम्।**

**एतत्सर्व तु विज्ञेयं छन्दोभाषामधीयता ॥"**इति।

केचित्तु छन्दसामपि विवेचनमस्ति। प्रातिशाख्यं हि एकतो व्याकरणस्य पूर्वपीठिकामाबध्नन्ति, अपरत संहितायाः पाठस्वरूपं विवेचयन्ति। अत्र समुपलब्धनां केषाञ्चित् प्रातिशाख्यानां सङ्क्षिप्तविवरणं प्रस्तूयते –

**ऋक्प्रातिशाख्यम् -** इदमुग्वेदस्याश्वलायनशास्त्रासम्बद्धम्। अत्र हि उष्वटेन कृतं भाष्यमपि लभ्यते। इदमष्टादशपटलेषु विभक्तम्। अत्र हि स्वरव्यञ्जनस्वरभक्तिरक्तनाभिप्रगृह्यादीनां परिभाषा प्रथमे पटले, द्वितीये तु प्रश्लिष्टक्षैप्रभुग्नोद्याह्यादिसन्धीनां लक्षणं, तृतीयादारभ्य नवमपर्यन्तं स्वरपरिचयः विसर्गसन्धिः नकारविकारः क्रमव्यञ्जनप्लुतसन्धयश्च, दशमैकादशयोः क्रमपाठविवरणं शेषेषूच्चारणादिविचारश्च वर्ण्यविषयाः।

**वाजसनेयिप्रातिशाख्यम् -** कात्यायनप्रणीतत्वेन प्रथितमिदं शुक्लयजुर्वेदस्य माध्यन्दिनशाखा सम्बद्धम् । इदमष्टास्वध्यायेषु विभक्तं यत्र हि परिभाषा-स्वर- संस्कारादीनां क्रमबद्धविवेचनं कृतमस्ति । तत्राद्ये पारिभाषिकशब्दानां लक्षणं, द्वितीये त्रिविधस्वराणां विवेचनं वैशिष्ट्यप्रतिपादनश्च, तृतीयादारभ्य सप्तमाध्यायपर्यन्तं सन्धीनां विवेचनं, चरमे वर्णानां गणना तथा स्वरूपविवेचनश्च । अत्र हि उव्वटभाष्यम्, अनन्तभट्टकृता व्याख्या च समुपलभ्येते। पाणिनीयव्याकरणे हि अस्मादनेकानि सूत्राणि गृहीतानि दृश्यन्ते । अतोऽनेन तत्पूर्ववर्तिना भाव्यमिति तर्कः ।

**तैत्तिरीयप्रातिशाख्यम् -** कृष्णयजुर्वेदसम्बद्धमिदं प्रातिशाख्यं द्वयोः खण्डयोः विभक्तं, प्रतिखण्डं द्वादशाध्यायाश्चेति । तत्र प्रथमेऽध्याये वर्णसमाम्नायशब्दस्थान-शब्दोत्पत्ति-विविधस्वर-विसर्गसन्धि-मूर्धन्यीभवनादीनां विवरणं,द्वितीये तु णत्वविधान-संहिता रूपविचरणादिवर्ण्यविषयाः । अत्र हि वररुचि- माहिषेय आत्रेय-सोमाचार्य-गोपालादीनां भाष्याणि लभ्यन्ते । इदं वाजसनेयि- प्रातिशाख्यानन्तरवति मन्यते किन्तु पाणिनिपूर्ववर्ति ।

**अथर्वप्रातिशाख्यम्** - अथर्ववेदसम्बद्धमिदं प्रातिशाख्यं सन्धि-स्वर-संहिता-पदादिविवेचनपरम् । अत्र हि प्रकृतिप्रत्ययविभागश्च प्रदर्शितोऽस्ति ।

**शौनकीयचतुरध्यायी -** इदमथर्ववेदस्य पैप्पलादशाखासम्बद्धस् । अत्रापि पूर्ववद्विषयक्रमः।

**सामप्रातिशाख्यम् -** सामतन्त्राभिधमिदं प्रातिशाख्यं सामवेदसम्बद्धम्। एवमेव पुष्पसूत्रं, ऋक्तन्त्रं च। एषु हि व्याकरणस्य विशिष्टपारिभाषिकशब्दानां लक्षणं, वर्णनमुच्चारण-स्थानादिविवरणं, सन्ध्यादिनियमाश्च वर्ण्यविषयाः । पुण्यसूत्रं प्राधान्येन गानसंहितया सम्बद्धम् ऋक्तन ं तु पदानामृचश्च पारस्परिक सम्बन्धनिर्धारणपरम् ।

इत्थं सुसमृद्धं प्रातिशाख्यसाहित्यं शिक्षाग्रन्थस्य परिशिष्ट व्याकरणसाहित्यस्य पूर्वपीठिका च। पाणिनीयव्याकरणस्य वैदिकप्रकरणं प्रायः प्रातिशाख्यानुगृहीतमेवेति।

**व्याकरणम्**

व्याकरणाङ्गेन साधुतया प्रसिद्धस्य शब्दस्य प्रकृतिप्रत्ययविश्लेषणमुखेन शब्दार्थस्वरूपसम्बन्धिनां विशेषधर्मणां लोपागमवर्णविकारादीनां च शास्त्रीयाः विशिष्टा आकृतयः प्रतिपाद्यन्ते। अत एव क्वचित् व्याकरणं नामापरं वेदाङ्गम्। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा अनेनेति व्युत्पत्त्या व्याकरणं हि शब्दव्युत्पत्तिपरकसाहित्यम्। यथाऽऽह भर्तृहरिः -

**"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।"** इति।

शब्दसाधुत्वामासाधुत्वव्याख्यानरूपेण व्याकरणेन हि पदादिविभागशः ऋग्वेदादयो ज्ञायन्त इति व्याकरणस्य न केवलं वेदाङ्गत्वमपितु वेदानां वेदत्वमपि। उक्तमेव यथा छान्दोग्ये -

**'वेदानां वेदं... अध्येयेम' (६।२)**

वेदव्याख्यानाय शब्दानुशासनस्य प्रतिशाख्यनिरुक्तव्याकरणरूपा समृद्धा परम्पराऽतिप्राचीनकालादेवाऽऽसीत्। व्याकरणं हि वेदाङ्गेषु मुख्यत्वेन गृहीतमपि दृश्यते। यथोक्तं महाभाष्ये-

**"ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च। प्रधानञ्च षट्स्वङ्गेषु व्याकरणम्। प्रधाने च कृतो यत्नः फलवान् भवति"** इति।

तथैव व्याकरणं हि वेदस्य मुखस्थानीयं मतं 'मुखं व्याकरणं स्मृतम्' इति पाणिनीयशिक्षादावप्युक्तत्वात्। तेन हि व्याकरणपरम्पराऽनादिकालादेव प्रचलिताऽऽसीत्। ब्राह्मणेष्वपि व्याकरणस्य क्रमबद्धमध्ययनं दृश्यते। स्वयमृग्वेदेऽपि तस्व स्वरूपावधारणं लभ्यते इति पण्डिताः। तत्प्रतिपादकमन्त्रश्च यथा-

**"चत्वारि शृङ्गा त्रयो अस्य पादा**

**द्वे शीर्षे सप्त हस्तास्सोते अस्य।**

**त्रिधा बद्धो वृषयो रोरवीति**

**महो देवो मर्त्यां आ विवेश ।।" ( ऋ० ४/५८/६ )**

अयं निरुक्तकारेण व्याख्यातो यश्चत्वारि शृङ्गा इति चत्वारो वेदाः, त्रयः पादा इति त्रीणि सवनानि, द्वे शीर्षे इति प्रायणीयो दयनीये, सप्त हस्तास इति सप्त छन्दांसि, त्रिधा बद्ध इति मन्त्रब्राह्मणकल्पैः रोरवीति इति रोरवणमस्य ऋग्भिः शेसन्ति, यजुभिर्यजन्ति, सामभिः स्तुवन्ति, देव इति यज्ञः इति । अयमेव व्याकरणस्वरूपनिर्देशकत्वे व्याख्यायते यद् चत्वारि श्रृङ्गा इति नामाऽऽख्यातोपसर्गनिपाता., त्रयः पादा इति भूतवर्तमानभविष्यदिति त्रयः कालयाः द्वे शीर्षे इति सुप्तिङौ, सप्त हस्तासः इति सप्त विभक्तयः स्वादयः, विधा बद्ध इति उरःकण्ठशिरः स्थानीयम् ।

पदानां प्रकृतिप्रत्ययविवेचनेन तस्य वास्तविकस्वरूपप्रतिपादनपरकशास्त्रमेव व्याकरणम् । विनैतदेकमपि वाक्यं न सिध्यतीति परं प्रमाणं व्याकरणस्य वेदानां वेदत्वस्य ।

महाभाष्ये व्याकरणस्य सामान्यतस्त्रयोदशप्रयोजनान्युक्तानि । तत्रापि शब्दानुशासनमेव व्याकरणस्य मुख्यं प्रयोजनम्। तच्च रक्षोहागमलध्वसन्देहार्थमेव यत्र रक्षा वैदिकशब्दानाम्, उहः, अर्थकल्पना प्रकृतिप्रत्ययविश्लेषणतः आगमो व्युत्पत्तिज्ञानं ज्ञाते च तस्मिन्सर्वं ज्ञातं भवति, लघु लघुनोपायेन शब्दज्ञानाय, असन्देहः सन्देहस्य प्रागभावायेति । तथैव अपभाषणविरहाय, दुष्टशब्दनिराकरणाय, अर्थज्ञानाय, धर्मलाभायाभिधानायापि शब्दानुशासनं ज्ञेयमिति । तेनैवोक्तं भवति -

**"सर्वार्थानां व्याकरणाद् वैयाकरण उच्यते ।**

**तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा ।।"**

व्याकरणस्य विशिष्ट्परम्परामुल्लिखन् भाष्यकारः कथयति - 'बृहस्पतिरिन्द्राय दिव्यं सहस्रवर्षं प्रतिपदोक्तानां शब्दानां पारायणं प्रोवाच' इति ।

शास्त्रान्तरवद् व्याकरणशास्त्रस्यापि ब्रह्मण एवोत्पत्तिं मत्वा प्रथमव्याकरणत्वेन ब्राह्मं व्याकरणमेव गृह्यते । कथ्यते यद् -

**"प्रथमं प्रोच्यते ब्राह्मं द्वितीयमैन्द्रमुच्यते ।**

**याम्यं प्रोक्तं तथा रौद्रं वायव्यं वारुणं तथा ।**

**सावित्रञ्च तथा प्रोक्तमष्टमं वैष्णवं तथा ।"**

तदेतज्ज्ञायते यत्प्रयमं ब्रह्मा समग्रं व्याकरणशास्त्रं प्रणीय बृहस्पतये प्रोवाच स चेन्द्राय स चान्येभ्यः । अतः खलु हीन्द्रः प्रथमः शब्दानुशासनपारज्ञः । यथोक्तं तैत्तिरीयसंहितायाम् -

**"वाग्वे वराच्यव्याकृतावदत् । ते देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुर्विति ।......... तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्" इति (६।४।७) ।**

उक्तिमिमां विवृणन् सायणाचार्येणोक्तम् -

'तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययविभागं सर्वत्राकरोत्' इति । एवमेव माहेश्वरश्च सम्प्रदायोऽपि प्राचीनतमत्वेनोल्लिखितः । महेश्वरः खलु वेदात् षडङ्गानि उद्धृत्य व्याकरोदिति महाभारते ( १२/२८४/१९२) ऽप्युक्तम् । तेन व्याकरणपरम्परा द्विमुखी दृश्यते बार्हस्वती माहेश्वरी च । ब्रह्मणा हि प्रणीतं व्याकरणशास्त्रमेकतो बृहस्पतिर्जग्राहापरतो महेश्वरः। बार्हस्पत्यं हि इन्द्रः प्रोक्तवान् यस्य कातन्त्रमपरं रूपम् । यच्च महेश्वरः प्रोक्तवांस्तस्य च पाणिनीयमपरं रूपम् । अत एवोक्तम् –

**"समुद्रवद् व्याकरण महेश्वरे तदर्धकुम्भोद्धरणे बृहस्पतौ ।**

**तद्भागभागाच्च शतं पुरन्दरे कुशाग्रविन्दूत्पतित हि पाणिनौ ॥" इति ।**

अनेन तु महेश्वरस्य प्रथमवैयाकरणत्वं सिध्यति । स्याद्यत्किञ्चित् । इदं तु निश्चयेन वक्तुं शक्यते यद् व्याकरणं हि प्रथमं शास्त्रं, यस्य परम्परा वेद वदनादिः । प्रथमं शिक्षासाहित्यं तत्परिशिष्टरूपे प्रातिशाख्यसाहित्ये च व्याकरणस्य व्यवस्थितमध्ययनं दृश्यते ।

प्रथमं हि वैदिकशब्दा एव व्याकरणस्य विषया आसन् । अनन्तरं तत्र लौकिकशब्दानामपि समावेशः सञ्जातः ।

व्याकरणसम्प्रदायस्य या महतो परम्परा श्रूयते. सा अष्टधा वा नवधा विभक्ता । यथा -

**ब्राह्ममैशानमैन्द्रश्च प्राजापत्ये बृहसतिम् ।**
**त्वाष्ट्रमाविशलिश्चेति पाणिनीयमथाष्टमम् ।।**

अपि च

**इन्द्रश्चन्द्रःकाशकृत्स्ना पिशलो शाकटायनः ।**
**पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ हि शाब्दिकाः ।।**

तथैव

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम् ।**
**सारस्वतं चापिशलं शाकल्यं पाणिनीयकम् ।।**

इत्यपि ।

तथैव भागुरि- माध्यन्दिन-व्याघ्रपाद स्फोटायन-व्याडि-काश्यप-गार्ग्य-गालव चाक्रवर्णन सेनक भारद्वाजादीनामपि तत्र तत्र वैयाकरणत्वेन प्रसिद्धिः श्रूयते ।

सत्यामपि गणनातीताचार्यपरम्परायां सम्प्रति तु पाणिनीयमेव व्याकरणं सर्वातिशयत्वं भजते।

पाणिनीयं हि व्याकरणं माहेश्वरापररूपं मतम् । तत्राष्टावध्यायाः द्वात्रिंशत्पादाः सूत्राणि च सन्ति । स्वीयायामष्टाध्यायां पाणिनिना स्वयमेव वृत्तिरपि कृताऽसीत्परं साऽधुना लुप्ता केवलमष्टाध्याय्येव सुलभा । अष्टाध्यायिनः कः प्रथमो वृत्तिकार इति सम्प्रत्यपि नैव निर्णीतम् तथापि भाष्यकारस्योल्लेखनादवश्यमेव तत्पूर्ववर्तिना भाव्यमिति प्रबलस्तर्कः । स च व्याडिर्वा वररुचिर्वा भवितुमर्हति । तत्रापि व्याडिः सङ्ग्रहप्रबन्धस्य महाभाष्यकारोऽपि स्मरति । सम्भवति प्रबन्धे वृतिग्रन्थोऽपि स्यात् । पाणिनिना वृत्तिग्रन्थोऽपि निरमायीति कथनमत्र विचारणीयं दृश्यते। एवमेव वररुचिरपि पाणिनसमकालीन एवेति कथासरित्सागराज्ज्ञायते । तत्र हि पाणिनिना सह वररुचेः शास्त्रार्थे पराजयस्ततस्तेन हिमालयगमनं तत्र शम्भोराराधनं शङ्करात्तस्यापि व्याकरणज्ञानाप्तिस्ततस्तस्य पाणिनीयव्याकरणे वृत्त्यादीनां

निर्माणञ्चेत्यादिकथा भणिताऽस्ति । अनेन वररुचेः वृत्तिकारित्वं सिध्यति । जयादित्यवामनयोः काशिकावृत्तिः प्रसिद्धा। पाणिनीयसूत्रे यदनुक्तं दुरुक्तं वा तत्कथनाय वा व्याख्यानाय कात्यायनेन वार्तिकानि कृतानि । एतादृशानां वार्तिकानां सङ्ख्या षट्त्रिंशोत्तराष्टशतं परित आगण्यते। एतत्सूत्रवृत्तिवार्तिकरूपग्रन्थत्रयोपरि महर्षेः पतञ्जलेर्महाभाष्यं लभ्यते । महाभाष्योपरि च कैयटस्य प्रदीपाख्या नागेशभट्टस्य उद्योताख्या भट्टोजिदीक्षितस्य शब्दकौस्तुभाख्या च विवृतिर्लभ्यते। एवमेव काशिकावृत्तौ जिनेन्द्रबुद्धेर्याव्याख्या हरदत्तस्य पदमञ्जर्यभिधा च वृत्तिर्लभ्यते ।

अष्टाध्याय्यां कालक्रमाल्लोकाभिनिवेशनाय ओरम्भट्टेन प्रणीता व्याकरण- दीपिका. जैनेन पुरुषोत्तमदेवेन भाषावृत्तिनामिका वृत्तिरपि प्रणीतोऽस्ति ।

एतदन्तरे धर्मकीर्तिनामा कश्चिद्वैयाकरणोऽध्यापनसौविध्यदृष्ट्या रुपावतारं नाम प्रक्रियाक्रमग्रन्यं प्रणीतवान् । अत्र हि पाणिनीयसूत्राणां शब्दसाधनापेक्षया विन्यासः कृतोऽस्ति न तु विषयक्रमेण । क्रमेण नारायणभट्टस्य प्रक्रियासर्वस्वं, प्रक्रियारत्नाख्योऽपरो ग्रन्थः विमलसूरिणो रूपमाला, रामचन्द्रस्य प्रक्रियाकौमुदी, भट्टोजिदीक्षितसम्पादिता सिद्धान्तकौमुदी, वरदराजसम्पादिता तस्यैवसंक्षिप्तरूपं मध्यसिद्धान्तकौमुदी लघुसिद्धान्तकौमुदी च सोमनाथशर्मारचिता प्रतिसंस्कृतासिद्धान्तकौमुदी, च प्रक्रियाग्रन्थेषूल्लेखनीयाः । एवमेव कृष्णकुतूहल - शब्दालङ्कार- पदचन्द्रिकाद्या ग्रन्थाश्च प्रक्रमेऽस्मिन् समुल्लेखनीयाः ।

एवञ्च वैयाकरणदर्शनाभिनिष्टात्मवाक्यपदीयं नाम ग्रन्थरत्नं भर्तृहरिप्रणीतं, गोकुलनाथप्रणीतः पदवाक्यरत्नाकरः इत्याद्या ग्रन्थाश्च विषयेऽस्मिन्नध्ययनीयाः ।

इत्थं सुसमृद्ध व्याकरणसाहित्यं संस्कृतसाहित्ये शब्दानुशासनस्य शास्त्र भाषिकसंरचना निर्धारकञ्च ।

**छन्दः -**

वैदिकमन्त्राः अभिन्नेषु छन्दस्सु निबद्धाः सन्ति। एषां मन्त्राणां साधुतया उच्चारणाय छन्दसां ज्ञानमपरिहार्यमस्ति। तथाचोक्तं कात्यायनाचार्येण "यो हवा अविदितार्यें यच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति स्थाणु वाच्छति, गर्ते वा पात्यते। प्रमीयते वा पापीयान् भवति" इति। तदिदं पादस्थानीयं छन्दोऽङ्गं क्रौष्टुक्यादिभिराचार्यैः उक्तमपि श्रूयते परमद्यत्वे पिङ्गलकृतं कात्यायनकृतञ्च छन्दःसूत्रद्वयं प्राप्यते।

## पुनरावृत्तिः (Recap)

- वेदार्थबोधाय सहायकाः वेदाङ्गाः।
- शिक्षा कल्पःव्याकरणं, निरुक्तं , छन्दः, ज्योतिषं च वेदाङ्गाः।
- शिक्ष्यते प्रतिबोध्यते वर्णाद्युच्चारणमनयेति शिक्षा।
- शिक्षायां अक्षरज्ञानं, स्वरविज्ञानं, सन्धिविज्ञानं, निवृत्तिविज्ञानं, संहितापाठाः, पदपाठश्चेत्यादि विषयाः समाविष्टाः।
- सम्प्रति त्रिंशत्संख्याकाः शिक्षाग्रन्थाः लभन्ते।
- पाणिनीय-याज्ञवल्क्य-वासिष्ठ- कात्यायनी- पाराशरीशिक्षाः प्रमुखशिक्षाग्रन्थाः।
- व्याकरणं हि वेदाङ्गेषु मुख्यत्वेन गृहीताः।
- मुखं व्याकरणं स्मृतम्।
- पाणिनीयं हि व्याकरणं माहेश्वरापररूपं मतम्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.किमर्थं वेदाङ्गाः सहायकाः भवन्ति ?

2.किं वेदस्य मुखत्वेन ज्ञायते ?

| |
|---|
| 3.शिक्षा वेदस्य किं भवति ? |
| 4.पाणिनीयशिक्षायां किं निर्दिष्टोऽस्ति? |
| 5.केशवीशिक्षायां केषां विचारः भवति ? |
| 6.प्रातिशाख्यं कस्याः अङ्गं भवति ? |
| 7.पाणिनीयसूत्रे कति अध्यायाः सन्ति ? |
| 8.भट्टोजिदीक्षितस्य व्याकरणग्रन्थः कः ? |

**एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।**

**(Answer the following questions in one or two sentences)**

| |
|---|
| 1.वेदाङ्गानि कानि ? |
| 2.शिक्षायां किं किं समाविष्टाः सन्ति? |
| 3.प्रमुखाः शिक्षाग्रन्थाः के ? |
| 4.प्रमुखाः व्याकरणग्रन्थाः के ? |
| 5.शिक्षायाः प्रयोजनं किम्? |
| 6.व्याकरणं नाम किम् ? |

**एकैकया खण्डिकया उत्तराणि लिखत।**

**(Answer the following questions in a paragraph)**

| |
|---|
| 1.पाणिनीयशिक्षायाः प्रतिपाद्यविषयं किम् ? |
| 2.वाजसनेयिप्रतिशाख्यम् । |
| 3.अथर्वप्रतिशाख्यम् । |

## निर्दिष्टाभ्यासः (Assignments)

| |
|---|
| 1.मुखं व्याकरणं स्मृतम्  इति उक्तिं समर्थयत। |
| 2.शिक्षा घ्राणं तु वेदस्य इति वाक्यं समर्थयत। |

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

| |
|---|
| 1.वेदार्थबोधाय |
| 2.व्याकरणम् |
| 3.घ्राणम् |
| 4.मन्त्राणां उच्चारणविधिः |
| 5.स्वराणां |
| 6.शिक्षायाः |
| 7.अष्टौ |
| 8.सिद्धान्तकौमुदी |

## सूचनाग्रन्थाः


1. संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

2.ऋक्सूत्रसन्दर्शिका–बालगोविन्दझा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2012)

3.वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2016)

# Unit 2

# ज्योतिश्शास्त्रम् ,निरुक्तं, कल्पश्च

## उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- वेदाङ्गानां प्राधान्यमवगच्छति।
- वेदाङ्गेषु कल्पनिरुक्तज्योतिषशास्त्राणां सामान्यज्ञानमार्जयति।

## प्राग्व्यपेक्षाः (Pre requisites)

साम्प्रतिके वैज्ञानिकेऽपि युगे समग्रस्य भूभागस्य प्राचिनतमो ग्रन्थः वेद एव। अस्य जगतः धारणं पोषणं चापि शाश्वतेन वैदिकशब्दराशिना एव भवति। "बिभर्ति सर्वभूतानि वेदशास्त्रं सनातनम्" इति मनुवचनमिह प्रमाणभूतमस्ति। मानवस्य मानवतायाश्च प्राचीनतमस्वरूपस्य परिज्ञानाय तद्विकासक्रमानुसन्धानाय च वेदानुशीलनमावश्यकमेव भवति। पाश्चात्या बहवो मनीषिणोऽपि वेदवाङ्मयानुशीलने कृतजीवनोत्सर्गाः "निष्कारणं षडङ्गो वेदोऽध्येयो ज्ञेयश्च" इति प्राचीनमुद्घोषं साम्प्रतिकंऽपि काले नूनं परिपोषयन्ति ।

वेदा हि दुरुहाः। एतेषामर्थावगमः सामान्यतया कर्तुं न शक्यः । अतस्तेषामर्थप्रत्यायनायैव आचार्यैः षडङ्गग्रन्थाः रचिताः। तेनेदं निश्चीयते यत् वेदार्थप्रतिपत्तये एषामध्ययनमावश्यकम्। प्रसंगादिह ज्योतिश्शास्त्रस्य,निरुक्तस्य कल्पस्य च परिचयः संक्षेपेण प्रस्तूयते।

## प्रधानांशाः/प्रधानपदानि (Key words)

चक्षुः, शुभमुहुर्तः, यज्ञः, कालविधानशास्त्रं, निरुक्तं, श्रोत्रम्, कल्पनाशास्त्रम्,धर्मसूत्रम्, शुल्बसूत्रम्

## विशदीकरणम् (Discussion)

### ज्योतिषम्

इदं च षष्ठमङ्गं चक्षुःस्थानीयं कालविज्ञापकं शास्त्रमस्ति । प्रातरुदिते जुहोति, वसन्ते वसन्ते ज्योतिषा यजेत, फल्गुनीषु मुह्यते एवं विधेषु कर्मानुष्ठानेषु गूढार्थज्ञानाय ज्यौतिषशास्त्रस्य महत्त्वपूर्णं स्थानमस्ति। यतो हि शुभमुहूर्त एव क्रियमाणानि कर्माणि फलाय कल्पन्ते, नान्यथा। अतः तन्मुहूर्तकालज्ञानञ्च ज्यौतिषाङ्गं साधयति । तथाचोक्तमस्ति-

**वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।**

**तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद वेदान् ॥ इति।**

तस्यास्य वेदाङ्गज्यौतिषग्रन्थत्रयं साम्प्रतं प्राप्यते। क. आर्षज्यौतिषं पञ्चाशत्पद्यात्मकम्। ख यजुष्ज्यौतिषमष्टचत्वारिंशत्पद्यात्मकम्। ग. आथर्वणज्यौतिषं द्विपठ्युत्तरशतपद्यात्मकञ्च ।

### ज्योतिषस्य प्राधान्यम्

वेदपुरुषस्य नेत्रं भवति ज्योतिषमित्युक्तम्। नेत्राभ्यां वस्तुनः याथार्थ्यम् ज्ञातुं शक्यते। ज्योतिषं वेदस्वरूपं ज्ञात्वा यागादिकं उचितसमये करणाय साहाय्यति। उचिते काले समये च कर्मकरणं सत्फलदायकत्वं जायते। भविष्यत्कालदर्शनेन जीविते अनुकूलं साहचर्यम् उत्पादयितुं श्रमः कर्तुं शक्यते इति लाभः ज्योतिषज्ञानेन सिद्ध्यति। जीवितं सुखदुःखमिश्रितमेव। सर्वेषां मानवानां जीविते दुःस्थितिः संभवेत्। अतः कष्टकालसमयः चेत् तदनुसृत्य सन्नद्धतामार्जयितुं शक्यते। अतः एव वेदकालादारभ्य ज्यौतिषशास्त्रस्य आरम्भः भारते संजातोऽस्ति।

मयूराणां शिखा इव सर्पाणां रत्नमयः इव ज्योतिषं वर्तते। ज्योतिषे गणितस्य महत्प्राधान्यं वर्तते।

ज्योतिषे त्रयः भागाः – होरा -सिद्धान्त-संहिताभेदात्। ज्यौतिषसाहित्यमपि संहितावदेव प्राचीनम्। ज्योतिषविषये अनेके ग्रन्थाः सन्ति। तेषु लब्धास्थेन पण्डितेन प्रणीता वेदाङ्गज्यौतिष.... लघुग्रन्थः प्रसिद्धः। तस्मिन् वेदसंहितासु ब्राह्मणादिषु ज्योतिषविषये यदुक्तं तत्संहृत्य लिखितमासीत्। अस्मिन् 241 श्लोकाः सन्ति।

ज्यौतिषसंबद्धाः अष्टादश आचार्याः सन्ति। ते सूर्यः, पितामहः, व्यासः, वसिष्ठः, अत्रिः, पराशरः, कश्यपी, नारदः, गर्गः, मरीचिः, मनुः, अङ्गिरः, लोमशः, पुलिशः, च्यवनः, यनवः, भृगुः, शौनकः च आसन्।

ज्यौतिषसम्बद्धाः लौकिकाः अनेके ग्रन्थाः । तेन ग्रन्थानां नामानि ग्रन्थकर्तृणां च नामानि अधो दीयन्ते।

| |
|---|
| आर्यभटः – आर्यभटीयम् |
| वराहमिहिरः – पञ्चसिद्धान्तिका, बृहत्जातकम्, लघुजातकम् |
| ब्रह्मगुप्तः – ब्रह्मस्फुटसिद्धान्तः,खण्डखाद्यम्, ध्यानग्रहः |
| लल्लः – रत्नकोशः |
| उत्पलाचार्यः – तत्तद्ग्रन्थटीकाः |
| भोजदेवः – राजमृगाङ्ककरणम् |
| भास्कराचार्यः – सिद्धान्तशिरोमणिः, करणकुतूहलम् |
| केशवः – ग्रहकौतुकम्, मुहूर्ततत्त्वं, जातकपद्धतिः |
| गणेशः – ग्रहलाघवम् |
| कमलाकरः – सिद्धान्ततत्त्वविवेकः |
| गणितशास्त्रं, शकुनशास्त्रं च ज्यौतिषस्याङ्गशास्त्रे भवतः। |

**निरुक्तम्**

वेदाङ्गेषु श्रोत्रस्थानीयमिदं निरुक्तम्। निरुक्तं श्रोत्रमुच्यते इति वचनमिह प्रमाणभूतमस्ति। निरुक्तं हि नाम पदविभागमन्त्रार्थदेवतानिरूपकं हि शास्त्रम्। "निरुच्यते निःशेषेण उपदिश्यते निर्वचनविधया तत्तदर्थावबोधनाय पदजातं येन यत्र वा तन्निरुक्तम्"। अयमेवार्थ: आचार्यसायणस्य निरुक्तलक्षणेनापि सिध्यति । तथा चोक्तं तेन अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्। निरुक्तमिदं निघण्टुग्रन्थस्य टीका अस्ति। निघण्टुश्च वैदिकशब्दकोषभूतः। अयं ग्रन्थः पञ्चसु अध्यायेषु विभक्तः। तत्र गोशब्दमारभ्य देवपर्यन्तशब्दं यावत् वैदिकपदानि अत्र व्याख्यातानि सन्ति। तथा चोक्तमादावेव समाम्नायः, समाम्नातः स व्याख्यातव्यः। अर्थात् गवादिर्देवपर्यन्तशब्दसमुदायः मन्त्रार्थपरिज्ञानाय ऋषिभिर्ग्रन्थीकृतः। स व्याख्यातव्यः, अर्थात् विभज्य इमानि अत्र नामानि,इमानि आख्यातानि, इमे उपसर्गा, इमे निपाताः एवं रीत्या निर्वक्तव्य इति। तमिमं समाम्नायं (वैदिकशब्दकोषम्) निघण्टव इत्याचक्षते आचार्याः।

एते च गवादिर्देवपत्यन्तशब्दाः अन्येभ्यः समाहृत्य समाहृत्य समाम्नातः ग्रन्थीकृता इत्यर्थः। अनेनात्र निश्चीयते यत् निघण्टुग्रन्थस्य टीका एव निरुक्तशास्त्रमिदमस्ति। निघण्टुग्रन्थस्य कर्ता प्रजापतिः कश्यप आसीत् इति आचार्याणां सिद्धान्तः।

अस्यैव निघण्टुग्रन्थस्य भाष्यकारः आचार्ययास्कः अस्ति। साम्प्रतं वेदाङ्गत्वेन यास्करचितोऽयं निरुक्तग्रन्थ एव स्वीक्रियते। अस्मिन् निरुक्तग्रन्थे त्रीणि काण्डानि सन्ति।

1. नैघण्टुककाण्डम्, 2. नैगमकाण्डम्, 3. दैवतकाण्डञ्च। तथा चोक्तमस्ति

**आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा।**
**तृतीयं दैवतं चेति समाम्नायस्त्रिधा स्मृतः।।**
**गौरद्यपारपर्यन्तमाद्यं नैघण्टुकं मतम् ।**
**जहाद्युल्वमृषीसान्तं नैगमं सम्प्रचक्षते ।।**
**अग्न्यादिदेवपत्यन्तं दैवतं काण्डमुच्यते।**

अस्मिन् ग्रन्थे चतुर्दश अध्यायाः विलसन्ति। केषाञ्चिदाचार्याणां मते अन्तिममध्यायद्वयपरिशिष्टमिति। तत्र प्रथमेऽध्याये भगवता यास्कंन पदानां चतुर्धा प्रकारः नामाख्यातोपसर्गनिपातभेदेन निर्दिष्टः। नामाख्यातयोर्लक्षणक्रमे तैरेवं प्रत्यपादि यत् भावप्रधानमाख्यातं सत्वप्रधानानि नामानि। अनन्तरं च यास्कमतं विंशतिः उपसर्गाः चतुर्दशनिपाताश्च परिगणिताः सन्ति। येषां विस्तृतरूपेण चर्चा प्रथमेऽध्याये कृता । षड्भावविकाराः शास्त्रारम्भप्रयोजनं मन्त्राणामनर्थकत्वाक्षेपपुरस्सरं मन्त्राणामर्थवत्वम्, अर्थज्ञस्य प्रशंसा चेत्यादिविषया षट्सुपादेषु विस्तरेण तेन चर्चिताः। तदनु द्वितीयाध्यायस्य प्रथमपादपर्यन्तं ग्रन्थस्य भूमिका अस्ति। इतः आरभ्य तृतीयाध्यायपर्यन्तं नैघण्टुककाण्डे समागतानां प्रधानभूतानां वैदिकपदानां निर्वचनं तेन कृतम्। तृतीयेऽध्याये एव प्रसङ्गतः औरसपुत्राणां श्रेष्ठत्वम्, दायभागविषयेऽपि तेन चर्चा कृता।

चतुर्थाध्यायमारभ्य षष्ठाध्यायपर्यन्तं निघण्टोः चतुर्थाध्यायस्य नैगमकाण्डस्य व्याख्या अस्ति। ऐकपदिककाण्डेनापि अस्य व्यवहारो भवति। अत्र अनवगतसंस्कारविशेषाः शब्दाः तथा अनेकार्थकाः शब्दाश्च संकलिताः सन्ति। एतेषामेव शब्दानां निर्वचनं कृतमस्ति। तथा चोक्तमस्ति - "अध यान्यनेकार्थानि एकशब्दानि तान्यतोऽनुक्रमिष्यामः।
तत्त्वं पर्यायशब्देन व्युत्पत्तिश्च द्वयोरपि । निगमो निर्णयश्चेति व्याख्येयं नैगमे पदे ॥"

एवं जहेति पदमारभ्य ऋबीषान्तं यावत् पदानां निर्वचनमत्र वर्णितम्। सप्तमाध्यायमारभ्य द्वादशाध्यायपर्यन्तं भगवता यास्केन देवविद्यायाः प्रतिपादनं कृतम्। अत्र विभागद्वयं समवलोक्यते। प्रथमे विभागे देवविद्यायाः आधारभूतसिद्धान्तानां निरूपणं, द्वितीये च विभागे दैवतकाण्डे संकलितानां देवतानां स्वरूपनिरुपणमस्ति। त्रयोदशेऽध्याये देवतानामतिस्तुतिविषयकाणां मन्त्राणां व्याख्यानं तेन कृतम्। चतुर्दशेऽध्याये मरणानन्तरं जीवस्य कीदृशी गतिर्भवति, अथ च पुनः शरीरधारणं कथं जायते इत्यादि आध्यात्मिकविषयाः अत्र निरुपिताः सन्ति। एवमिह निरुक्तशास्त्रस्य अध्यायगतविषयाः परिचयमुखेन उपन्यस्ताः।

**कल्पः**

वेदोक्तकर्मणासानुपूर्वेण कल्पनया कल्पसहित्यस्य कल्पत्वम् । यथोक्त मृक्प्रातिशााख्ये-

**कल्पो वेदविहितानां कर्मणामानुपूर्वेण कल्पनाशास्त्रम् ।"**

साहित्यमिदं ब्राह्मणत्साहित्येन सह प्रत्यक्षतः सम्बद्धम् । ब्राह्मणेषु निरूपितानां यज्ञानां क्रमबद्धनिरूपणमेव कल्पसाहित्यस्य प्रयोजनम् । इदञ्च कल्पसाहित्यं श्रौतसूत्र-गृह्यसूत्र-धर्मसूत्र-शुल्बसूत्रभेदाच्चतुर्धा विभक्तस् । अथैषां सङ्क्षेपतो विवरणं प्रस्तूयते -

**श्रौतसूत्रम् -** श्रौतसूत्रं हि वेदोक्तयागादीनां क्रमबद्धमध्ययनम् । अत्र हि दर्श-पूर्णमास-पिण्डपितृयाग- आग्रयणेष्टिचातुर्मास्य-निरूढपशु-सोमयाग-सत्र-गवानयन-वाजपेय-राजसूय-सौत्रामणि-अश्वमेध-पुरुषमेध-अहीनादीनां यथाक्रम विवेचनं लभ्यते । प्रतिसंहितं पृथगेव श्रौतसूत्रं कल्प्यते । किन्तु सम्प्रति ऋग्वेदस्य आश्वलायनशाङ्खायनभिधे द्वे एव श्रौतसूत्रे यजुर्वेदस्य एकमेव कात्यायनाभिधं, कृष्णयजुर्वेदस्य बोधायन-आपस्तम्ब-हिरण्यकेशीय-सत्याषाढ-वैखानस-भारद्वाज- मानवादिश्रौत्रसूत्राणि, सामवेदस्य लाट्यायन-द्राह्यायण-राणायनीयाभिधानि त्रीणि अवर्ववेदस्य वैतानाख्यमेकमेव श्रौतसूत्रं च समुपलभ्यन्ते । कात्यायनश्रौतसूत्रे कर्काचार्यस्य भाष्यमपि लभ्यते। अत्र हि पञ्चविशाध्यायाः ।

**गृह्यसूत्रम् -** गृहे भवं गृह्यमिति गृहस्थकर्मसम्बद्धं यत्कर्म तादृशकर्मनिरूपकं सूत्रम् । गृह्यसूत्रे प्राधान्येन यज्ञाग्निसन्दीपनं गृह्ययज्ञविभाजनं, सायंप्रातःपूजा, पक्वान्नहवनं, वार्षिककृत्यं, संस्कारा निषेकादिनिधनान्ताः षोडश वा चत्वारिशत्, छात्रधर्माः, स्नातकनियमाः, श्राद्धकर्म, मधुपर्कविधानमित्याद्या विषयाः प्रतिपाद्याः । प्रतिवेदं पृथगेव गृह्यसूत्रमिति विश्वस्यते किन्तु सम्प्रति द्वादशैव गृह्यसूत्राणि लभ्यन्ते । तेषां सङ्क्षिप्तविवरणमत्र प्रस्तूयते -

तत्र ऋग्वेदसम्बद्धानि त्रीण्येव गृह्यसूत्राणि आश्वलायन-शाङ्ङ्खायन-कौषीतकसंज्ञितानि । तत्र प्रथमे चत्वारोऽध्याया यत्र गृह्यकर्मणां संस्काराणाञ्च वर्णनं दृश्यते । शाङ्खायने षडध्यायाः

यत्र गृहनिर्माणं, गृहप्रवेशविधिश्च विशेषेण वर्ण्यविषयाः। कौषीतके संस्काराणां वैश्वदेवविधेः कृषिकर्मणः श्राद्धविधेश्च विशेषेण वर्णनं लभ्यते। चरमाऽध्याये पितृमेघवर्णनम्।

यजुर्वेदसम्बद्धमेकमेव गृह्यसूत्रं पारस्कराख्यम् । अत्र त्रीणि काण्डानि यत्र प्रथमे आयममाग्न्याधानं विवाहः गर्भाधानादरभ्यानप्राशनपर्यन्तसंस्काराणां वर्णनं च वर्ण्यविषयाः, द्वितीये चूडोपनयनसमावर्तनपञ्चमहायज्ञश्रवणाकर्म सीतायज्ञादीनां वर्णनम् । अन्तिमकाण्डे श्राद्धविकीर्णिप्रायश्चित्तादिविधानम्। अत्र हि कर्कजयरामगदाधरहरिहरविश्यनाथादीनां भाष्याणि लभ्यन्ते।

कृष्णयजुर्वेदसम्बद्धानि गृह्यसूत्राणि बौधायन-आपस्तम्ब-सत्याषाढ-भारद्वाज-मानव-काठकाभिधानि। सर्वेष्वेव वर्ण्यविषयस्तु प्रायः समान एव।

सामवेदीयानि गृह्यसूत्राणि तु गोभिलवादिर जैमिनीयाभिधानि।

अथर्ववेदसम्बद्धमेकमेव गृह्यसूत्रं कौशिकाख्यम् । इदं हि चतुर्दशाध्यायेषु विभक्तम् । अत्र हारिलस्य केशवस्य च व्याख्या लभ्यते।

इत्थं सुसमुद्धं गृह्यसूत्रसाहित्यं संस्कृतसाहित्यकानने दृढमूलवृक्षम्।

**धर्मसूत्रम्** - धर्मसूत्रं नाम कल्पसूत्रस्य तृतीयः प्रकारः । अत्र हि वर्णानामा-श्रमाणाञ्चाचारवर्णनेन सहैव राज्ञा कर्तव्यमपि निरूपितमस्ति । इमानि खलु तात्कालिक जीवनस्य दर्पणा एव । गौतम-बौधायन-आपस्तम्ब हिरण्यकेशि-वसिष्ठ- विष्णु-हारीत शङ्खलिखिताभिधान्येव धर्मसूत्राणि समुपलभ्यानि। धर्मस्वरूपं, चतुर्णामेव वर्णानामाचाराः कर्तव्यानि जीवनवृत्तयश्च, चतुर्णामेवाश्रमाणामाचाराः, मिश्रितजातेः स्वरूपादिविवेचनं, सपिण्डनं, पापास्तेषां प्रायश्चित्तानि च, व्रतानां नियमाः, आशौचं, न्यायव्यवहारौ, राजधर्माः, स्त्रीधर्माः, पुत्रविचारः, स्त्रीधनं, दायव्यवस्था चेत्याद्या धर्मसूत्रस्य विषयाः।

**शुल्वसूत्राणि**-शुल्वं नाम रज्जुस्तेन शुल्वसूत्रं नाम वेद्या मापनिर्धारकसाहित्यं श्रौतसूत्रसम्बद्धम्। सम्प्रति त्रीण्येव शुल्वसूत्राणि लभ्यन्ते बौधायन- आपस्तम्ब -कात्यायनाभिधानि । तत्र शुक्लयजुर्वेदीयं कात्यायनशुल्बसूत्रं, कृष्ण- यजुर्वेदीये बोधानायपस्तम्बाख्ये ।

केचित्तु कल्पसूत्रं श्रौतस्मार्तभेदेन द्विधा विभज्य श्रौतस्य श्रौतशुल्वाख्ये द्वे कल्पसूत्रे स्मार्तस्य गृह्यधर्माख्ये द्वे ते इति कथयन्ति । स्यादेवमपि ।

भारतीयजीवने सूत्रसाहित्यस्य महती उपदेयता दृष्यते । एतद्धि भारतीय- जीवनपद्धतेर्दर्पण एव । इह विशेषतो धर्मसूत्रेषु वर्णाश्रमधर्मदृष्ट्या भारतीयजीवनर्वहणाय सङ्गतिश्चेष्टिता । इहैव चतुर्णां वर्णानामाश्रमाणाञ्च साङ्गोपाङ्गं विवेचनं लभ्यते । अत्र हि सर्वेषामपि कर्तव्यैः सह धार्मिक्यः प्रथा निरूपिताः सन्ति । ब्राह्मणानां परिशिष्टत्वेनैषां वेदाङ्गत्वम् ।

## पुनरावृत्तिः (Recap)

- ज्योतिषम् षष्ठमङ्गः चक्षुः स्थानीयं कालविज्ञापकं शास्त्रमस्ति।
- वेदाङ्गेषु निरुक्तं श्रोत्रस्थानीयं अस्ति।
- यास्कस्य निरुक्तग्रन्थे नैघण्डुकाण्डं, नैगमकाण्डं, दैवतकाण्डं इति त्रीणि काण्डानि सन्ति।
- कल्पः वेदविहितानां कर्मणामानुपूर्वेण कल्पनाशास्त्रम्
- कल्पसाहित्यं श्रौतसूत्रं, गृह्यसूत्रं, धर्मसूत्रं, शुल्बसूत्रं इति चतुर्धा विभक्ता।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.कालविज्ञापकं वेदाङ्गं किम् ?

2.वेदाङ्गेषु श्रोत्रस्थानीयं किम् ?

3.यास्कस्य निरुक्ते कति काण्डानि सन्ति ?

4.वेदोक्तयागादीनां क्रमबद्धमध्ययनं कस्मिन् दृश्यते ?

5.यजुर्वेदसंबद्धगृह्यसूत्रस्य नाम किम् ?

| |
|---|
| 6.कल्पसूत्रस्य तृतीयः प्रकारः कः ? |
| 7.यजुष्ज्यौतिषे कति श्लोकानि सन्ति ? |
| 8.निघण्डुग्रन्थस्य भाष्यकारः कः ? |
| 9.यास्केन पदानां कति प्रकारः निर्दिष्टः ? |

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

**(Answer the following questions in one or two sentences)**

| |
|---|
| 1.वेदाङ्गज्योतिषग्रन्थत्रयाणां नामानि लिखत। |
| 2.निरुक्तस्य निर्वचनम् किम् ? |
| 3.निरुक्तस्य त्रीणि काण्डानि कानि ? |
| 4.कल्पसाहित्यस्य विभागानां नामानि लिखत। |
| 5.कल्पसाहित्यस्य प्रयोजनं किम् ? |

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

| |
|---|
| 1.श्रौतसूत्रम्। |
| 2.धर्मसूत्रम् विशदयत। |
| 3.ऋक्प्रातिशाख्यम् विशदयत। |

## निर्दिष्टाभ्यासः (Assignments)

| |
|---|
| 1.ज्योतिषं वेदस्य चक्षुःरूपेण ज्ञायते ।समर्थयत। |

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

| |
|---|
| 1.ज्योतिषम् |

2.निरुक्तम्

3.त्रीणि

4.श्रौतसूत्रे

5.पारस्कराख्यम्

6.धर्मसूत्रम्

7.चत्वारिंशत्

8.यास्कः

9.चत्वारः

## सूचनाग्रन्थाः


1. संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

2.ऋक्सूत्रसन्दर्शिका–बालगोविन्द झा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2012)

3.वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2016)

# Unit 3

# उपवेदेषु आयुर्वेदः धनुर्वेदश्च

## उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- ऋग्वेस्योपवेदं आयुर्वेदं परिचिनोति।
- यजुर्वेदस्योपवेदं धनुर्वेदं जानाति।

## प्राग्व्यपेक्षाः (Pre requisites)

उपवेदो नाम मूलवेदान्निःसृतो वेदः । वेदान्समभ्यस्य तत्र तत्र व्यस्तरूपेण स्थितं विषयविशेषमादाय प्रणीतो वेद एव उपवेदसंज्ञितः । स च चतुर्विधः आयुर्वेदः, धनुर्वेदः, गन्धर्ववेदः, अर्थवेदश्च । तेषु आयुर्वेदः प्राधान्येन ऋग्वेदनिष्पन्नः, धनुर्वेदः यजुर्वेदस्य विषयः, गान्धर्ववेदः सामवेदसम्बद्धः अर्थवेदश्चाथर्ववेदभवं इति । तत्तत्सम्बद्धविषया चतुर्ष्वेव वेदेषु समुपलभ्यन्ते तथापि प्राधान्यविवक्षया तेषां वेदविशेषमूलत्वमुक्तम् ।

## प्रधानांशाः/प्रधानपदानि (Key words)

त्रिदोषाः,प्राणशक्तेः सन्तुलनम्, असन्तुलनं, अनारोग्यं, चरकसंहिता, शारीराः, मानसाः, धनुर्वेदः, चत्वारः पादाः

## विशदीकरणम् (Discussion)

आयुर्वेदः भारतस्य पारम्परिकः चिकित्साव्यवस्था अस्ति यस्य इतिहासः ४,००० वर्षाणाम् अतीतः अस्ति । शरीरस्य प्राणशक्तेः प्राणस्य वा असन्तुलनात् रोगाः उत्पद्यन्ते इति सिद्धान्ते

आधारितम् अस्ति । अस्य प्राणस्य सन्तुलनं दोषाख्यत्रयाणां भौतिकगुणानां सन्तुलनेन निर्धारितं भवति- वातः पित्तः कफं च । अधिकांशजनानां एकः प्रबलः दोषः भवति, दोषत्रयेषु विशिष्टः सन्तुलनः व्यक्तितः भिन्नः भवति ।

## आयुर्वेदः

आयुर्वेदो हि आयुर्विज्ञानसम्बद्धः । अत्र हि प्राधान्येन रोगास्तन्निदानोपायश्च वर्ण्यन्ते । कथ्यते यदसो ब्रह्मणा वेदानभ्यस्य जनकल्याणहेतवे आदौ सृष्टः । तं ततश्च प्रजापतिर्जग्राह, प्रजापतेरश्विनौ, अश्विभ्यामिन्द्रः ततो धन्वन्तरिर्भरद्वाजश्च, ताभ्याञ्च सुश्रुत उश्भ्र-अग्निवेश-भेलप्रभूतयस्तमगृह्णन् । स च पश्चाद्बहुधा व्याख्यातोऽनन्तशाखत्वं प्राप्तः । अस्य च त्रीणि प्रस्थानानि हेतुर्लक्षणमौषधज्ञानञ्च । अस्य च प्रधाना आचार्याश्चरकसुश्रुतवाग्भटमाधव-शाङ्गर्धरभावमिश्रप्रभृतयः । चरकसंहितास्य समुपलब्धेषु ग्रन्थेषु प्राचीनतमा संहिता ।

इदमप्युच्यते यच्छरीरशक्तिदौर्बल्यात्पुरुषार्थसिद्धो समुत्पन्नबाधानिराकरणाय महर्षयः हिमालये समवेताः सन्तो मन्त्रणाञ्चक्रुः । ते चायुर्वेदज्ञानाय भरद्वाजमिन्द्रसकाशं प्रेषयामासुः । स च तत्र गत्वेन्द्रमाराध्यायुर्वेदज्ञानं प्राप्य पुनर्भुवं प्रत्यागत्यायुर्वेद प्रचारयामासेति । नितान्त जटिलत्वात्तं ब्रह्मा मुनीनामनुरोधेन शल्य-शालाक्य-कायचिकित्सा-भूतविद्या-कौमारभृत्य-अगदतन्त्र-रसायन-वाजीकरण-भेदादष्टधा विभज्य पृथक्पृथग्ग्रन्थान् निर्ममे । तत्र शल्यचिकित्सां धन्वन्तरिः कायचिकित्सां पुनर्वसुः जगृहतुः । पुराणेषु तु धन्वन्तरिरेवाष्टाङ्ग विभाजकत्वेन सम्मतो दृश्यते । स हि प्रथमद्वापरस्यान्ते काशीराजशौनहोत्राज्जन्मावाप्य भरद्वाजादायुर्वेदमधीतवान् । तत्प्रणीतं हि धन्वन्तरिसूत्रमायुर्वेदशास्त्रे प्रामाणिकग्रन्थत्वेन सम्मतम् । तद्पूर्वमपि पुष्कलसंहिता ब्रह्मसंहिता भेलसंहिता-अग्नीध्रसूत्रराजकिरणप्रभा-धातुवादप्रभुतयो ग्रन्थाः प्रचलिता आसन् । मानससूत्रमपि प्रकरणेऽस्मिन् स्मरणीयं मन्यते । लौकिकपरम्परायां तु चरक एवाद्याचार्यो व आयुर्वेदविषये प्रामाणिकं ग्रन्थं प्रणिनाय। चरकानन्तरमपि सुश्रुतवाग्भटमाधवशाङ्गर्धरभावमिश्रादिभिरायुर्वेदसम्बद्धा ग्रन्थाः प्रणीताः।

तेषां लक्षणं, व्यवहारं, जीवनशैलीं च पृच्छन् नेत्रजिह्वात्वक् सहितं तेषां समग्रस्थितिं अवलोक्य तेषां नाडीं अनुभवित्वा तेषां मूत्रं मलं च परीक्ष्य दोषाणां संतुलनं निर्धारयित्वा स्वास्थ्यसेवाप्रदातारः प्रत्येकं व्यक्तिं कृते व्यक्तिगतरूपेण चिकित्सायाः परिकल्पनां कुर्वन्ति । आयुर्वेदे आहारः, ओषधीः, ध्यानं, योगः, आन्तरिकशुद्धिः (चिकित्सा निराकरणम्) च उपयुज्यन्ते । शुद्धिकरणं प्रायः मलमूत्रस्य अन्तः द्रवस्य प्रविष्टिः (एनीमा) अथवा नासिकाम् जलेन प्रक्षालनम् (नासिकाप्रक्षालनम्), शरीरस्य अन्तः प्रकृत्या सह च संतुलनं स्थापयितुं प्राप्नोति।

आयुर्वेदीयचिकित्साशास्त्रस्य मूलभूतसिद्धान्तः त्रिदोषसमाह्वयः । दूषयन्ति विकृतिमापदयान्ति शरीरं मनश्चेति यैः ते दोषाः। ते च दोषाः द्विविधा शारीरमानसभेदात् । तत्र वायुः पित्तं कफश्चेति शारीराः। रजस्तमश्चेति द्वौ पुनर्मानसौ। सत्त्वन्तु अविकारित्वाद्दोषकोटिं नायाति। गुण एवं खलु सः न त दोषपदव्यपदेशभाक्। इदमत्रावधेयम् विकृता एवामी वायुपित्तकफाः लभन्ते दोषसंज्ञां न पुनरविकृता। अविकृतास्त्वमी धातुसंज्ञां भजन्ते। एक रजस्तमस्यापि वैषम्ये गते एवं दोषसंज्ञावगाहेते। प्रकृतिस्थे ते गुणपदेन व्यपदिश्येते न तु दोषसंज्ञयेति विवेकः। अमी च दोषा मलिनीकरणान्मला अप्युच्यन्ते। उक्तञ्च शाङ्र्गधरे-

**शरीरदूषणाद्दोषा धातवो देहधारणात्।**
**वातपित्तकफा ज्ञेया मलिनीकरणान्मलाः**

एवं चरकसंहितायामपि –

**वायुः पित्तं कफश्चेति शारीरो दोषसंग्रहः।**
**मानसः पुनरुद्दिष्टो रजश्च तम एव च ।।**

तात्त्विकदिशा तु अधिष्ठानभेदेन रोगा द्विविधाः शारीरा मानसाश्चेति। तत्र विकारमापन्ना वातादयः तत्तद्रोगाणामाभ्यन्तरकारणभूता रसरक्तादीनि दूष्याणि दूषयन्तः ये जनयन्ति शरीरभावान् रोगान् ते शारीराः । वैषम्यमापन्ने पुनः रजस्तमसी

तत्तद्रोगाणामाभ्यन्तरकारणभूतं कामक्रोधलोभमोहोन्मादविक्षेपविभ्रमादिरोगाधिष्ठानभूतं मनो दूषयन्ती उपजनयतस्तांस्तान् रोगान् मनोभावान् ये ते मानसाः। तत्र सत्त्वस्य निर्मलत्वात् प्रकाशात्मकत्वात् गुणत्वमेव न दोषत्वमिति भावः। तदेषां त्रिदोषाणां गतिः क्षयोपचयस्वरूपावस्थानभेदात् त्रिविधा। क्षये एषां ह्रास उपचये एंषां वृद्धिः प्रकोपो वा स्वरूपास्थाने च पुनः स्वाभाविकी स्थितिः प्रकृतिस्था समत्वरूपा। तथा चोक्तं चरके 'क्षयः स्थानं वृद्धिश्च विज्ञेया त्रिविधा गतिः'। तत्र क्षयवृद्धी विकृतिरूपे, स्थानं च समत्वरूपं प्रकृतिस्थं न विकारभूतं, विकृतिस्तु स्वभावविपर्ययः सः च क्षयवृद्धिरूप एव इति दिक्। तदेवं स्वरूपाणां वातपित्तकफात्मकानां त्रयाणां दोषाणां बीजभूतः। मौलिकसिद्धान्तोऽपि समीचीनतयोदृङ्कीकृतो दृश्यते वेदे सारतरोच्चयरूपेण। तथाहि ऋग्वेदे-

**तं युञ्जथां मनसो यो जवीयान् त्रिबन्धुरो वृषणा यस्त्रिचक्रः।**

**येनापयाथः सुकृतो दुरोणं त्रिधातुना पतथो विर्न पर्णैः ।।**

अत्र त्रिधातुरित्यनेन वातपित्तकफसमाख्या त्रिधातवः एव परिसंख्याताः। एव वेदानामनेकासु ऋचासु चिकित्साविज्ञानविषयकाः तथ्या दृश्यन्ते। आयुर्वेद नाम ऋग्वेदस्योपवेदः।

## धनुर्वेदः

धनुर्वेदः प्राचीनं भारतीयं धनुर्विद्यां यजुर्वेदसम्बद्धं उपवेदं इति मन्यते । अस्मिन् धनुर्विद्यायाः विविधाः पक्षाः समाविष्टाः सन्ति।

शारीरिकप्रशिक्षणम् :- शक्तिः, चपलता, सहनशक्तिः च विकसितुं परिशीलनम् ।

शस्त्रम् - धनुष-बाण-आयुधानां विविधानां ज्ञानम् ।

युद्धस्य रणनीतिः - व्यक्तिगत-समूह-युद्धे संलग्नतायाः रणनीतयः ।

नैतिकविचाराः - युद्धस्य सिद्धान्ताः शस्त्रप्रयोगस्य नैतिकनिमित्तानि च।

धनुर्वेदः विश्वामित्र-भृगु-आदिभिः प्राचीनैः ऋषिभिः उपदिष्टः इति मन्यते । महाभारत, रामायण इत्यादिषु विविधप्राचीनभारतीयग्रन्थेषु अस्य उल्लेखः अस्ति ।

प्राचीनभारतस्य युद्धपरम्परासु धनुर्वेदस्य महती भूमिका आसीत् । योद्धाभिः, राजाभिः, ऋषिभिः अपि अस्य अभ्यासः आसीत्, येषां शिक्षणस्य भागत्वेन धनुर्विद्यायां प्रवीणता अपेक्षिता आसीत् । धनुर्वेदस्य अध्ययनं अभ्यासः च अद्यत्वे युद्धकलारूपेण, सांस्कृतिकविरासतां च निरन्तरं वर्तते ।

धनुर्वेदः प्राधान्येन यजुर्वेदसम्बद्धः अस्य सम्प्रति मूलरूपं तु नैवोपलभ्यते । गोरक्षपीठाधीशेन परममहर्षिणा नरहरिनाथेन एको धनुर्वेदनामको ग्रन्थः प्रकाशितः। किन्तु स नितान्तमेवार्वाचीनः प्रतीयते भाषिकदृष्ट्या । श्लोकबद्धोऽयं लघुकायग्रन्थो धनुर्वेदस्य चतस्त्र एव शास्त्रा व्याप्नोति संक्षेपेण । धनुर्वेदस्य हि चत्वारः पादाः दीक्षा-शास्त्रादिज्ञान-शस्त्रा-द्यभ्यास-देवार्चनाभिधाः । तत्र दीक्षापादे धनुषस्तदधिकारिणश्च लक्षणं कृतमस्ति । धनुर्वेदे आयुधः मुक्तकामुक्तकमुक्तामुक्तकयन्त्रमुक्तेति भेदचतुष्टयात्मकः यत्र मुक्त कश्चादिरमुक्तः खड्गादिः मुक्तामुक्तकः शल्यादिः यन्त्रमुक्तश्च शरादिः । ते च नारायणपाशुपत ब्राह्मवैष्णववायवपावकतवारुणाग्नेयमेद्यप्रभृतिभेदादनेकविधः। द्वितीयपादे शस्त्रास्त्रविज्ञानम्। तृतीयपादे शस्त्राणां ग्रहणमभ्यासः सिद्धिश्च । चतुर्थपादे प्रयोगविधिश्च । श्रूयते हि वसिष्ठ विश्वामित्र-जामदग्न्य-वैशम्पायन-भरद्वाज-प्रभूतिभिर्मुनिभिरपि धनुर्वेदमधिकृत्यानेके ग्रन्थाः प्रणीता इति। किन्तु ते कालकवलिताः सञ्जाताः। कौरवाचार्येण द्रोणेन धनुष्प्रदीपाख्यो ग्रन्थो जामदग्न्येन परशुरामेण धनुश्चन्द्रोदयनामको ग्रन्थश्च प्रणीत आसीत्। परशुरामेण अष्टोत्तरशत प्रकरणान्यासन्निति कथ्यते । किन्तु तेऽपि कालवशात्स्मृतिपथमेव गता इति नास्त्यधुना कश्चिदपि धनुर्वेदविषयकः प्रामाणिको ग्रन्थ इति परमखेदावहम् ।

## पुनरावृत्तिः (Recap)

- आयुर्वेदः ऋग्वेदस्य उपवेदः अस्ति।
- आयुर्वेदे त्रिदोषाः – वातः , पित्तम् , कफं च।
- शरीरस्य प्राणशक्तेः प्राणस्य वा असन्तुलनात् रोगाः उत्पाद्यन्ते।

- रोगाः द्विविधः – शारीराः मानसाः च।
- यजुर्वेदसम्बद्धः उपवेदः भवति धनुर्वेदः।
- धनुर्वेदस्य चत्वार पादाः – दीक्षा, शास्त्रविज्ञानं, शास्त्राद्यभ्यासः, देवार्चनाभिधाः

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.आयुर्वेदः कस्य वेदस्य उपवेदः?

2.आयुर्वेदे त्रिदोषाः के ?

3.आयुर्वेदस्य त्रीणि प्रस्थानानि कानि ?

4.यजुर्वेदसम्बद्धः उपवेदः कः?

5.धनुर्वेदस्य चत्वारः पादाः के ?

6.जामदग्नेन प्रणीतः धनुर्वेदग्रन्थः कः?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

## (Answer the following questions in one or two sentences)

1.आयुर्वेदे शुद्धीकरणप्रक्रिया कथं भवति ?

2.आयुर्वेदे दोषः नाम कः ?

3.धनुर्वेदस्य दीक्षापादे किं प्रतिपादितम् ?

## निर्दिष्टाभ्यासः (Assignments)

1.आयुर्वेदः कथं शारीरकमानसिकक्षमतां परिपालयितुं सहायकः भवति ?

2.आधुनिकलोके आयुर्वेदस्य आवश्यकता।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1.ऋग्वेदस्य

2.वातं,पित्तं,कफं च

3.हेतुः, लक्षणम्, औषधज्ञानम्

4.धनुर्वेदः

5.दीक्षा, शास्त्रविज्ञानं, शास्त्राद्यभ्यासः,देवार्चनाभिधाः

6.धनुश्चन्द्रोदयः

## सूचनाग्रन्थाः

1. संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

2.ऋक्सूत्रसन्दर्शिका–बालगोविन्द झा (चौखम्पासुरभारतीप्रकाशन्, वाराणसी, 2012)

3.वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा (चौखम्पासुरभारतीप्रकाशन्, वाराणसी, 2016)

# Unit 4

## उपवेदे गान्धर्ववेदः अर्थवेदश्च

### उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- उपवेदेषु सामवेदोपवेदं गान्धर्ववेदं जानाति।
- अथर्ववेदोपवेदं अर्थवेदं परिचाययति।

### प्राग्व्यपेक्षाः (Prerequisites)

उपवेदो नाम मूलवेदान्निःसूतो वेदः । वेदान्समभ्यस्य तत्र तत्र व्यस्तरूपेण स्थितं विषयविशेषमादाय प्रणीतो वेद एव उपवेदसंज्ञितः । स च चतुर्विधः आयुर्वेदः, धनुर्वेदः, गन्धर्ववेदः, अर्थवेदश्च । तेषु आयुर्वेदः प्राधान्येन ऋग्वेदनिष्पन्नः, धनुर्वेदः यजुर्वेदस्य विषयः, गान्धर्ववेदः सामवेदसम्बद्धः अर्थवेदश्चाथर्ववेदभवं इति । तत्तत्सम्बद्धविषया चतुर्ष्वेव वेदेषु समुपलभ्यन्ते तथापि प्राधान्यविवक्षया तेषां वेदविशेषमूलत्वमुक्तम् ।अस्मिन्नेकके गान्धर्ववेदं अर्थवेदश्चाधिकृत्य पठामः।

### प्रधानांशाः/प्रधानपदानि (Key words)

गान्धर्ववेदः, नारदः, संगीतविद्या, गीतं, नृत्यं, वाद्यं, भरतमुनिः, नाट्यशास्त्रम्, नारदीयशिक्षा, व्याकरणम्, कौटिल्यः, अर्थशास्त्रम्।

## विशदीकरणम् (Discussion)

### गान्धर्ववेदः

सामवेदोपवेदत्वेन प्रसिद्धो ग्रन्थोऽयं सामज्ञानस्य सङ्गीतविद्यायाश्च निरूपकः। अस्य च गीत-नृत्य-वाद्यादिभेदैर्बहुप्रस्थानवत्त्वमनुमीयते। किन्तु गान्धर्ववेदस्य यथार्थरूपमद्य लुप्तप्रायमेव। विषयेऽस्मिन् यत्र-तत्र सामब्राह्मणेषु वर्णितं लभ्यते किन्तु प्रामाणिकत्वेन तु भरतस्य नाट्यशास्त्रमेव प्रथमं दृश्यते। तदनन्तरं नारदशिक्षा-सङ्गीतमकरन्द-सङ्गीत-समयसारसङ्गीतरत्नाकरप्रभृतिग्रन्थाः प्रणीताः किन्तु तेषामर्वाचीनत्वं स्वतः सिद्धमेव।

भरतमुनेः नाट्यशास्त्रम् विश्वप्रसिद्धमेव। न केवलं भारते किन्तु विश्वेऽस्मिन् नाट्यशास्त्रस्य प्रसिद्धिः वर्तते। नाट्यशास्त्रस्य प्रधानभूतानि घटकानि तस्मिन् सूचितानि। रसः, अलङ्कारः, नायक-नायिकादिभेदाः, पञ्चसन्धयः, प्रभृतीनि कार्याणि तस्मिन् वर्णितानि। तस्मिन् ग्रन्थे 36 अध्यायाः सन्ति। शृङ्गार-हास्य-करुण-बीभत्स-भयानक-वीर-अद्भुत-रौद्र-शान्ताः नवरसाः।चतुर्विधाभिनयाः सूचिताः। अवस्थानुकृतिर्नाट्यम् इति नाट्यस्य लक्षणम्।पञ्चमो वेदः इति नाट्यशास्त्रमवलम्ब्य वर्तते। रस-भाव-अभिनय-धर्मी-वृत्ति-प्रवृत्ति-सिद्धि-स्वररूपाणि कार्याणि सविस्तरम् अस्मिन् ग्रन्थे सूचिताः। नाट्यसंबन्धि-रससंबन्धि-अभिनयसंबन्धि एकं विश्ववैज्ञानिककोशमेव नाट्यशास्त्रम्।

**नारदीयशिक्षा-** नारदीयशिक्षायां सङ्गीतं,व्याकरणमित्यादयः विषयाः अन्तर्भवन्ति। वर्णानामुच्चारणं, स्वरभेदाः.भारतीयसङ्गीतस्य सोपानानि च विशदयति।

### अर्थवेदः

अथर्ववेदस्योपवेदत्वेन सम्मतोऽर्थवेदोऽपि लुप्तप्राय एव। विश्वस्यते अर्थवेदे राजनीतितन्त्र-अर्थतन्त्र-कृषितन्त्र-वाणिज्यतन्त्र-पशुपालनतन्त्र-समाजतन्त्र प्रभृतिविषया आसन्। अस्यापि आर्षरूपेषु वृहस्पतिप्रणीतत्वेन यथार्थशास्त्र लभ्यते तदनु कौटिल्यस्य अर्थशास्त्रमेव। पश्चाच्च शुक्राचार्योपदिष्टः शुक्रनीतिसारः, सोमदेवस्य नीतिवाक्यामृतं, सोमेश्वरस्य मानसोल्लासः इत्याद्याः कतिपयग्रन्थाः विषयपर्यालोचकाः।

## पुनरावृत्तिः (Recap)

- गान्धर्ववेदः सामवेदस्य उपवेदः भवति।
- गीत-नृत्य-वाद्यादिभेदेर्बहुप्रस्थानत्वम्
- भरतस्य नाट्यशास्त्रम् प्रामाणिकत्वेन स्वीक्रियते।
- नारदशिक्षा, संगीतमकरन्दः इत्यादयः गान्धर्ववेदसंबन्धग्रन्थाः।
- अथर्ववेदस्य उपवेदः भवति अर्थवेदः।
- अर्थवेदे राजनीति-अर्थ-कृषि-वाणिज्य-पशुपालन इत्यादीनि प्रतिपादितानि

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.सामवेदस्य उपवेदः कः ?

2.गान्धर्ववेदस्य प्रतिपाद्यविषयाः के ?

3.नाट्यशास्त्रस्य रचयिता कः ?

4.अथर्ववेदस्य उपवेदः कः ?

5.अर्थवेदस्य प्रतिपाद्यविषयाः के ?

## निर्दिष्टाभ्यासः (Assignments)

1.संगीतशास्त्रे गान्धर्ववेदस्य प्रसक्तिमधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1.गान्धर्ववेदः

2.गीत-नृत्य-वाद्यादयः संगीतादिविषयाः च

3.भरतमुनिः

4.अर्थवेदः

5.राजनीति-अर्थ-कृषि-वाणिज्य-पशुपालन इत्यादयः तत्र प्रतिपाद्यविषयाः

## सूचनाग्रन्थाः

1. संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

2.ऋक्सूत्रसन्दर्शिका–बालगोविन्द झा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2012)

3.वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2016)

BLOCK - 3

# ऋग्वेदः-

# संवादसूक्तम्

SGOU

# Block 3

## ऋग्वेदः-संवादसूक्तम्

### उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- संहितायाः ज्ञानं प्राप्नोति।
- ऋग्वेदीयसूक्तानां परिचयः जायते।

### प्राग्व्यपेक्षाः (Pre requisites)

भगवान् वेदव्यासः ऋग्यजुः सामार्थवणां मंत्राणां राशीन् तत्तत्प्रकरणभेदैः उद्धृत्य मन्त्रैःचतस्रः सहिताः चक्रे। ततो भगवान् वेदव्यासः चतुरः प्रगल्भान् शिष्यान् आहूय तेभ्यः एकैकां संहितामदात्। तस्मिन् क्रमे पैलाय ऋग्वेदं ददौ। पैलः स्वशिष्यान् तम् अध्यापयामास। ऋग्वेदस्य एकविंशतिः शाखाः सन्ति, यथा महाभाष्ये पश्पपशाह्निके प्रतिपादितम् "एकविंशतिधा बाह्वृच्यम्"। इदानींतने समये शाकल - बाष्कल - शांखायनाश्वलायनमिति एताःसहस्रःशाखाः एव ऋग्वेदस्य उपलभ्यन्ते। अध्ययनाध्यापनक्रमे शाकलशाखा आधिक्येन प्रचलिता वर्तते।

### प्रधानांशाः/प्रधानपदानि (Key words)

अष्टकक्रमः, मण्डलक्रमः, रोगनाशकः, सुखकरः, निद्रा, सारमेयः, सूकरः, सहस्रकिरणसूर्यः, अग्निः, संगच्छध्वम्, समानो मन्त्राः, आकूतिः, हृदयानि, मनः।

# Unit 1

## ऋग्वेदेमण्डलं 7, सूक्तं- 55, मन्त्राः 1, 2, 3, 4.

## ("अमीवहावास्तोष्पते" इत्यारभ्य "त्वंसूकरस्यदर्दृहि" इति पर्यन्तं, चत्वारो मन्त्राः)

## विशदीकरणम् (Discussion)

ऋग्वेदे दश मण्डलानि, अष्टौ अष्टकाः 10,580 1/4 मन्त्राः सन्ति इति चरणव्यूहपरिशिष्टे प्रथम ऋग्वेदखण्डे वर्णितम्। ऋग्वेदे द्विधा विभाजनं वर्तते – मण्डलक्रमः अष्टकक्रमश्च।

**अष्टकक्रमः**

सम्पूर्णऋग्वेदस्य विभाजनं अष्टाष्टकेषु विद्यते। प्रत्येकाष्टके अष्टाध्यायाः सन्ति। एवं ऋग्वेदे चतुःषष्टिःअध्यायाः विद्यन्ते। अनेनैव कारणेन ऋग्वेदस्य चतुःषष्टिः संज्ञा प्रयुक्ता।प्रत्यध्याये वर्गाःविद्यन्ते।वर्गेषु ऋचानां समूहः अस्ति। परञ्च वर्गेषु ऋचानां संख्या निश्चिता नास्ति। सामान्यतः पञ्चानाम् ऋचानां समूहः प्रतिवर्गे भवति। कतिपयेषु वर्गेषु एका एव ऋचा कतिपयेषु नवसंख्याका अपि ऋचा विद्यन्ते।सम्पूर्णे ग्रन्थे षडाधिकद्विसहस्रवर्गाः सन्ति।

**मण्डलक्रमः**

मण्डलक्रमानुसारं सम्पूर्ण-ऋग्वेदे मण्डलानां संख्या दश विद्यन्ते।एतेनैव कारणेन ऋग्वेदस्य दशतयी संख्या प्रयुक्ता। प्रत्येकमण्डले अनुवाकाः अनुवाकेषु सूक्तानि सूक्तेषु ऋचा विद्यन्ते। एवं सम्पूर्णऋग्वेदे पञ्चाशीति अनुवाकाः सप्तदशाधिकसहस्रमेकंसूक्तञ्च। एतदतिरिक्तं एकादश बालखिल्यसंज्ञकं सूक्तमस्ति।

ऋग्वेदान्तर्गतशाकलसंहितायाः अष्टमे मण्डले अष्टचत्वारिंशत्तमसूक्तोत्तरम् एकादशसूक्तानि वालखिल्याख्यानि विद्यन्ते । पठनपाठनपरंपरायाम सर्वत्र तानि भारतवर्षे अध्यापकैः शाकलसहितान्तर्गतसूक्तान्तराणीव संस्वराण्यध्याप्यन्ते, अध्येतृभिः च तथैव अभ्यस्यन्ते इति

सर्वविदितम्। एषां वालखिल्यसूक्तानां तत्संहितान्तर्गतेतरांशवदेव महत्ता न तु ततः अल्पमपि न्यूना इत्यत्र न स्यात् कस्यचिद् अवसरः संदेहलेशस्यापि । शाकलसंहितापदपाठे तेषामपि सूक्तानां पदपाठो वर्तते एव।अस्मिन् भागे ऋग्वेदस्य सप्तममण्डलस्य पञ्चपञ्चाशततमसूक्तम् पाठभागरूपेण पठामः।

**अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् ।**

**सखा सुशेव एधि नः ॥१॥**

**पदपाठः -** अमीवऽहा । वास्तोः । पते । विश्वा । रूपाणि । आऽविशन् । सखा । सुऽशेवः । एधि । नः ॥

**सायणभाष्यम् -** हे वास्तोष्पते! गृहस्य पालकैतत्संज्ञक देव अमीवहा अमीवानां रोगाणां नाशकस्त्वं विश्वा विश्वानि बहूनि रूपाण्याविशन् प्रविशन् । 'यद्यद्रूपं कामयते तत्तद्देवता विशति' (निरु. १०.१७) इति यास्कः । नः अस्माकं सखा मित्रभूतः सुशेव सुष्ठु सुखकरः एधि भव ।।

**सारः -** हे वास्तोष्पते ! त्वं रोगनाशकः असि।त्वं विश्वे बहूनि रूपेण प्रविशन् अस्ति। त्वं अस्माकं मित्रं भूत्वा सुखकरः भव।

**यदर्जुन सारमेय दतः पिंशङ्ग यच्छसे ।**

**वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप॥२॥**

**पदपाठः -** यत् । अर्जुन । सारमेय । दतः । पिशङ्ग । यच्छसे । वि इव । भ्राजन्त । ऋष्टयःउप । स्रक्वेषु । नि । सु । स्वप ॥

**सायणभाष्यम्-**हे अर्जुन श्वेत हे सारमेय। सरमा नाम देवशुनी। तस्याः कुलोद्भव हे पिशङ्ग केषुचिदङ्गेषु पिङ्गलवर्णैवंभूत हे शुनक त्वं दतः दन्तान् यत् यदा यच्छसे विवृणोषि । अस्मान् दष्टुमित्यर्थः। तदानीं वीव भ्राजन्त ऋष्टयः यथायुधानि विशेषेण भासन्ते तथा उप अस्मत्समीपे

वप्सतः भक्षयतस्तव दन्ताः स्रक्केषु स्रक्कासु भासन्ते । स्रकाशब्द ओष्ठप्रदेशविशेषवाचीत्यर्थः । तथाभूतस्त्वमिदानीं सु सुष्ठ्छ नि स्वप नितरां निद्रां कुरु ॥

**सारः** -हे सारमेय ! यदा तेकेषुचिदङ्गेषु पिङ्गलवर्णैवंभूताः दन्ताः स्फुटन्ति तदा ते शस्त्राणि इव भासन्ते । भवन् इदानीं सुखेन निद्रां करोतु।

**स्तेनं राय सारमेय तस्करं वा पुनःसर ।**

**स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुंच्छुनायसे नि षु स्वप ।। ३॥**

**पदपाठः -** स्तनम् । राय । सारमेय । तस्करम् । वा । पुनःऽसर । स्त्रोतॄन् । इन्द्रस्य । रायति । किम् । अस्मान् । दुच्छ्रुनऽयसे। नि । सु । स्वप ॥ ३ ॥

**सायणभाष्यम्-** हे पुनः सर । गतमेव देशं पुनः सरतीति पुनः सरः। तादृग्भूत हे सारमेय त्वं स्तेनम् । प्रच्छनधनापहारी स्तेन। तं तस्करम्। प्रत्यक्षधनापहारी तस्करः । तं वा राय गच्छ। इन्द्रस्य स्तोतॄन् अस्मान् किं 'रायसि गच्छसि। अस्मान् दुच्छुनायसे किं बाधसे। नि षु स्वप अत्यन्तं निद्रां कुरु ।।

**सारः -** हे सारमेय ! त्वां यत्र गच्छसि तत्र तत्र पुनः अपि गच्छति। त्वं चोरभृत्यानां समीपं गच्छ। इन्द्रं स्तुवतां जनानां समीपे किमर्थं गच्छन्ति ? किमर्थं तेषां कर्मसु विघ्नाः सृज्यन्ते। सुष्ठु निद्रां कुर्वन्तु ।

**त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकुरः ।**

**स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुंच्छुनायसे नि षु स्वप ।॥ ४ ॥**

**पदपाठः**-त्वम् । सुकरस्य । दुर्दृद्धि । तव । दुर्द्धर्तु । सुकुरः । स्तोतृन् । इन्द्रस्य । रायसि । किम् । अस्मान् । दुच्छुनऽयसे । नि । क्षु । स्वप ॥ ४ ॥

**सायणभाष्यम्-**हे सारमेय ! त्वं सूकरस्य वराहस्य । द्वितीयार्थे षष्ठी। दर्हहि विदारय । सुकरः अपि तव दर्दतुं विदारयतु । युजयोर्नित्यवैरित्वात् । अस्मान् मा दशेत्यर्थः । स्तोतॄन् इत्यर्धर्चः पूर्वस्यामृचि व्याख्यातः ।।

**सारः** - त्वं सूकरं  विदारय। इन्द्रोपासकानां समीपं गत्वा किमर्थं बाधां  सृजति। त्वं सुष्ठु निद्रां कुरु।

## Unit 2

### ऋग्वेदे मण्डलं 7, सूक्तं- 55, मन्त्राः 5, 6, 7, 8.

### ("सस्तु माता सस्तु पिता" इत्यारभ्य "प्रोष्ठे शया वह्ये  शया"  इति पर्यन्तं  चत्वारो मन्त्राः)

### विशदीकरणम्  (Discussion)

**सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः।**

**सुसन्तु सर्वे ज्ञातयिः सस्त्वयमभितो जनः ॥ ५ ॥**

**पदपाठः** - सस्तु । माता । सस्तुं । पिता । सस्तुं । श्वा । सस्तुं । विश्पतिः । सुसन्तु । सर्वे । ज्ञातर्यः। सस्तु । अयम् । अभिः । जनः॥ ५ ॥

**सायणभाष्यम्-** हे सारमेय माता त्वदीया जननी 'सस्तु स्वपतु । पिता व सस्तु । श्वा सारमेयो भवान् सस्तु । विश्पतिः जामाता यद्वा विशां जनानां पालको गृही 'सस्तु। सर्वे ज्ञातयः बन्धवोऽपि ससन्तु स्वपन्तु । अभितः परितः स्थितः अयम् अपि सर्वः जनः सस्तु स्वपतु ।।

**सारः** - तव पिता माता च स्वपितु। गृहस्य स्वामी तथा च बान्धवाः सर्वे मनुष्याः अयम् च निद्रां कुर्वन्तु।

**य आस्ते यश्च चरति यश्च पश्यति नो जनः।**

**तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा ॥ ६ ॥**

**पदपाठः** - यः । आस्ते । यः। च । चरति । यः। च। पश्यति । नः । जनः। तेषाम् । सम् । हन्मः । अक्षाणि। यया। इदम् । हर्म्यम् । तां ॥ ६ ॥

**सायणभाष्यम् -** यः जनः आस्ते अस्मिन् प्रदेशे तिष्ठति यश्च चरति गच्छति यश्च जनः नः अस्मान् 'पश्यति एवंभूतानां तेषां जनानाम् अक्षाणि इन्द्रियाणि सं हन्मः संहनाम। संहतिर्निमीलनम् । निमीलयामेत्यर्थः । इदं प्रत्यक्षेणोपलभ्यमानं हर्म्यं प्रासादादिस्थावरात्मकं वस्तुजातं यथा निश्चलं भवति तथा इमे सर्वे जना निश्चला भवन्त्वित्यर्थः ।।

**सारः –** यः अस्मिन् प्रदेशे तिष्ठति,यः च चरति,यश्च जनः अस्मान् पश्यति तेषां जनानां नयनानि वयं संहनाम। निमीलनं कारयन्ति इत्याशयः।ते अस्य वस्तुजातं इव निश्चलाः भविष्यन्ति।

**सहस्रश्शृङ्गो वृषभो यः संमुद्रादुदाचरत् ।**

**तेना सहस्येना वयं नि जनान्त्स्वापयामासि ।॥ ७ ॥**

**पदपाठः -** सुहर्वऽश्रृङ्गः । वृषभः । यः । समुद्रात् । उत्ऽआचरत् । तेन । सहस्यैन । वयम् । नि। जनान्। स्वापयामसि ॥ ७ ॥

**सायणभाष्यम्-** सहस्रशृङ्गः सहस्रकिरणः वृषभः कामानां वर्षिता यः सूर्यः समुद्रात् अम्बुधेः सकाशात् उदाचरत् उदागच्छति 'सहस्येन अभिभवित्रा तेन सूर्येण वयं स्तोतारः जनान् सर्वान् नि स्वापयामसि नितरां स्वापयामः ।

**सारः -** सहस्रकिरणसूर्यः समुद्रस्य उपरि उदेति। तस्य साहाय्येन स्तोतारः वयं सर्वान् जनान् निद्राग्रस्तान् करिष्यामः।

**प्रोष्ठेशया वह्येशया नारीर्यास्तल्युशीवरीः ।**

**स्त्रियो याः पुण्यंगन्धास्ताः सर्वा स्वापयामसि ॥ ८॥**

**पदपाठः -** प्रोष्ठेऽशयाः । वोऽशयाः । नारीः । याः । तुल्युऽशीर्वरीः । स्त्रियेः । याः । पुण्यऽगन्धाः। ताः । सर्वोः । स्वापयामसि ॥ ८ ॥

**सायणभाष्यम् -** याः यादृश्यः नारीः नार्यः श्रियः प्रोष्ठेशया प्राङ्कणे' शयानाः । याः वह्यशयाः। वह्यं वाहनम् । तस्मिन् शयानाः। याः तल्पशीवरी तत्पशया. या श्रियः पुण्यगन्धाः

मङ्गल्यगन्धाः। ताः तादृशीः सर्वाः स्त्रीः स्वापयामसि वयं निद्रां कारयामः ॥ ॥२२॥ ॥३॥ अयं चतुर्थेऽनुवाके पञ्चदश सूक्तानि । तत्र 'क है व्यक्ताः' इति पञ्चविंशत्यृचं प्रथमं सूक्तम्।

**सारः –** यादृश्यः नार्यः प्राङ्कणे शयानाः, वाहने शयानाः, याः मङ्गलगन्धाः तादृशीः सर्वाः स्त्रीः वयं निद्रां कारयामः।

## Unit 3

## ऋग्वेदे मण्डलं 10, सूक्तं 191, प्रथमद्वितीयमन्त्रौ।

## ("संसमिद्युवसे", "संगच्छध्वं")

### विशदीकरणम् (Discussion)

'संसम्' इति चतुर्ऋचं चत्वारिंशं सूक्तं संवननस्यार्थम्। 'समानो मन्त्रः इति तृतीया त्रिष्टुप् शिष्टास्तिस्रोऽनुष्टुभः। प्रथमाया अग्निर्देवता। शिष्टानां संज्ञानम् । अनुक्रम्यते च संसं चतुष्कं संवननः संज्ञानमाद्याग्नेयी तृतीया त्रिष्टुप् तृतीया त्रिष्टुप् इति। 'आनुष्टुभं तु' इति पूर्व-मुक्तत्वादवशिष्टानामनुष्टुप्त्वम्। सूक्तविनियोगो लैङ्गिकः॥

**संसमिद्युवसे वृषन्नग्ने विश्वान्यर्य आ ।**
**इळस्पदे समिध्यसे स नो वसून्या भर ॥**

**पदपाठः -** सम्सम् । इत् । युवसे । वृषन् । अग्ने । विश्वानि । अर्यः । आ । इळः । पदे । सम् । इध्यसे । सः । नः । वसूनि । आ । भर ॥

**सायणभाष्यम्-** हे वृषन् कामानां वर्धितः अग्ने अर्थः ईश्वरस्त्वम्। 'अर्थः स्वाभिवैश्ययोः' (पा. सू. ३० १. १०३) इति परप्रत्ययान्तो निपातितः । अर्मः श्वाम्याख्यायाम्' (फि. सू. १.१८) इत्यन्तोषातत्वम् । स एवं विश्वानि सर्वाणि भूतजातानि 'संसम् । 'प्रसमुपोदः पादपूरणे' (पा. सू. ८. १.६) इति समो द्विर्वचनम् । इच्छब्दोऽवधारणे। आ समन्तात् से युवसे मिश्रयसि । देवेषु मध्ये त्वमेव सर्वाणि भूतआतानि वैश्वानरात्मना व्याप्नोषि। नान्य इत्यर्थः। किंच इळः इडायाः पृथिव्याः पदे स्थाने उत्तरवेदिलक्षणे। एतद्वा इळायास्पदं यदुत्तरवेदीनाभिः (वे. मा. १.२८) इति ब्राह्मणम्। तत्र र समिध्यसे ऋत्विग्भिः संदीप्यसे । सः तादृशस्त्वं नः अस्माकं 'वसूनि धनानि आ भर आहर ॥

**सारः -** हे अग्नि ! त्वं कामप्रदाता असि। त्वं विश्वस्य सर्वकोटीषु भूतेषु विराजसे ।यज्ञवेदिषु त्वमेव प्रकाशते। तादृशः त्वं अस्माकं धनं प्रयच्छ।

**सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।**

**देवा भागं यथा पूर्वे संजानाना उपासते ॥**

**पदपाठः -** सम् । गच्छध्वम् । सम् । वदध्वम् । सम् । वः । मनांसि । जानताम् । देवाः । भागम् । यथा । पूर्वे । सम्जानानाः । उपआसते ॥

**सायणभाष्यम् -** हे स्तोतारः यूयं सं गच्छध्वम्। संगताः संभूता भवत ॥ 'समो गम्यृच्छि इत्यादिना गमेरात्मनेपदम् ॥ तथा सं वदध्वं सह वदत । परस्परं विरोधे परित्यज्यैकविधमेव वाक्यं ब्रूतेति यावत् । 'व्यक्तवाचां समुच्चारणे (पा. सू. १. ३.४८) इति वदेरात्मनेपदम् । वः युष्माकं मनांसि सं जानताम्। समानमेकरूपमेवार्थमवगच्छन्तु ॥ ' संप्रतिभ्यामनाध्याने' (पा.

सू. १. ३. ४६) इति जानातेरात्मनेपदम् ॥ यथा पूर्वे पुरातनाः देवाः संजानानाः ऐकमत्यं प्राप्ता हविर्भागम् उपासते यथास्वं स्वीकुर्वन्ति तथा यूयमपि वैमत्यं परित्यज्य धनं स्वीकुरुतेति शेषः॥

**सारः** – हे स्तोतारः, यूयं एकचित्ताः भूत्वा एकरूपेण स्तुवन्तु। परस्परं विरोधे परित्यज्यैकविधमेव वाक्यं वदन्तु। समानमेकरूपमेवार्थमवगच्छन्तु । यथा देवाः एकचित्तेन यज्ञात् हविर्भागं गृह्णन्ति तथा यूयमपि वैमत्यं परित्यज्य धनं स्वीकुरुते।

## Unit 4

### ऋग्वेदे मण्डलं 10, सूक्तं 191, तृतीय- चतुर्थमन्त्रौ। ("समानो मन्त्रः", "समानी व")

**समानो मन्त्रः समितिः समानी समानं मनः सह चित्तमेषाम् ।**

**समानं मन्त्रमभि मन्त्रये वः समानेन वो हविषा जुहोमि ॥**

**पदपाठः -** समानः । मन्त्रः । सम्ऽइतिः । समानी । समानम् । मनः । सह । चित्तम् । एषाम् । समानम् । मन्त्रम् ।अभि। मन्त्रये।वः। समानेन । वः । हविषा । जुहोमि ।। ३ ।।

**सायणभाष्यम् -** पूर्वोऽर्धर्चः परोक्षकृतः उत्तरः प्रत्यक्षकृतः । एषाम् एकस्मिन् कर्मणि सह प्रवृत्तानामृत्विजां स्तोतृणां वा मन्त्रः स्तुतिः शस्त्राद्यात्मका गुप्तभाषणं वा समानः एकविधोऽस्तु । तथा समितिः प्राप्तिरपि समानी एकरूपास्तु ॥ 'केवलमामक इत्यादिना समानशब्दात् ङीप् । उदात्तनिवृत्ति- स्वरेण ङीप् उदात्तत्वम् । तथा मनः मननसाधनमन्तःकरणं चैषां समानम् एकविधमप्यस्तु । चित्तं विचारजं ज्ञानं तथा सह सहितं परस्परस्यैकार्थेनैकीभूत्तमस्तु । अहं च वः युष्माकं समानम् एकविधे मन्त्रम् अभिमन्त्रये। पेकविध्याय संस्करोमि । तथा वः युष्माकं स्वभूतेन समानेन साधारणेन हविषा चरुपुरोडाशादिना अहं जुहोमि ॥ तृतीया च होश्छन्दसि' (पा. सू. २. ३. ३) इति कर्मणि कारके तृतीया ॥ वषट्कारेण हविः प्रक्षेपयामीत्यर्थः ॥

**सारः** - एषाम् एकस्मिन् कर्मणि सह प्रवृत्तानामृत्विजां स्तोतृणां वा मन्त्रः स्तुतिः शास्त्राद्यात्मका गुप्तभाषणं वा समानः एकविधोऽस्तु , तेषां प्राप्तिरपि एकरूपः अस्तु। तेषां मनः समानं भवतु। हे पुरोहिताः! । चित्तं विचारजं ज्ञानं तथा सह सहितं परस्परस्यैकार्थेनैकीभूत्तमस्तु । अहं च वः युष्माकं समानम् एकविधे मन्त्रम् अभिमन्त्रये। पेकविध्याय संस्करोमि । तथा वः युष्माकं स्वभूतेन समानेन साधारणेन हविषा चरुपुरोडाशादिना अहं जुहोमि।

**समानी व आकूतिः समाना हृदयानि वः ।**

**समानमस्तु वो मनो यथा वः सुसहासति ॥**

**पदपाठः** - समानी । वः । आकूतिः । समाना । हृदयानि । वः । समानम् । अस्तु । वः । मनः । यथा । वः । सुसह । असति ॥

**सायणभाष्यम्-** हे ऋत्विग्यजमानाः वः युष्माकम् आकृतिः संकल्पोऽध्यवसायः समानी एक-विधोऽस्तु । तथा वः युष्माकं हृदयानि 'समाना समानान्येकविधानि सन्तु। तथा वः युष्माकं मनः अन्तःकरणम् । प्रत्येकापेक्षयैकवचनम् । तदपि समानमस्तु । यथा वः युष्माकं सुसह शोभनं साहित्यम् असति भवति तथा समानमस्तिवत्यन्वयः ॥ अस्सेर्लेटि 'बहुलं छन्दसि' इति शपो लुगभावः ॥ **सारः** - हे स्वामिनः ! पुरोहिताः ! युष्माकं संकल्पोऽध्यवसायः समानानि भवन्तु। युष्माकं हृदयं मनः च समं भवतु। सर्वथा समं सुसंघठितं च भवतु ।

## पुनरावृत्तिः (Recap)

- ऋग्वेदस्य द्विधा विभजनं वर्तते – मण्डलक्रमः अष्टकक्रमः च ।
- ऋग्वेदस्य सप्तममण्डलस्य पञ्चपञ्चाशततमम् भवति इदम् सूक्तम् ।
- हे वातोस्पते । रोगाणां नाशकः, विश्वं प्रविशन् अस्माकं सखा भूत्वा सुखकरः भव ।

- हे सारमेय, त्वं सुखनिद्रां कुरु ।
- इन्द्रस्य स्तोतृन् अस्मान् किमर्थं गच्छसि । त्वं अत्यन्तं निद्रां कुरु ।
- त्वं सूकरं विदारयतु । अस्मान् मा दशेत् ।
- हे सारमेय, तव माता,पिता, जामाता, तथा सर्वे बान्धवाः सुखेन स्वपन्तु ।ट
- सहस्रकिरणसहिताः सूर्यः उदेति। तेन सूर्येण जनान् सर्वान् स्वापयामः ।
- हे स्तोतारः, यूयं सर्वे सं गच्छध्वम् ।
- युष्माकं मन्त्रः, स्तुतिः, गुप्तभाषणं वा समानः भवतु ।
- हे ऋत्विजाः, युष्माकं संकल्पोऽध्यवसायः समानो भवतु।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.ऋग्वेदे कति मण्डलानि सन्ति?

2.प्रस्तुतसूक्तं ऋग्वेदस्य कस्मिन् मण्डले वर्तते ?

3.रोगाणां नाशकः कः ?

4.ऋत्विजाः कस्य स्तोतारः भवति ?

5.कीदृशः सूर्यः उदेति ?

6.ऋत्विजानां किं समानो भवतु ?

7.संगच्छध्वं इति मन्त्रः कस्मिन् मण्डले वर्तते ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

## (Answer the following questions in one or two sentences)

1.के के सुखेन स्वपन्तु ?

2.किं समानः भवतु ?

3.ऋग्वेदस्य मण्डलक्रमः कीदृशः ?

4.ऋग्वेदस्य अनुवाकक्रमः कीदृशः ?

5.ऋग्वेद कति मन्त्राः सन्ति ?

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

| |
|---|
| 1.दश |
| 2.सप्तमे |
| 3.वातोस्पतिः |
| 4.सारमेयः |
| 5.सहस्रकिरणसहिताः |
| 6.संकल्पोऽध्यवसायः |
| 7.दशमे |

## सूचनाग्रन्थाः


1.ऋग्वेदसंहिता सायणभाष्येण सहितः, वेदसंशोधकमण्डल, तिलकस्मारकभवन्, पूने-2,1933

2.संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

3.ऋक्सूत्रसन्दर्शिका–बालगोविन्द झा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2012)

4.वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2016)

BLOCK - 4

# यजुर्वेदः-प्रथमाध्यायात् षड्मन्त्राः

SGOU

# Block 4

## यजुर्वेदः-प्रथमाध्यायात् षड्मन्त्राः

### उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- संहितायाः ज्ञानं प्राप्नोति।
- सूक्तानां परिचयः जायते।

### प्राग्व्यपेक्षाः (Pre requisites)

यजुर्वेदः कर्मकाण्डप्रधानः मन्यते। यज्ञः कर्मणैव सम्पद्यते। तस्मात् यास्कः "यजुर्यजतेः" इत्यनेन सूत्रेण यत्र यजनादिकं व्याख्यातं तद्यानुरिति उक्तवान्। यज्ञेन परमपुरुषस्य सत्कारो भवति। तस्मात्सर्वेषु वेदेषु यज्ञस्य प्राधान्यं प्रमुखरूपेण वर्तते।

### प्रधानांशाः/प्रधानपदानि (Key words)

यजुर्वेदः,कर्मसंबन्धिनः, गवां संप्रेषणकार्यम्, प्रगतिशीलः, प्राणानां उष्णता, कामधेनुः, हव्यानि, व्रतपतिरूपः।

### विशदीकरणम् (Discussion)

यजुर्वेदः शुक्ल-कृष्णभेदेन द्विविधः। तत्र शुक्ल यजुर्वेदः आदित्यसम्प्रदायस्य प्रतिनिधिः, कृष्णयजुर्वेदश्च ब्रह्मसम्प्रदायस्य प्रतिनिधिरस्ति। तस्मात् यजुर्वेदस्य द्वौ सम्प्रदायौ स्तः। महाभाष्यकारेण पतञ्जलिना 'सर्वे देशान्तरे' एतद्वार्तिकव्याख्यानावसरे प्रतिवेदं शाखाभेदाः दर्शिताः। तेनोक्तम्- "एकशतमध्वर्युशाखाः" इति। यद्यपि शाखाभेदेऽपि शास्त्रेषु वैविध्यमस्ति, तथापि पतञ्जलिना प्रदर्शिताः शाखाभेदाः सर्वैरङ्गीक्रियन्ते। तदनु कृष्णयजुषः शाखाः

षडशीतिरुदाहृताः शुक्लस्य यजुषः पञ्चदशशाखाश्चोक्ताः। एवम् एकोत्तरं शतं शाखाः प्रोक्ता हि याजुषे। उक्तासु एकोत्तरशतशाखासु सम्प्रति कृष्णयजुर्वेदस्य चतस्रः शाखाः समुपलभ्यन्ते। शुक्लयजुर्वेदस्य व माध्यन्दिनशाखा कण्वशाखा चेति द्वे शाखे उपलब्धे स्तः। अस्मिन् चतुर्थविभागे यजुर्वेदस्य प्रथमषड्मन्त्राः पाठनाय दत्तमस्ति।

# Unit 1

## यजुर्वेदे प्रथमाध्यायाद् प्रथम- द्वितीय- तृतीयमन्त्राः।

### विशदीकरणम् (Discussion)

एते खण्डिकाः अस्य कर्मसम्बन्धिनः यज्ञोपकरणानां यज्ञकर्तृणां च संबन्धाः भवन्ति । प्रस्तुतपरिच्छेदे वत्सं धेन्वोः पृथक्करणस्य, गवां संप्रेषणकार्यम्, इत्यादी क्रियासंबन्धीनां विधानः अस्ति -

**॥ॐ ॥ इषे त्वोर्जे त्वा वायव स्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय कर्मणऽ आप्यायध्वमघ्न्याऽइन्द्राय भागं प्रजावतीरनमीवाऽअयक्ष्मा मा व स्तेनऽईशत माघश सो ध्रुवाऽ अस्मिन् गोपतौ स्यात बह्वीर्यजमानस्य पशून् पाहि ।।१ ।।**

हे देव! सवितादेव त्वां अत्रप्रास्यै अग्रे प्रवहतु | सृष्टिकर्ता प्रजापतिः भवन्तं तेजस्वी भवितुं प्रेरयतु। यूयं सर्वे प्राणस्वरूपाः। प्रजापतिः भवन्तं महत्कर्म कर्तुं अग्रे सारयेत्। भवतः शक्तिः विनाशकारी न भवेत्, अपितु प्रगतिशीलः भवेत्। इन्द्राय (दिव्यप्रवृत्तये) स्वस्य उत्पादनस्य भागं समर्पयतु। सन्ततेः साकं सुशीलः स्वस्थः च भूत्वा क्षयादिरोगेभ्यः मुक्तो भवतु। ये चोरयन्ति ते भवतः नियतवादिनः न भवेयुः। दुष्टस्य रक्षणं मा कुरु। मातृभूमिपालः छत्राधः स्थिरः वसतु। सज्जनानां संख्यां वर्धयतु तथा गोधनानां रक्षणं कुर्वन्तु।

**सरलार्थः** - प्राणं ददानं हे प्रभो ।अन्नक्षेमबलेभ्यः त्वां प्रणमामः ।केवलं सत्कर्माणि कुर्वन्तः हे यज्ञकर्तारः। यः सर्वस्य पीठः जगतः स्वामी च वर्तमानाः ते श्रेष्ठकर्माणि अनुष्ठातुं शक्तिं ददातु, ईश्वरस्य प्रसादात् गोयूथः वर्धयतु, यूयं रोगरहिताः व्याधिरहिताः शरीरेण सह भवत।इन्द्राय स्वस्य उत्पादनस्य भागं समर्पयतु। सन्ततेः साकं सुशीलः स्वस्थः च भूत्वा क्षयादिरोगेभ्यः मुक्तो भवतु। भवतु भवद्भ्यः नूतना पीढी प्रबलः हिंसाचौर्यरहितः भवतु।यजमानस्य वर्धितवीर्यान् संरक्षतु तथा गोधनस्यापि संरक्षणं क्रियताम्।

**द्वितीयो मन्त्रः**

**वसोः पवित्रमसि द्यौरसि पृथिव्यसि मातरिश्वनो घर्मोऽसि विश्वधाऽअसि । परमेण धाम्ना दृहस्व मा ह्वार्मा ते यज्ञपतिर्ह्वार्षीत् ॥२ ॥**

हे देव ! त्वं वस्तुशुद्धिसाधनं (यज्ञकर्मद्वारा), त्वं स्वर्गपृथिव्योः संतुलनाकारः असि। त्वं प्राणानां उष्णता, सर्वेषां धारकः च। महाशक्तीः धारयन् प्रगतिशीलः भव । त्वं यज्ञपतिना सह अस्मान् संरक्षस्व।

**तृतीयो मन्त्रः**

प्रस्तुते परिच्छेदे गोक्षीररूपहविसः शुद्धीकरणप्रक्रियायाः विधानं कथयति –

**वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥३ ॥**

त्वं (शुद्धवसुः) शतसहस्राणि धाराभिः (सविता, यः सर्वशुद्धिकरणं करोति, त्वां शतशः धाराभिः (वस्तुशुद्धिकरणसाधनम्) शुद्धिकरणं करोषि। किं त्वं कामसिद्धिं इच्छसि अर्थात् कस्य कामधेनुं दोहनं कर्तुम् इच्छसि?

(अयं मुनिः गोक्षीरे विद्यमानान् पोषकान् अन्तरिक्षात् पृथिवीं प्रवहन्तं सहस्राणि धारासु पश्यति । वयं यज्ञस्य प्रक्रियां एतेन सार्वत्रिकदृष्ट्या सह संयोजयितुम् इच्छामः।)

**सरलार्थः -** शताधारारूपेण कल्याणं ऊर्जां च वर्षयतः त्वं पश्चात् तानि सहस्रधारारूपेण परिणमयति। ईश्वरः भवतः कृते अनेकानि ऊर्जासंघातानि पातयति, सः भवतः जीवनलक्ष्याणां फलं ददाति, तान् पवित्रयति च। भवतः मार्गाः ईश्वरेण पवित्राः भवन्तु।

## Unit 2

## यजुर्वेदे प्रथमाध्यायाद् चतुर्थ- पञ्चम- षष्ठमन्त्राः।

**चतुर्थः मन्त्रः-**

**सा विश्वायुः सा विश्वकर्मा सा विश्वधायाः। इन्द्रस्य त्वा भाग १७ सोमेनातनच्मि विष्णो हव्य रक्ष ॥४ ॥**

उपर्युक्तप्रश्नस्य उत्तरमेव प्रस्तुतः अनुच्छेदः । अत्र दोहनकर्ता पुरुषः क्षीररूपः एव हविः अस्ति। पोषकर्तृरूपेण विष्णुं सम्बोधितः – हे मानव! भवतः पूर्णायुः, कर्मशक्तिः, धारकशक्तिः च (त्रयः कामधेनुरूपाः)भवतः समीपे अस्ति। एतेभ्यः प्राप्तेभ्यः दुग्धरूप पोषणक्षमताभ्यः वयं (अध्वर्यु) इन्द्रस्य भागे सोमं योजयित्वा स्थिरं कुर्मः। पोषणकर्ता (विष्णु) एतानि हव्यानि सुरक्षितरूपेण स्थापयतु।

**सरलार्थः-** सा गौः सर्वस्य आधारः विश्वात्मा कर्मप्रभवः सर्वस्य च धारकः । हे इन्द्र ।हितकर। । भवतः भागः भवतः कृते समर्पिता अस्ति। अहो देव सर्वव्यापी, एतानि हव्यानि सुरक्षितरूपेण स्थापयतु।

**पञ्चमो मन्त्रः-**

प्रस्तुते परिच्छेदे कर्मानुष्ठानस्य प्रतिज्ञा कृता-

**अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । इदमहमनृतात् सत्यमुपैमि ॥**

हे व्रतानां पालनकर्ता तेजस्वी अग्निदेव ! वयं उपवासं कर्तुं समर्थाः भवेयुः। असत्यं परित्यज्य सत्यमार्गे गमनरूपं अस्माकं व्रतं सफलीकरोतु।

**सरलार्थः -** अस्याः विश्वसमृद्धेः ऋतबद्धद्वारा व्रतपतिरूप हे देव। अग्ने मां नयतु। भवद्भिः सृष्टेः येन सार्वत्रिकेन नियमेन अहं अग्रे नीयेयम् । असत्यं परित्यज्य सत्यमार्गे गमनरूपं अस्माकं व्रतं सफलीकरोतु।

**षष्ठः मन्त्रः -**

**कस्त्वा युनक्ति स त्वा युनक्ति कस्मै त्वा युनक्ति तस्मै त्वा युनक्ति। कर्मणे वां वेषाय वाम् ।।६।।**

(प्रश्नः) हे देव। त्वां केन नियुक्तः? किमर्थं नियुक्तः ? (उत्तरम्) तेन (प्रजापतिना) भवन्तौ (बलवान् दुर्बलौ च) (यज्ञादि) कर्म (सत्कर्मणा) कर्तुं तद्वारा दिव्यस्थाने संव्यापयितुं च नियुक्तौ।

**सरलार्थः -** त्वाम् अत्र केन आनयत् ? सः त्वाम् अत्र आनयत्। किमर्थं त्वाम् अत्र आनयत् ? तदर्थं सः त्वाम् अत्र आनयत्। काले काले यानि भूमिकाः स्वीक्रियन्ते, तत्तत्भूमिकानुसारं कर्मानुष्ठानं कृत्वा प्रगतिं प्रापयत।

## पुनरावृत्तिः (Recap)

- इषे त्वोर्जो इति मन्त्रः जीवने अन्नस्य ऊर्जस्य च महत्त्वं बोधयति।
- ईश्वरस्य प्रसादेन गोयूथं वर्धयतुं प्रार्थयति।
- यजमानस्य वर्धितवीर्यान् संरक्षतु।
- ईश्वरः सर्वेषां धारकः भवति।
- यज्ञपतिना सह अस्मान् संरक्षितुं प्रार्थयति।

- सा गौः सर्वस्य आधारः भवति।
- सृष्टेः नियमानुसारं मां अग्रे नीयताम् इति प्रार्थनां करोति।
- ईश्वरस्य इच्छानुसारं कर्मानुष्ठानं कृत्वा प्रगतिं प्राप्तुं कथयति।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.इषे त्वर्जे इति मन्त्रेण आरब्धः वेदः कः?

2.यजुर्वेदस्यि द्विविभागानां नामानि लिखत।

3.कस्मै स्वस्य उत्पादनस्य भागं समर्पयति?

4.ईश्वरः केन सह अस्मान् संरक्षितुं मन्त्रे वदति?

5.भवतः के ईश्वरेण पवित्राः कुर्वन्ति?

6.कानि सुरक्षितरूपेण स्थापयतु?

7.किं परित्यजितुं कथयति ?

8.काले काले किं स्वीक्रियन्ते?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

## (Answer the following questions in one or two sentences)

1.यजुर्वेदस्य कति विभागः कति शाखाः च सन्ति ?

2.नूतनपीढी कीदृशाः भवन्तु?

3.गौः कीदृशाः भवन्ति?

## एकैकया खण्डिकया उत्तराणि लिखत।

## (Answer the following questions in a paragraph)

1.यजुर्वेदस्य परिचयः कुरुत।

2.अग्ने व्रतपते व्रतं चरिष्यामि इति मन्त्रस्य आशयं लिखत।

## निर्दिष्टाभ्यासः (Assignments)

| |
|---|
| 1.यजुर्वेदे प्रतिपादितं यज्ञानुष्ठानं प्रतिपादयत। |

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1.यजुर्वेदः

2.शुक्लं कृष्णं च

3.गोधनस्य

4.यज्ञपतिना

5.मार्गाः

6.हव्यानि

7.असत्यम्

8.भूमिकाः

## सूचनाग्रन्थाः

1.कृष्णयजुर्वेदसंहिता सायणभाष्येण सहितः, आनन्दाश्रमसंस्कृतग्रन्थावलिः, पूने, 1940

2.संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

3.ऋक्सूत्रसन्दर्शिका–बालगोविन्द झा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2012)

4.वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2016)

BLOCK -5

# सामवेदः-प्रथमाध्याये अग्निसूक्तात् अष्टमन्त्राः ।

SGOU

# Block 5

## सामवेदः- प्रथमाध्याये अग्निसूक्तात्  अष्ट मन्त्राः

## उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- सामवेदसंहितायाः ज्ञानं प्राप्नोति।
- सामवेदसूक्तानां परिचयः जायते।

## प्राग्व्यपेक्षाः (Pre requisites)

सा च अमश्चेति तत्साम्नः सामत्वम्। सा नाम अमो नाम स्वरः। अतः स्वरबद्धरीत्या गेयात्मकर्चाणां समूहः सामसंहिता। यज्ञे उद्गाता यो हि देवाहृतये स्वरबद्धान् मन्त्रान् उच्चैर्गायति तदपेक्षितमन्त्रसंग्रहः सामवेदसंहितायां विद्यते । संहितायाः द्वौ भागौ पूर्वार्चिक उत्तरार्चिकश्च ।

## प्रधानांशाः/प्रधानपदानि (Key words)

अग्निः,भरद्वाजः, गायत्री,छन्दः, देवता, चरुपुरोडाशादीनां ,देवेभ्यः, स्तूयमानः, दानक्रियाविमुखः, रक्षः प्रभृतीनि।

# Unit 1

## प्रथमाध्याये अग्निसूक्तात् प्रथम- द्वितीय- तृतीयमन्त्राः।

## विशदीकरणम्  (Discussion)

प्रथममन्त्रः, ऋषिः- भरद्वाजः, छन्दः- गायत्री, देवता- अग्निः ।

**1. अग्न आ याहि वीतये गृणानो हव्यदातये, नि होता सत्सि बर्हिषि ।**

हे अग्ने,(अङ्गनादि गुणविशिष्ट) त्वम् आयाहि (अस्मद्यज्ञं प्रति आगच्छ)।किमर्थमिति चेत् वीतये (हविषां- चरुपुरोडाशादीनां भक्षणाय)। कीदृशः सन्निति चेत् गृणानः (अस्माभिः स्तूयमानः) । पुनश्च किमिर्थमिति चेत् हव्यदातये । देवेभ्यो हविःप्रदानाय आगत्य च होता- देवानामाह्वाता सन् बर्हिषि- आस्तीर्णे दर्भे निषत्सि- निषीद (उपविशतु) ।।

हे अग्ने,अस्माभिः स्तूयमानः सन्,चरुपुरोडाशादीनां हविषां भक्षणाय,देवेभ्यो हविप्रदानाय च अस्मत्कृतं यज्ञं प्रति आगत्य आस्तीर्णे दर्भे उपविशतु इति अनेन मन्त्रेण यज्ञसन्दर्भे अग्निम् आहूयते ।।

**द्वितीयमन्त्रः- ऋष्याद्याः पूर्ववत् ।**

**त्वम् अग्ने यज्ञानां होता विश्वेषां हितः, देवेभिः मानुषे जने ।**

हे अग्ने, त्वं विश्वेषां यज्ञानाम् अग्निष्टोमादीनां सम्बन्धी होता (होमनिष्पादनशीलः)भवति। अथवा यज्ञानां- यष्टव्यानां विश्वेषां- देवानां होता- आह्वाता भवति । एवंभूतः त्वं मानुषे- मनोरपत्यभूते यजमानलक्षणे देवेभिः- देवैः- देवनशीलैर्ऋत्विग्भिः, हितः- निहितः, गार्हपत्यादिरूपे संस्थापितो भवसि । अथवा देवैरेव इन्द्रादिभिः उक्तलक्षणः सन् यज्ञानां निष्पादनाय यजमाने नियुक्तोऽसि ।।

ऋत्विक्, होता, उद्गाता, अध्वर्युः इति यज्ञकर्मणि पुरोहितचतुष्कं वर्तते । यज्ञनिष्पादनार्थं पुरोहितचतुष्कमतीत्य यजमानस्यापि संगतिरस्ति । अग्निरत्र यज्ञमधिकृत्य होतृरूपेण यजमानरूपेण च प्रकीर्त्यते । "अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नातमम्" इति ऋग्वेदीयमन्त्रमप्यस्ति ।

**तृतीयमन्त्रः, ऋषिः- कण्वपुत्रः मेधातिथीः, छन्दोदेवते पूर्ववत् ।**

**अग्निं दूतं वृणीमहे होतारं, विश्ववेदसम् अस्य यज्ञस्य सुक्रतुम् ।।3।।**

दूतम् (देवानां दौत्ये विनियुक्तम्) अग्निं (देवं) वृणीमहे (स्तुतिभिर्हिविभिर्भजामहे)। कथम्भूतमिति चेत् होतारं (साधुदेवानामाह्वातारम्), विश्ववेदसं (विश्वानि वेत्तीति विश्ववेदाः तम्)अथवा विश्वं सर्वं वेदो- धनं यस्य तम् । अस्य (प्रवर्त्तमानस्य)यज्ञस्य सुक्रतुं (निष्पादकत्वेन शोभनकर्माणम्)त्वां वृणीमहे- (भजामहे) इति।

अत्रापि अग्निं होतृरूपेण स्तूयते । देवतानां दूतभूतः सन् अग्निः यज्ञे विनिवर्तते । इतरदेवतानाम् अह्वानम् अग्निरेव करोति इत्यतः अग्निः होता भवति । यज्ञरूपशोभनकर्मणः निष्पादकत्वेनापि अग्निः स्तूयमानः भवति ।

## Unit 2

## प्रथमाध्याये अग्निसूक्तात् चतुर्थपञ्चमषष्ठमन्त्राः ।

### विशदीकरणम् (Discussion)

चतुर्थमन्त्रः- ऋषिः- भरद्वाजः,छन्दोदेवते पूर्ववत्

**अग्निः वृत्राणि जङ्घनद्, द्रविणस्युः, विषन्यया, समद्धिः शुक्र आहुतः । द्र द्रविणस्युः।।4।।**

(द्रविणं- धनं स्तोतृणामिच्छन्- हविर्लक्षणं धनं तदात्मन इच्छन्नग्निः) पिपन्यया- स्तुत्यर्थः (अस्माभिः क्रियमाणया स्तुत्या स्तूयमानः सन्) वृत्राणि (बलेन जगतामावरकाणि रक्षःप्रभृतीनि, तमांसि वा) जङ्घनत् (भृशं हन्ति)। कीदृशः अग्निः इति चेत् समिद्धः

(समिदादिभिर्हविभिः सम्यग्दीपितः), अत एव शुक्रः (दीप्यमानः), आहुतः- हविभिराहुतः भवति ।

हविर्लक्षणं धनमिच्छन् अग्निः, स्तूयमानः सन् रक्षःप्रभृतीनि तमांसि वा भृशं हन्ति । समिदादिभिर्हविभिः सम्यग्दीपितः सन्नग्निः दीप्यमानः भूत्वा, स्वस्य ज्वालया शत्रूनन्धकारान् च विनश्यति ।

**पञ्चममन्त्रः, ऋषिः-उशनसा, छन्दोदेवते पूर्ववत् ।**

**प्रेष्ठं वो अतिथिं स्तुषे, मित्रमिव प्रियम् । अग्ने रथं न वेद्यम् ।।5।।**

हे अग्ने, वः (त्वां)जुषे (स्तौमि)। कीदृशमिति चेत् प्रेष्ठं (स्तोतृणामस्माकं धनदानेन प्रियतमम्), अतिथिम् (सर्वैरतिथिवत्पूज्यम्), (अथवा सततं देवानां हविः प्रदातुं गच्छन्तं) मित्रमिव (सखायमिव) प्रियं- स्तोतुः प्रीणनकरम् । रथं न- रथमिव वेद्यं- वेदो धनं, लाभहेतुं यथा रथेन धनं लभते, तद्वत् स्तोतारो अनेन धनं लभन्ते, तादृशधनलाभकारणम् ।

धनदानेन प्रियतममग्निमत्र स्तौति । यज्ञकर्मणा धनसम्पादनमधिकतया कर्तुं शक्यत इति तात्पर्यमपि अत्र सूचयति ।

**षष्ठमन्त्रः,ऋषिः- पुरुमोढाभ्यां तयोरन्यतरेण वा,छन्दोदेवते पूर्ववत् ।**

**त्वं नो अग्ने महोभिः पाहि ,विश्वस्या अरातेः, उत द्विषो मर्त्यस्य ।।6।।**

हे अग्ने, त्वं नः (अस्मान्)महोभिः (पूजाभिः महद्भिर्धनैर्वा) पाहि (रक्ष)। कस्याः पाहि इति चेत् विश्वस्याः (बहुविधात्) अरातेः- अदातुः सकाशात्, अदानाद्वा पाहि । त्वमेव महद्धनं दत्वा अदातुः अदानाद्वा सकाशाद् रक्षेत्यर्थः । (यद्वा महोभिः युक्तः त्वमिति योज्यम्)। उत- अपि च, द्विषः (द्वेष्टुः)मर्त्यस्य (मर्त्यात्सकाशात् पाहि- अस्मभ्यं बलं दत्वेति भावः । अथवा

मर्त्यस्य द्विषो- द्वेषाद्रक्षेति सम्बन्धः । अरातेरित्यस्य अदानादिति पक्षे तत्रापि मर्त्यस्यादानादिति सम्बन्धनीयम् ।

हे अग्ने, महद्भिर्धनैः अस्मान् रक्षेति प्रार्थनामत्र करोति यजमानः । अरातिशब्दस्य अदातुरिति अथवा अदानाद्वा इति अर्थापेक्षा चिन्तनीया एव । दानक्रियाविमुखाः निर्धनाश्चेत् तेषां धनसम्पत्तिरपि प्रार्थयतेत्र ।

# Unit 3

## सप्तमाष्टममन्त्रौ ।

### विशदीकरणम् (Discussion)

**सप्तममन्त्रः,ऋषिः- भरद्वाजः,छन्दोदेवते पूर्ववत् ।**

**एह्यू, षु ब्रवाणि ते अग्न इत्थ इतरा गिरः, एभिः वर्धास इन्दुभिः ।।7।।**

हे अग्ने, एहि (आगच्छ),ते (तुभ्यम्- त्वदर्थम्)गिरः (स्तुतीः) सु (सुष्ठु) ब्रवाणि इत्याशास्यते । ताः स्तुतीः शृण्वित्यर्थः । इत्थेतरा (इतराः) गिरः (स्तुतीः) शृण्विति शेषः । अपि च आगतस्त्वम् एभिः (एतैः) इन्दुभिः (सोमैः) वर्धास (वर्धस्व) ।

हे अग्ने, आगच्छ, त्वदर्थं स्तुतीः सुष्ठु इति आशास्यते । इतराः स्तुतीः अपि श्रृणु । अत्रागतः त्वं सोमरसैः वर्धस्व चेत्यर्थः ।

**अष्टममन्त्रः, ऋषिः- कण्वगोत्रजः वत्सः, छन्दोदेवते पूर्ववत् ।**

**आ ते वत्सो मनो यमत्, परमाच्चित् सधस्थात्, अग्ने त्वां कामये गिरा ।**

वत्स (एतन्नाम ऋषिः) ते (तव)मनः परमाश्चित् (उत्कृष्टादपि) सधस्थात् (सहस्थानात्-द्युलोकात्) आयमत् (आ यमयति)। केन कारणेनेति चेत् गिरा (स्तुत्या)। हे अग्ने, त्वां कामये (त्वदीयं मन मय्येव नियच्छामीति प्रार्थये)।

वत्स नामको ऋषिः अग्नेः मनः द्युलोकात् स्तुत्या आ यमयति। तस्मात् त्वदीयं मनः मय्येव नियच्छामीति प्रार्थये ।।

## पुनरावृत्तिः (Recap)

- सामसंहितायाः द्वौ भागौ पूर्वार्चिक उत्तरार्चिकश्च।
- अग्निं चरुपुरोडाशादीनां हविषां भक्षणाय,देवेभ्यो हविप्रदानाय च आह्वयति।
- यज्ञकर्मणि पुरोहितचतुष्कं वर्तते।
- देवतानां इतभूतः सन् अग्निः निवर्तते।
- अग्निः स्तूयमानः भवति।
- अग्निः रक्षःप्रभृतीनि तमांसि वा भृशं हन्ति।
- यज्ञकर्मणा धनसम्पादनमधिकतया कर्तुं शक्यत इति मन्त्रस्य तात्पर्यम्।
- दानक्रियाविमुखाः निर्धनाश्चेत् तेषां धनसम्पत्तिरपि प्रार्थयते।
- अग्निः सोमरसैः वर्धस्व।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.सामसंहितायां कति भागाः सन्ति ?

2.यज्ञे अग्निं किमर्थं आह्वयति ?

3.यज्ञकर्मणि कति प्रधानपुरोहिताः सन्ति?

4.यज्ञकर्मणा किं कर्तुं शक्यते?

5.अग्निः कैः वर्धयति?

6.किम् नामको ऋषिः अग्नेः मनः द्युलोकात् स्तुत्या आ यमयति ?

7.अग्निः कं हन्ति ?

8.एह्यू इति मन्त्रस्य ऋषिः कः ?

9.अग्न आ यहि  इति मन्त्रस्य छन्दः कः ?

10.आ ते मनो – अस्य मन्त्रस्य देवता कः ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

### (Answer the following questions in one or two sentences)

1.यज्ञकर्मणि वर्तमानाः प्रधानपुरोहिताः के ?

2.यज्ञे अग्निं किमर्थं आह्वयति ?

3.सामसंहितायाः द्वयोः भागयोः नामे लिखत।

4.त्वं नो अग्ने महोभिः पाहि इति मन्त्रेण यजमानः किं प्रार्थयति ?

## एकैकया खण्डिकया उत्तराणि लिखत।

### (Answer the following questions in a paragraph)

1.एह्यू, षु ब्रवाणि ते अग्न इत्थ इतरा गिरः, एभिः वर्धास इन्दुभिः ।।मन्त्रं विशदयत।

2.प्रेष्ठं वो अतिथिं स्तुषे, मित्रमिव प्रियम् । अग्ने रथं न वेद्यम्।।मन्त्रं विशदयत।

## निर्दिष्टाभ्यासः (Assignments)

1.सामवेदं प्रति टिप्पणिं लिखत ।

2.सामवेदे प्रतिपाद्यमानानां अग्निसूक्तानां प्रसक्तिंमधिकृत्य विशदयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1.द्वौ

2.चरुपुरोडाशादीनां हविषां भक्षणाय देवेभ्यो हविर्प्रदानाय च

3.चत्वारः

4.धनसम्पादनमधिकतया कर्तुं शक्यते।

5.सोमरसैः

6.वत्स नामकं

7.रक्षसं

8.भरद्वाजः

9.गायत्री

10.अग्निः

## सूचनाग्रन्थाः


1. सामवेदसंहिता, सायणभाष्येण सहितः, मुन्शी राममनोहरलाल प्रकाशन्,प्र.लि.नवदेल्ली, 1983

2.संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

3.ऋक्सूत्रसन्दर्शिका–बालगोविन्द झा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2012)

4.वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा (चौखम्पासुरभारतीप्रकाशन्, वाराणसी, 2016)

BLOCK -6

# अथर्ववेदः-अथर्ववेदे आपः सूक्तानि

## (प्रथमकाण्डे चतुर्थ-पञ्चम-षष्ठसूक्तानि।)

SGOU

## Block 6

# अथर्ववेदः - अथर्ववेदे आपः सूक्तानि (प्रथमकाण्डे चतुर्थ- पञ्चम- षष्ठ- सूक्तानि।)

## उद्देश्यानि (Learning Outcomes)

- वेदानां परिचयः जायते।
- वैदिकसाहित्यस्य परिचयः।
- अथर्ववेदसंहितायाः ज्ञानं प्राप्नोति।
- अथर्ववेदसूक्तानां परिचयः जायते।

## प्राग्व्यपेक्षाः (Pre requisites)

**अथर्ववेदसंहितायाः परिचयः**

कस्यापि यज्ञस्य परिपूर्णतायै चत्वारः ऋत्विजो भवन्ति । तेषु ब्रह्मा नाम ऋत्विक् अध्यक्षो भवति। यतो हि अयं सर्ववेदज्ञाता भवति। अस्य प्रधानकार्य यज्ञस्य विधानानां निरीक्षणं सम्भावितत्रुट्याः मार्जनञ्च भवति। ऋग्वेदादयः त्रयो वेदाः आमुष्मिकं फलं प्रयच्छन्ति, परन्तु अथर्ववेदः आमुष्मिकेन सह ऐहिकमपि फलं प्रयच्छति। अथर्ववेदे शान्त्याः पौष्टिककार्यस्य च सम्पादनाय विधानानि उक्तानि सन्ति । अधर्ववेदस्य परिशिष्टे लिखितमस्ति "यस्य राज्ञः जनपदेऽधर्ववेदस्य ज्ञाता निवसति तस्य राष्ट्र निरुपद्रवो भूत्वा वृद्धिं गच्छति।" अनेन प्रकारेण ऐहिक आमुष्मिक लौकिक पारलौकिकविषयाणां प्रतिपादकत्वेन अथर्ववेदः वैदिकसंहितासु स्ववैशिष्ट्यं भजते ।

अथर्ववेदस्य अध्ययनम् इह अपरिहार्यत्वेन अनिवार्यत्वेन चोक्तमस्ति। अथर्वसंहिताया अध्ययनं यः करोति स 'ब्रह्मा' इति नाम्ना उच्यते। 'ब्रह्मा' इति पदस्य अर्थ कुर्वता निस्क्तकारेण उक्तं-"ब्रह्मा सर्वविधः सर्व वेदितुमर्हति।" (नि-१/३/९) सर्वविधः इत्यनेन पदेन त्रयोविधासंयुक्तः इत्यर्थो बुध्यते । त्रयीविधा नाम ऋग्यजुस्सामेति वेदत्रयी। तस्मात्

सर्ववदस्याध्ययनं असौ करोति, अत एव "ब्रह्मा परिवृद्धः श्रुततः" (नि १/३/९) इत्युक्तः। अर्थात् ब्रह्मा नाम ऋत्विक् , ऋत्विजां मध्ये परिवृद्ध नायकः, प्रभुः भवति। ब्रह्मणा सह अस्य वेदस्य सम्बन्धोऽस्ति । तस्मात् अथर्ववेदस्य महत्त्वं सर्वेषु वेदेषु महत्त्वपूर्णमस्ति ।

## प्रधानांशाः/प्रधानपदानि (Key words)

अथर्ववेदः,भौतिकविज्ञानं, भैषजविज्ञानं, चतुर्थसूक्तम्, चत्वारः मन्त्राः, लोकमाता आपः, अमृतम्, भेषजम्, गावः,वाजिनः ।

## विशदीकरणम् (Discussion)

कृष्णद्वैपायनो वेदव्यासः स्वशिष्येषु सुमन्तुनामकं शिष्यं अथर्ववेदं अध्यापितवान्। अथर्ववेदे जनसामान्यानां उपयोगिनां विशिष्टमन्त्राणां सङ्कलनमस्ति। सामान्यजनाः शान्तिपौष्टिककर्मणः, तुलापुरुषादियानस्य च महती आवश्यकताम् अनुभवन्ति। तेषां समस्ताभिचारिकक्रियाणां विधानानि अत्र उक्तानि सन्ति। भौतिकविज्ञानस्य, भैषज्यविज्ञानस्य च सिद्धान्तानां विशिष्टसङ्कलनमथर्ववेदेऽस्ति। अनेकविधरोगस्य, शारीरिकप्रतीकारस्य, औषधादौनाज्य विषये वैज्ञानिकतध्यानां ज्ञानम् अस्मिन् वंदे प्राप्यते। अत्र अनेकानि सूक्तानि-भैषज्यसूक्तम्, आयुष्यसूक्तम्, प्रायश्चित्तम्, स्त्रीकर्माणि, राजकर्माणि, पृथिवोसूक्तम्, ब्रहाण्यानि इत्यादीनि लौकिकविषयप्रतिपारकानि सन्ति। अनेन नेदं सिध्यति यदयं वेदः यज्ञविधानस्य उपेक्षां करोति। अपितु यज्ञस्य सम्बन्धेऽभिचारेण सह विशेषरूपेण प्रतिष्ठतोऽस्ति । अस्य पेरस्योद्देश्यं यद् स्वर्गप्राच्या सह सांसारिकाभ्युदयः शत्रूणां पराजयः च स्यात्। अनेन प्रकारेण अथर्ववेदे याज्ञिकभावनायां विकासक्रमस्यैकः परिचयोऽपि प्राप्यते। एवंविधप्रत्ययानांपरिचयार्थ अथर्ववेदः मनुष्याणामितिहासे सर्वाधिकप्राचीन ग्रन्थरत्नमस्ति । अर्थात् याज्ञिकविधान- व्याख्यानेन सह यज्ञकर्तृणां मनुष्याणाम् इतरसमस्यानां समाधानम् अस्य मुख्यं लक्ष्यम्। तस्मात् वैदिकसाहित्ये अथर्ववेदस्य स्थानम् अतीव अनुपममस्ति ।

## Unit 1

## अथर्ववेदे आपः सूक्तानि

## (प्रथमकाण्डे चतुर्थसूक्तम्- चत्वारो मन्त्राः)

### विशदीकरणम् (Discussion)

**प्रथममन्त्रः -**

**अम्बयो यन्त्यध्वभिर्जामयो अध्वरीयताम् । पृञ्चतीर्मधुना पयः ।।1।।**

अम्बयः (कृत्स्नस्य जगतो मातृभूता आपः) यन्ति (आगच्छन्ति) अध्वभिः (मार्गैः) जामयः (यजमानानं भागिन्यः- क्रियमाणे व्यापारे भगिनीवत् सहायभूता इत्यर्थः) अध्वरीयतां (ध्वरो हिंसा न विद्यतेस्मिन्निति अध्वरः ज्योतिष्टोमादिर्यागः तम् आत्मन इच्छताम्) पृञ्चतीः (पृञ्चत्यः- संयोजयत्यः) मधुना (माधुर्येण) पयः (सोमरसादिकं होमद्रव्यम्) इत्यन्वयः ।

अम्बा इति प्रसिद्धा लोकमाता आपः, क्रियमाणे व्यापारे (यज्ञे) भगिनीवत् सहायभूता सन् प्रसिद्धैः मार्गैः यागभूमिम् आगत्य स्वकीयेन माधुर्यरसेन पयः (सोमादिकं होमद्रव्यं पयोविकारभूतम् आज्यं वा) संयोजयन्ति इत्याशयः ।

**द्वितीयमन्त्रः -**

**अमूर्या उपसूर्ये याभिर्वा सूर्यः सह । ता नो हिन्वन्त्वध्वरम् ।।2।।**

**पदपाठः -** अमूः या उपसूर्ये याभिः वा सूर्यः सह ताः नः हिन्वन्तु अध्वरम् ।

अमूः (वृष्टिरूपेण द्युलोकाद् आगच्छन्त्यो याः जगत्कारणत्वेन प्रसिद्धा आपः) सूर्ये (सूर्यमण्डले) उप (उपलक्ष्यन्ते) । याभिः (मण्डलसमीपस्थाभिः अद्भिः) सह वा (अथवा) सूर्ये वर्तते । ताः

(उक्तलक्षणा आपः) नः (अस्माकम्)अध्वरं (यज्ञं- क्रियमाणं कर्म) हिन्वन्तु- प्रीणयन्तु (फलदानसमर्थं कुर्वन्तु)इत्यन्वयः ।

वृष्टिरूपेण द्युलोकाद् आगच्छन्त्यः आपः सूर्यमण्डले अथवा सूर्यमण्डलसमीपस्थाभिः अद्भिः सह वर्तते । ताश्च आपः अस्माकं क्रियमाणं यज्ञरूपमध्वरं फलदानसमर्थं कुर्वन्तु इति आशयः ।।

**तृतीयमन्त्रः -**

**अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः सिन्धुभ्यः कर्त्वं हविः ।।3।।**

**पदपाठः -** अपः देवीः उप ह्वये यत्र गावः पिबन्ति नः सिन्धुभ्यः कर्त्वं हविः ।

देवीः (द्योतमाना देवतारूपा वा) अपः (उदकानि) उप ह्वये (समीपम् आह्वयामि) यत्र (सजलेषु नदीतटाकेषु) नः (अस्माकम्) गावः पिबन्ति सिन्धुभ्यः (स्यन्दनशीलाभ्यः ताभ्यः) हविः (आज्यादिरूपम्) कर्त्वम् (कर्तव्यम्) इत्यन्वयः ।

द्युतिपूर्णा देवतारूपा अपः समीपम् आह्वयामि यत्र अस्माकं गावः पिबन्ति, स्यन्दनशीलाभ्यः आज्यादिरूपं कर्तव्यम् भवति । किमर्थमिति चेत् नदीतटाकादिषु जलपूर्णतयैव पानादिकं जीवनं साद्ध्यमिति चिन्तायाम् ।

**चतुर्थमन्त्रः -**

**अप्स्वन्तरमृतमप्सु भेषजम् ।**

**अपामुत प्रशस्तिभिरश्वा भवथ वाजिनो गावो भवथ वाजिनीः ।।4।।**

**पदपाठः -** अप्सु अन्तः अमृतम् अप्सु भेषजम् अपाम् उत प्रशस्तिभिः अश्वाः भवथ वाजिनः गावः भवथ वाजिनीः ।

अप्सु (उदकेषु) अन्तः (मध्ये) अमृतम् (अमरणसाधनम्- पीयूषम्) ,तथा अप्सु भेषजम् (सर्वरोगनिवारकम्) (अस्ति) । हे अश्वाः (अस्मदीयतुरगाः) प्रशस्तिभिः (प्रभाविशेषैः) वाजिनः

(वाज इति बलनाम तद्वन्तो वेगयुक्तो) भवथ (भवेत्), गावः (हे गावः ) वाजिनीः (वाजिन्यः- बलयुक्ताः) भवथ इत्यन्वयः ।

उदकेषु मध्ये पीयूषं वर्तत इति जलपानेन जीवनसाधुता निरीक्ष्यते । स समुद्रमथनेन अमृतस्य उत्पन्नत्वादित्यपि तत्साधुत्वमाचक्षते । अथवा मूर्च्छितस्य उदकावसेकेन उत्क्रान्तानामपि प्राणानां पुनः शरीरे प्रवेशदर्शनात् अप्सु अमृतम् अमरणसाधनमस्तीति गम्यते । उदकरसेन प्रवृत्तानामोषधीनां रसस्यैव रोगनिवारकत्वात् भेषजत्वमपि उदके वर्तते । ईदृशीनाम् अपाम् उपजीवनेन जनाः सर्वे अमृता अरोगाश्च भवेथुरित्यर्थः । अस्मदीय अश्वाः गावश्च अमृतभेषजरूपाम् अपां पानेन बलयुक्ताः भूत्वा वेगातिशायिनः, प्रभूतक्षीरान्विताश्च भवथेत्यर्थः ।।

## Unit 2

## अथर्ववेदे आपः सूक्तानि

## (प्रथमकाण्डे पञ्चमसूक्तात् त्रयो मन्त्राः)

### विशदीकरणम् (Discussion)

**प्रथममन्त्रः -**

**आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन ।**
**महे रणाय चक्षसे ।।1।।**

**पदपाठः -** आपः हि ष्ठा मयोभुवः ताः नः ऊर्जे दधातन महे रणाय चक्षसे ।।

अन्वयः - हे आपः (यूयं) हि (यस्मात् कारणात्) मयोभुवः (मय इति सुखनाम) ष्ठ (स्थ- भवथ), ताः (तथाविधाः) नः (अस्मान्) ऊर्जे (बलकाराय) दधातन (धत्त), महे (महनीयाय) रणाय (रमणाय) चक्षसे इत्यन्वयः ।

**सरलार्थः**-हे आपः,त्वं सुखस्य भावयित्र्यः भवथ । (अपाम् उपभोगेन प्राणस्थैर्यहेतुत्वात् सुखसाधनभूतविविधान्नाद्युपभोग्यपदार्थजनकत्वेन च सुखहेतुत्वम् । सुखकरान्नप्रदानेन अस्मान् पोषयथेत्यर्थः । अपि च विविधोपभोगपदार्थेषु क्रीडनाय भवथ । अथवा रणाय- रणनीयाय (शब्दनीयाय) च वर्तते ।

**द्वितीयमन्त्रः -**

**यो वः शिवतमो रसस्तस्य भजयतेह नः ।**

**उशतीरिव मातरः ।।2।।**

**पदपाठः -** यः वः शिवतमः रसः तस्य भजयत इह नः उशतीः इव मातरः ।

**अन्वयः**-हे आपः, वः (युष्माकम्) शिवतमः (कल्याणतमः) यः रसः (सारभूतः अंशः) तस्य (रसस्य) भजयत (सेवयत), उशतीः मातरः इव इत्यन्वयः ।

**सरलार्थः**-हे आपः, युष्माकं सर्वोत्कृष्टः रसः (सर्वप्राणिभिः अविसंवादेन उपभोग्यत्वात् शिवतमत्वम्) अस्मान् पोषयते । तच्च कामयमानाः मातरः स्वकीयं पुत्रं स्तन्यरसप्रदानेन यथा पोषयति तद्वत् अपां शिवतमो रसः सर्वान् पोषयतेत्यर्थः ।।

**तृतीयमन्त्रः -**

**तस्मा अरं गमास वो यस्य क्षयाय जिन्वथ ।**

**आपो जनयथा च नः ।।3।।**

पदपाठः -तस्मै अरं गमास वः यस्य क्षयाय जिन्वथ, आपः जनयथा च नः ।

**अन्वयः**- तस्मै (उपभोग्यत्वेन प्रसिद्धस्य अन्नस्य प्राप्त्यर्थं) हे आपः, वः (युष्मान्) अरम् (अलं-पर्याप्तम्) गमास (गच्छाम- प्राप्नुयाम) यस्य (अन्नस्य) क्षयाय (निवासाय- अभिवृद्धये) जिन्वथ (तर्पयथ- व्रीह्यादि सस्यविशेषान्),जनयथ च नः (अस्मान् उत्पादयथ) इत्यन्वयः।

**सरलार्थः -** हे आपः, उपभोग्यत्वेन प्रसिद्धस्य अन्नस्य प्राप्त्यर्थं त्वं पर्याप्तमेव। पर्ज्जन्यादन्नसम्भवः इति प्रसिद्धो भवति। व्रीह्यादिसस्यविशेषाणां वर्धनाय अलमिति यावत्। अपि आपः अस्मान् पुत्रपौत्रादिरूपेण उत्पाद्यन्ते इत्याशयः।।

# Unit 3

## अथर्वेवेदे आपः सूक्तानि

## (प्रथमकाण्डे पञ्चमसूक्तात् चतुर्थो मन्त्रः, षष्ठसूक्तस्य प्रथमद्वितीयमन्त्रौ च )

### विशदीकरणम् (Discussion)

**प्रथमकाण्डे पञ्चमसूक्तात् चतुर्थो मन्त्रः।**

**ईशाना वार्याणां क्षयन्तीश्चर्षणीनाम्।**
**अपो याचामि भेषजम् ।।4।।**

**पदपाठः -** ईशानाः वार्याणां क्षयन्तीः चर्षणीनाम् अपः याचामि भेषजम्।

**अन्वयः**-वार्याणां (वरणीयानां धनानाम्) ईशानाः (ईश्वराः) चर्षणीनां (मनुष्यनामैतदित्यतः मनुष्याणाम्) क्षयन्तीः (निवासयित्रीः), अपः भेषजं (औषधं) याचामि (प्रार्थये)इत्यन्वयः।।

**सरलार्थः**-वरणीयानां धनानाम् ईश्वराः मनुष्येभ्यो निवासयित्री भवति आपः। तादृशेभ्यः अद्भ्यः रोगनिवारकमौषधं प्रार्थयते च इत्याशयः।।

**षष्ठसूक्तस्य प्रथममन्त्रः**

**शं नो देवीरभिष्टय आपो भवन्तु पीतये ।**

**शं योरभि स्रवन्तु नः ।।1।।**

**पदपाठः -** शं नः देवीः अभिष्टये आपः भवन्तु पीतये, शं योः अभि स्रवन्तु नः ।।

**अन्वयः -**(एवमात्मिका आपः) नः (अस्माकम्) अभिष्टये (अभियजनाय) शं (सुखं) भवन्तु, (अपि च) नः (अस्माकम्) शं (प्राप्तानां रोगाणां शमनाय) योः (अप्राप्तानां रोगाणां पृथक्करणाय)(च ताः आपः) अभिस्रवन्तु (अस्मदाभिमुख्येन गच्छन्तु) इत्यन्वयः ।।

**सरलार्थः -** एवमात्मिका आपः अस्माकं सर्वतो यागार्थं सुखं भवन्तु । पीयमाना आपः स्वादुतमाः सुखाय भवन्तु इत्यर्थः । अपि च अस्माकं रोगाणां शमनाय, अप्राप्तानां रोगाणां पृथक्करणाय च ताः आपः अस्मदाभिमुख्येन अभिस्रवन्तु । यद्वा योरिति रोगाणां शमनं चोरव्याघ्रादिजनितभयानां पृथक्करणं च यथा भवति तथेत्याशयः ।।

**षष्ठसूक्तस्य द्वितीयमन्त्रः ।**

**अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।**

**अग्निं च विश्वशम्भुवम् ।।2।।**

**पदपाठः-** अप्सु मे सोमः अब्रवीत् अन्तः विश्वानि भेषजा, अग्निं च विश्वशम्भुवम् ।।

**अन्वयः-**(मन्त्रद्रष्टा ब्रूते) अप्सु (उदकेषु) अन्तः (मध्ये) विश्वानि (सर्वाणि) भेषजा (भेषजानि) सोमः (एतन्नामा देवः) मे (मह्यम्) अब्रवीत् (उवाच), (तथा) विश्वशम्भुवम् (विश्वस्य सुखकरम्) अग्निं च इत्यन्वयः ।

**सरलार्थः-** उदकेषु मध्ये विश्वानि सर्वाणि भेषजानि- सर्वरोगनिवर्तकानि औषधानि सन्तीति सोसो नाम देवः मे (मन्त्रदर्शिने) अब्रवीत् । तथा विश्वस्य शम्भुवम् अग्निं चाधिकृत्य उवाच । यद्वा विश्वस्य सर्वे व्यापाराः शम्भुवः- सुखस्य भावयितारः (उत्पादकाः) आपः इति । अपां मध्ये

अग्निरस्तीति यावत् । अनेन अतिशयितवीर्यवत्त्वस्य प्रख्यापितत्वाद् अपां सर्वार्थसाधनसामर्थ्यम् अस्तीत्युक्तं भवतीत्याशयः ।।

## पुनरावृत्तिः (Recap)

- लोकमाता आपः प्रसिद्धैः मार्गैः यागभूमिं आगच्छति।
- आपः तत्र आगत्य माधुर्यरसेन पयः संयोजयन्ति।
- आपः सूर्यमण्डलसमीपस्थाभिः अद्भिः सह वर्तते।
- नदीतटाकादिषु जलपूर्णतस्यैव पानादिकं जीवनं साध्यम्।
- जलपानेन जीवनसाधुता निरीक्षते।
- उदकरसेन प्रवृत्तानामोषधीनां रसस्यैव रोगनिवारकत्वात् भेषजत्वमपि उदके वर्तते।
- आपः सुखकरान्नप्रदानेन अस्मान् पोषयथ।
- मातरः स्वकीयं पुत्रं स्तन्यरसप्रदानेन यथा पोषयति तद्वत् अपां शिवतमः रसः सर्वान् पोषयत।
- अद्भ्यः रोगनिवारकं औषधं प्रार्थयते।
- उदकेषु मध्ये सर्वरोगनिवर्तकानि औषधानि सन्तीति सोमदेवो अब्रवीत्।

## वस्तुनिष्ठप्रश्नाः (Objective type questions)

1.वेदव्यासः कं अथर्ववेदं अध्यापितवान् ?

2.अम्बयोः .... इति मन्त्रः अथर्ववेदस्य कस्मिन् काण्डे अन्तर्भवति ?

3.आपः कथं द्यूलोकात् भूमौ आगच्छति ?

4.केन जीवनसाधुता निरीक्षते ?

5.आपः प्रसिद्धैः मार्गैः कुत्र आगच्छति ?

6.अद्भ्यः कीदृशं औषधं प्रार्थयति ?

7.अश्वाः कथं बलयुक्ताः भवन्ति ?

8.आपः कस्य हेतुकत्वं भवति?

9.आपः कस्य प्राप्त्यर्थं पर्याप्तं भवति ?

10.किं सुखाय भवन्तु इति प्रार्थयति ?

## एकेन वाक्येन द्वाभ्यां वाक्याभ्यां वा उत्तराणि लिखत ।

**(Answer the following questions in one or two sentences)**

1.अथर्ववेदे कीदृशसिद्धान्तानां विशिष्टसङ्कलनं भवति ?

2.अथर्ववेदस्य मुख्यलक्ष्यं किं भवति ?

3.सोमदेवः किं अब्रवीत् ?

## एकैकया खण्डिकया उत्तराणि लिखत।

**(Answer the following questions in a paragraph)**

मन्त्रान् व्याख्यात-

1.अप्सु मे सोमो अब्रवीदन्तर्विश्वानि भेषजा ।अग्निं च विश्वशम्भुवम् ।।

2.यो वः शिवतमो रसस्तस्य भजयतेह नः ।उशतीरिव मातरः ।।

3.अप्स्वन्तरमृतमप्सु भेषजम् ।

अपामुत प्रशस्तिभिरश्वा भवथ वाजिनो गावो भवथ वाजिनीः ।।

## निर्दिष्टाभ्यासः (Assignments)

1.अथर्ववेदमन्त्राणां सविशेषताः,आपः गुणान् च निरूपयत।

## वस्तुनिष्ठप्रश्नानाम् उत्तराणि (Answer to Objective type questions)

1.सुमन्तुनामकम्

2.प्रथमकाण्डे

3.वृष्टिरूपेण

4.जलपानेन

5.यागभूमिं

6.रोगनिवारम्

7.अपां पानेन

8.सुखस्य

9.उपभोग्यत्वेन प्रसिद्धस्य अन्नस्य

10.पीयमानां आपः

## सूचनाग्रन्थाः


1. अथर्ववेदसंहिता, सायणभाष्येण सहितः, शङ्कर पाण्डुरङ्गपण्डितेन संशोधनं, मुम्बई

2.संस्कृतसाहित्येतिहासः – आचार्य लोकमणि दाहालः (चौखम्बा कृष्णदास अकादमी, वाराणसी)

3.ऋक्सूत्रसन्दर्शिका–बालगोविन्द झा (चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2012)

4.वैदिकवाङ्मयस्येतिहासः–जगदीशचन्द्रमिश्रा(चौखम्बा सुरभारतीप्रकाशन्, वाराणसी, 2016)

# Model Question Paper (SET – A)

**SREENARAYANAGURU OPEN UNIVERSITY**

QP CODE: ……… Reg. No …………..............

Name : ………………...

FIFTH SEMESTER B.A. SANSKRIT EXAMINATION

Discipline-Specific Elective Course

B21SN05DE – वैदिकसाहित्यपरिचयः

(CBCS - UG)

**2022-23 - Admission Onwards**

**Time: 3 Hours** **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

**SECTION - A**

(प्रथमो भागः)

I.एकेन पदेन वाक्येन वा केषाश्चित् दशप्रश्नानां उत्तराणि लिखत। **(10x1=10)**

**(Answer any ten questions in a word or sentence)**

1.सामवेदस्य उपवेदः कः?

2.कालविज्ञापकं वेदाङ्गं किम् ?

3.कति वेदाः सन्ति?

4.ऋग्वेदस्य ऋत्विक् कः भवति ?

5.वेदस्य अन्तिमः भागः केन रूपेण ज्ञायते?

6.तत्त्वमसि इति महावाक्यं कस्मिन् उपनिषदि अन्तर्भवति?

7.पाणिनीये कति अध्यायाः सन्ति?

8.ऋग्वेदसम्बद्धं ब्राह्मणं किम्?

9.कर्मकाण्डप्रधानः वेदः कः?

10.संगच्छध्वं संवदत्वं..इति मन्त्रः ऋग्वेदस्य कस्मिन् मण्डले वर्तते?

11.इषे त्वर्जे इति मन्त्रेण आरब्धः वेदः कः?

12.वेदव्यासः कं अथर्ववेदं अध्यापितवान्?

13.अग्निः कं हन्ति?

14.आपः कस्य प्राप्त्यर्थं पर्याप्तं भवति?

15.कीदृशः सूर्यः उदेति?

**SECTION - B**

(द्वितीयो भागः)

II.एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। **(5 x 2 = 10)**

**(Answer any five questions in one or two sentences)**

16.सामवेदस्य द्वौ भागौ कौ?

17.वेदानां पाठप्रकाराः के?

18.ऋग्वेदे कति सूक्तानि कति मन्त्राः च सन्ति?

19.किं समानः भवतु?

20.संहिता पदेन किं व्यवहृतम् ?

21.वेदान्तदर्शनस्य प्रसिद्धाः विभागाः के ?

22.सोमदेवः किम् अब्रवीत्?

23.यज्ञकर्मणि वर्तमानाः प्रधानपुरोहिताः के?

24.आयुर्वेदे दोषाः के ?

25.वेदाङ्गानि कानि?

**SECTION -C**

(तृतीयो भागः)

III. केषाञ्चित् षड्प्रश्नानां उत्तराणि लिखत। **(6 x 5 = 30 )**

**(Answer any six questions)**

26. वेदानां अपौरुषेयत्वं विशदयत।

27. ऋग्वेदस्य मण्डलक्रमं प्रतिपादयत ।

28.संहितायाः महत्त्वं विशदयत।

29.छान्दोग्योपनिदं प्रति लघुटिप्पणिं लिखत।

30.अथर्वप्रातिशाख्यम् निरूपयत।

31.धर्मसूत्रं निरूपयत।

32.उपवेदेषु धनुर्वेदस्य प्राधान्यं लिखत।

33.समानी व आकूतिः समाना हृदयानि वः

समानमस्तु वो मनो यथा वः सुसहासति। मन्त्रं व्याख्यात।

34.सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः।

सुसन्तु सर्वे ज्ञातयिः सस्त्वयमभितो जनः ॥ मन्त्रं व्याख्यात।

35.वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्त्रधारम् । देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥आशयं विशदयत।

36.अग्न आ याहि वीतये गृणानो हव्यदातये, नि होता सत्सि बर्हिषि ।मन्त्रं व्याख्यात।

37.अपो देवीरुप ह्वये यत्र गावः पिबन्ति नः सिन्धुभ्यः कर्त्वं हविः ।मन्त्रं व्याख्यात।

**SECTION -D**

(चतुर्थो भागः)

IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकमुत्तरं लिखत। **(2 x 10=20)**

**(Write an essay on any two of the following )**

38.यागानुष्ठाने ब्राह्मणग्रन्थानां स्थानमधिकृत्य विचारयत।

39.चतुर्वेदानधिकृत्य उपन्यस्यत।

40.अथर्ववेदमन्त्राणां सविशेषताः, आपः गुणान् च निरूपयत।

41.यजुर्वेदे प्रतिपादितं यज्ञानुष्ठानं सविस्तरं प्रतिपादयत।

**Model Question Paper (SET – B)**

## SREENARAYANAGURU OPEN UNIVERSITY

QP CODE: ………   Reg.No: ………...............

Name: ………………...

FIFTH SEMESTER B.A. SANSKRIT EXAMINATION

Discipline Specific Elective Course

B21SN05DE – वैदिकसाहित्यपरिचयः

(CBCS - UG)

**2022-23 - Admission Onwards**

**Time: 3 Hours**   **Max Marks: 70**

**सर्वे प्रश्नाः संस्कृतभाषायां समाधेयाः। संस्कृतलेखने देवनागरीलिपिः उपयोक्तव्या।**

**(Answer may be written in Sanskrit. In writing Sanskrit, Devanagari script should be used.)**

**SECTION A**

(प्रथमो भागः)

I. एकेन पदेन वाक्येन वा केषाञ्चित् दशप्रश्नानां उत्तराणि लिखत।   **(10x1=10)**

**(Answer any ten Questions in a word or Sentence)**

1. ऋग्वेदे कति मण्डलानि सन्ति ?
2. भारतीयपण्डितानां मते ऋषयः वैदिकमन्त्राणां के सन्ति?
3. मुण्डकं इति पदस्य अर्थः कः?
4. आरण्यकानां प्राचीननाम किम्?
5. शङ्कराचार्यः कति उपनिषदां भाष्यं लिखितवान्?

6. किं वेदस्य मुखत्वेन ज्ञायते ?

7. धनुर्वेदस्य चत्वारः पादाः के?

8. नाट्यशास्त्रस्य रचयिता कः?

9. यास्कस्य निरुक्ते कति काण्डानि सन्ति?

10. कस्मै स्वस्य उत्पादनस्य भागं समर्पयति ?

11. कानि सुरक्षितरूपेण स्थापयतु ?

12. ऋत्विजानां किं समानः भवतु?

13. अग्न आ यहि इति मन्त्रस्य छन्दः कः ?

14. केन जीवनसाधुता निरीक्षते?

15. अश्वाः कथं बलयुक्ताः भवन्ति ?

**SECTION -B**

(द्वितीयो भागः)

II. एकेन वाक्येन द्वाभ्यां वा केषाञ्चित् पञ्चप्रश्नानां उत्तराणि लिखत। **(5x2=10)**

**(Answer any five Questions in one or two sentences)**

16. प्रमुखाः शिक्षाग्रन्थाः के?

17. व्याकरणं नाम किम्?

18. ब्रह्मा नाम ऋत्विजः प्रधानकार्यं किम्?

19. आयुर्वेदसंबन्धी कश्चन आप्तवाक्यं किम्?

20. यजुर्वेदविभागयोः नामानि लिखत ।

21. उपनिषत् शब्दस्य व्युत्पत्तिं लिखत।

22. के के सुखिनः भवन्तु?

23.ऋग्वेदस्य अनुवाकक्रमः कीदृशः?

24. गौः कीदृशाः भवन्ति?

25. सामसंहितायाः द्वयोः भागयोः नामे लिखत।

**SECTION - C**

(तृतीयो भागः)

III. केषाञ्चित्षड्प्रश्नानां उत्तराणि लिखत। **(6x5=30)**

**(Answer any six Questions)**

26.ऋग्वेदस्य मण्डलक्रमं विशदयत।

27.यजुस्संहितामधिकृत्य विशदयत

28.ईशावास्योपनिषदमधिकृत्य टिप्पणीं लिखत।

29.पाणिनीयशिक्षायाः प्रतिपाद्यविषयं किम्?

30.ऋग्प्रातिशाख्यमधिकृत्य टिप्पणीं लिखत।

31.नाट्यशास्त्रम् पञ्चमो वेदः – समर्थयत।

32.ज्योतिषामयनं चक्षुः – व्याख्यात।

33.अप्स्वन्तरमृतमप्सु भेषजम् ।
अपामुत प्रशस्तिभिरश्वा भवथ वाजिनो गावो भवथ वाजिनीः ।।मन्त्रं व्याख्यात।

34.आ ते वत्सो मनो यमत्, परमाञ्चित् सधस्थात्, अग्ने त्वां कामये गिरा ।मन्त्रं व्याख्यात।

35.अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राध्यताम् । इदमहमनृतात् सत्यमुपैमि ॥
मन्त्रं व्याख्यात।

36.सं गच्छध्वं सं वदध्वं सं वो मनांसि जानताम् ।

देवा भागं यथा पूर्वे संजानाना उपासते ॥मन्त्रं व्याख्यात।

37.अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् ।सखा सुशेव एधि नः ॥ मन्त्रं व्याख्यात।

**SECTION– D**

(चतुर्थो भागः)

IV. केषाञ्चित् द्वयोः प्रश्नयोः निबन्धात्मकं उत्तरं लिखत। **(2x10=20)**

**(Write an essay on any two of the following)**

38.आयुर्वेदमधिकत्य विशद्य कथम् अयम् उपवेदः शारीरिकमानसिकक्षमतां परिपालयितुं सहायकः भवति इति विचारयत।

39.चतुर्वेदान् उपन्यस्यत।

40. चतुर्महावाक्यसंबन्धोपनिषदां प्रति विचारयत।

41.वैदिकसाहित्ये संहितायाः स्थानमधिकृत्य विचारयत।

**സർവ്വകലാശാലാഗീതം**

---------------------

വിദ്യയാൽ സ്വതന്ത്രരാകണം
വിശ്വപൗരരായി മാറണം
ഗ്രഹപ്രസാദമായ് വിളങ്ങണം
ഗുരുപ്രകാശമേ നയിക്കണേ

കൂരിരുട്ടിൽ നിന്നു ഞങ്ങളെ
സൂര്യവീഥിയിൽ തെളിക്കണം
സ്നേഹദീപ്തിയായ് വിളങ്ങണം
നീതിവൈജയന്തി പാറണം

ശാസ്ത്രവ്യാപ്തിയെന്നുമേകണം
ജാതിഭേദമാകെ മാറണം
ബോധരശ്മിയിൽ തിളങ്ങുവാൻ
ജ്ഞാനകേന്ദ്രമേ ജ്വലിക്കണേ

**കുരീപ്പുഴ ശ്രീകുമാർ**

# SREENARAYANAGURU OPEN UNIVERSITY

## Regional Centres


### Kozhikode
Govt. Arts and Science College
Meenchantha, Kozhikode,
Kerala, Pin: 673002
Ph: 04952920228
email: rckdirector@sgou.ac.in

### Thalassery
Govt. Brennen College
Dharmadam, Thalassery,
Kannur, Pin: 670106
Ph: 04902990494
email: rctdirector@sgou.ac.in

### Tripunithura
Govt. College
Tripunithura, Ernakulam,
Kerala, Pin: 682301
Ph: 04842927436
email: rcedirector@sgou.ac.in

### Pattambi
Sree Neelakanta Govt. Sanskrit College
Pattambi, Palakkad,
Kerala, Pin: 679303
Ph: 04662912009
email: rcpdirector@sgou.ac.in

वैदिकसाहित्यपरिचयः

COURSE CODE: B21SN05DE

SGOU

YouTube

Sreenarayanaguru Open University
Kollam, Kerala Pin- 691601, email: info@sgou.ac.in, www.sgou.ac.in Ph: +91 474 2966841

ISBN 978-81-982562-4-9
9 788198 256249